VEDIC SELECTIONS

PART III

EDITED BY

KSHITISH CHANDRA CHATTERJI, M.A., D.LITT.,

SASTRI, VIDYA-VACASPATI



UNIVERSITY OF CALCUTTA

1957

PRINTED IN INDIA

PRINTED AND PUBLISHED BY SIBENDRANATH KANJILAL,
SUPERINTENDENT, CALCUTTA UNIVERSITY PRESS,
48, HAZRA ROAD, BALLYGUNGE, CALCUTTA.

1874 B.T.—Dec. 1957—GC.

CONTENTS

P RT III

ĀNOBHADRĪYA HYMN

The hymn beginning with *ā no bhadrāḥ kratavo yantu viśvataḥ* is one of the most inspiring hymns in the Vedas. The moral of the hymn may be mentioned here. The devotee must never forget that "it is vanity to wish to live long, and to be careless to live well." Our life must not be swayed by impulses and passions, but we must live a godly life and "endeavour to conquer ourselves, and daily to grow stronger and make a further progress in holiness" (देवानां सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे). Enjoyment is not to be shunned, we should enjoy life to its fullest extent, but the enjoyment must be that of the Gods and not that of brutes, it must never transgress *Dharma*, it must always be धर्माविरुद्ध (कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः—ईशोपनिषद्, धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स जनो जघन्यः—महाभारतम्).

The last stanza in which Aditi is identified not only with all the Gods but with nature as well, with all that has been and shall be born, gives a poetic statement of the pantheistic idea which is characteristic of the Vedas. It reminds one forcibly of the Egyptian Goddess Neith, the Great Mother, at one of whose temples in the ancient city of Sais was inscribed in Greek:

Egō eimi pan to gegonos kai on kai esomenon kai ton emon peplon oudeis pō thnētos apekalupsen.

'I am all that is and that was and that shall be, and no mortal hath lifted my veil.'

It is interesting to note in this connexion that though the conception of the Earth as a mother and of Heaven as a father (*Voc.* Skt. *Dyauṣ pitar*, Gk. *Zeú pater*, Lat. *Jūpiter*) as found in stanza 4 of our hymn (तन्माता पृथिवी तत् पिता द्यौः) is common

to Vedic and Greek mythology, the Egyptians regarded the earth as male and the sky as female.

This hymn with five commentaries, critically edited by K. C. Chatterjee, has been published from the Mañjūṣā office.

Hymn No. 12

म० १ i. 89 सू० ८९

गोतम ऋषिः। विश्वे देवा देवताः। १-५, ७ जगत्यः ६ विराट्स्थाना. ८-१० त्रिष्टुभः

1

आ नो भद्राः क्रतवो यन्तु विश्वतो-	आ। नः। भद्राः। क्रतवः। यन्तु। विश्वतः।
ऽदब्धासो अपरीतास उद्भिदः।	अदब्धासः। अपरिऽइतासः। उत्ऽभिदः।
देवा नो यथा सदमिद्वृधे अस-	देवाः। नः। यथा। सदम्। इत्। वृधे। असन्।
न्नप्रायुवो रक्षितारो दिवेदिवे ॥१॥	अप्रऽआयुवः। रक्षितारः। दिवेऽदिवे ॥१॥

May auspicious powers or good thoughts (*bhadrā'ḥ krátavaḥ*) come (*ā' yantu*) to us (*naḥ*) from every quarter (*viśv'ataḥ*)—infallible (*ádabdhāsaḥ*), unhindered (*áparītāsaḥ*), forcing their way through [all obstacles] (*udbhidaḥ*), so that (*yáthā*) the Gods (*devā'ḥ*) may always (*sádam it*) be (*ásan*) for our increase (*vṛdhé*)—unceasing (*áprāyuvaḥ*) protectors (*rakṣitā'raḥ*) day by day (*divé-dive*).

वेङ्कटमाधव-व्याख्यानम्। आयन्तु [नः] अस्मान् [विश्वतः] सर्वतः [भद्राः क्रतवः] भजनीयानि कर्माणि [अदब्धासः] असुरैरहिंसितानि [अपरीतासः] अपरिवृतानि च [उद्भिदः] फलोद्भेदनानि। देवाः यथा [नः] अस्माकम् [सदमित्] सदैव [वृधे] वर्धनाय [असन्] स्युः [अप्रायुवः] अप्रगच्छन्तः रक्षितारः च [दिवेदिवे] अहन्यहनि ॥१॥

सायणभाष्यम्। आ नो भद्रा इति दशर्चं पञ्चमं सूक्तं गोतमस्यार्षं वैश्वदेवम्। आदितः पञ्चर्चः सप्तमी च जगत्यः, षष्ठी स्वस्ति न इन्द्र इत्येषा

विराट्स्थाना। "नवकौ वैराजस्त्रैष्टुभश्च"[1] [अनु० ९।५] इत्युक्तलक्षणयोगात्। *अष्टम्याद्यास्तिस्रस्त्रिष्टुभः। तथा चानुक्रान्तम्। "आ नो दश वैश्वदेवं तु पञ्चाद्याः सप्तमी च जगत्यः षष्ठी विराट्स्थाना" इति। अग्निष्टोमे[2] वैश्वदेवशस्त्र उत्तमावर्जमेतत्सूक्तं वैश्वदेवनिविद्धानीयम्। सा तु प्रकृतौ विकृतौ च वैश्वदेवशस्त्रस्य परिधानीया। तथा च सूत्रितम्। "आ नो भद्राः क्रतवो यन्तु विश्वत इति नव वैश्वदेवम्" [आ० श्रौ० सू० ५।१८।५] इति। "अदितिर्द्यौरदितिरन्तरिक्षमिति परिदध्यात्सर्वत्र वैश्वदेवे" [आ० श्रौ० सू० ५।१८।१२] इति च। ब्राह्मणं च भवति। "सदैव पञ्चजनीयया परिदध्यात्" [ऐ० ब्रा० १३।७] इति। महाव्रते निष्केवल्य एतत्सूक्तम्। तथा च पञ्चमारण्यके सूत्र्यते। "आनोभद्रीयं च तस्य स्थाने"[3] [ऐ० आ० ५।३।२] इति।

नः अस्मान् क्रतवः अग्निष्टोमादयो महायज्ञा विश्वतः सर्वस्मादपि दिग्भागाद् आयन्तु आगच्छन्तु। कीदृशाः क्रतवः? भद्राः समीचीनफलसाधनत्वेन कल्याणा भजनीया वा। अदब्धासः असुरैरहिंसिताः। अपरीतासः

[1] नवकौ वैराजस्त्रैष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराट्स्थाना इति समग्रं सूत्रम्। व्याख्यातं चेदं षड्गुरुशिष्येण—यस्या नवाक्षरौ पादौ तृतीयो दशकस्तथा। एकादशाक्षरोऽन्यश्च विराट्स्थाना तु सा मता॥ यस्या दशाक्षरावाद्यौ तृतीयश्च नवाक्षरः। एकादशाक्षरश्चान्त्यो विराट्स्थानेव सापि च॥

* संज्ञापूरण्योश्च [६।३।३८] इति पुंवद्भावप्रतिषेधः।

[2] अग्निष्टोमो वर्णितः। तस्य तृतीये सवने वैश्वदेवमाग्निमारुतं चेति शस्त्रद्वयम्। तत्र वैश्वदेवशस्त्रे आ नो भद्रा इति सूक्तं शंसनीयम्, अन्तिमां च ऋचं वर्जयित्वेतरास्वृक्षु विश्वेषां देवानां स्तुतिवाचकानि निवित्पदानि पठनीयानीति सूक्तं निविद्धानीयमित्युच्यते। यस्मिन् याग इतिकर्तव्यतोपदिष्टा यागान्तरेणोपजीव्यते सा प्रकृतिः। येनोपजीव्यते सा विकृतिः। उभयविधेऽपि यागे अदितिर्द्यौरदितिरन्तरिक्षमित्यन्तिमया ऋचा वैश्वदेवशस्त्रं समाप्यते। समाप्त्यर्था च ऋक् परिधानीयेत्युच्यते।

[3] गवामयनसत्रस्योपान्त्यमहर्महाव्रतमिति व्यपदिश्यते। तत्र च माध्यन्दिनसवने मरुत्वतीयं निष्केवल्यं चेति शस्त्रद्वितयं भवति। तत्र प्रेङ्खामारुह्य निष्केवल्यं शस्त्रं शंसनीयम्। तत्र आ नो भद्रेति सूक्तं शंसनीयम् तथाचैतरेयारण्यकस्यान्तिम आरण्यके सूचितम्—आनोभद्रीयं च तस्य स्थान इति। अभिप्लवषडहे यत् षष्ठमहस्तस्मान्महाव्रतनामकेऽह्नि तृतीयसवनमतिदेष्टव्यम्। केवलं तस्य निविद्धानसूक्तस्य स्थाने अस्य वामस्येत्येतदानोभद्रीयं चेत्येतदुभयं पठनीयमित्यर्थः। १५४-पृष्ठं द्रष्टव्यम्।

शत्रुभिरपरिगताः। अप्रतिरुद्धा इत्यर्थः। उद्भिदः शत्रूणामुद्भेत्तारः। ईदृशाः क्रतवोऽस्मांस्तथागच्छन्तु। अप्रायुवः अप्रगच्छन्तः स्वकीयं रक्षितव्यमपरित्यजन्तः अत एव दिवेदिवे प्रतिदिवसं रक्षितारः रक्षां कुर्वन्तः। एवंगुणविशिष्टाः सर्वे देवाः नः अस्माकं सदम् इत् सदैव वृधे वर्धनाय यथा असन् भवेयुस्तथा-गच्छन्त्विति सम्बन्धः*। अदब्धासः। दम्भु दम्भे [धा° ५।२४]। दम्भो हिंसा। निष्ठायां "यस्य विभाषा" [७।२।१५] इतीट्प्रतिषेधः। नञ्समासेऽव्ययपूर्वपद-प्रकृतिस्वरत्वम्। अपरीतासः। इण् गतौ [धा° २।३५]। पूर्ववत्कर्मणि निष्ठा। उभयत्र "आज्जसेरसुक्" [७।१।५०]। वृधे। वृधु वृद्धौ [धा° १।७४७] सम्पदादि-लक्षणो भावे क्विप्। "सावेकाचः०" [६।१।१६८] इति विभक्तेरुदात्तत्वम्। असन्। अस भुवि [धा° २।५४]। लेटयडागमः। "बहुलं छन्दसि" [२।४।७३] इति शपो लुगभावः। तस्याङित्त्वात् "श्नसोरल्लोपः" [६।४।१११] इत्यकारलोपाभावः। अप्रायुवः। इण् गतौ [धा° २।३५]। अस्मात्प्रपूर्वात् "छन्दसीणः" [उ० १।२] इत्युण्प्रत्ययः। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वम्। जसि "जसादिषु छन्दसि वावचनम्" [७।३।१०९।१] इति गुणस्य विकल्पित-त्वादभावे† तन्वादित्वादुवङ् [६।४।७७।१] ॥१॥

भद्राः—See pp. 46, 102, 105, 130. क्रतवः—See p. 42.

अदब्धासः—In the Dhātupāṭha we find दम्भु दम्भे, but we are none the wiser for the explanation. The printed Mādhavīya Dhātuvṛtti reads दम्भु दम्भने and adds दम्भो लोकार्जवार्थमेव कर्मानुष्ठानम्. Probably the correct reading is दम्भु दम्भे। दम्भो लोकावर्जनार्थमेव कर्मानुष्ठानम्। Kṣīrasvāmin and Maitreya Rakṣita read दम्भु दम्भे but do not vouchsafe any explanation. Bhaṭṭoji reads दम्भने. As दम्भ is generally used in the sense of 'fraud', 'hypocrisy[1]' दम्भे in the Dhātupāṭha

---

* This is found only in a few MSS. and is rather cumbrous. यथा might have been placed before अप्रायुवः. Max Müller reads: वृधे वर्धनायासन् भवन्तु. In that case S. missed यथा.

† विकल्पितत्वात्तदभावे is more usual.

[1] *Cf.* इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः॥

probably means 'deception'. And *dab* in the Avesta is used in the sense of 'deceiving'. *Davāiθyāo* means 'of the deceiver'. The Greek verb *atembō* means to maltreat, to afflict, to perplex; passive with gen., to be bereft or cheated of a thing. In the Nighaṇṭu दभ्नोति is read in the list of गतिकर्मक and वधकर्मक roots. The original meaning of the root, therefore, seems to have been to harm with guile, then, on the one hand, to kill and on the other, to deceive. In RV. i. 25. 14:

न यं दिप्सन्ति दिप्सवो न द्रुह्वाणो जनानाम्।
न देवमभिमातयः॥

it is just possible that both the senses are present—'whom deceivers do not wish to *deceive*, whom those who hurt people do not seek to *hurt*, the God whom those who lie in wait cannot harm'.

असन्—"बहुलं छन्दसि" इति शपो लुगभावः S. In लेट् we get the proper Vikaraṇa. अस् being an अदादि root, the Vikaraṇa is *o*. But if there be no Vikaraṇa, then अस् will be changed into भू acc. to अस्तेर्भूः ii. 4. 52 before the modal sign of the subjunctive, *i.e.*, अट् which is Ārdhadhātuka, being neither तिङ् nor शित्. The easier course would have been to invoke the aid of छन्दस्युभयथा iii. 4. 117. Under RV. i. 9. 5 S. says: अस भुवि। लेट्। तिप्। इतश्च लोप इतीकारलोपः। लेटोऽडाटावित्यडागमः। अदिप्रभृतिभ्यः शपः इति शपो लुक्। आगमा अनुदात्ता इत्यटोऽनुदात्तत्वाद् धातुस्वर एव। The अ of शप् and the अ of अट् evidently coalesce into अ according to अतो गुणे vi. 1. 97, if the Vikaraṇa is retained. Under i. 57. 2 S. says: असतेर्लेटि बहुलं छन्दसीति शपो लुगभावः !!! The verb is accented in connexion with यथा. यावद्यथाभ्याम् viii. 1. 36.

अप्रायुवः—S. follows the Padapāṭha but the change of उ to उव् presents difficulties. Skandasvāmin, Haradatta and others have proposed alternative derivations from *yu* also. Similarly, acc.

तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते।
उत्तरस्तु चतुर्वर्गो महात्मन्येव तिष्ठति॥

to Western scholars *aprā-yu* 'assiduous' is from *yu* to separate, keep away (Macdonell, *Vedic Grammar*, p. 292, f. n. 13). In that case we may say: अनित्यमागमशासनम् इति तुकोऽभावः। सर्वे विधयश्छन्दसि विकल्प्यन्त इति वा, क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति वा अचि श्नुधातुभ्रुवामित्युवङ्, न पुनरोः सुपीति यण्। यद्वा छन्दस्युभयथा [६।४।८६] इति सूत्रेण सर्वत्रैव छन्दसि इयङुवङोर्यणश्च विकल्पो भवति. Macdonell has missed *aprāyuvaḥ*. Wackernagel (*Alt-indische Grammatik* Vol. III) says: Nouns with radical or apparently radical *i* and *u* are declined almost throughout like derivative *i* and *u* stems, occasionally, however, like the radical nouns in *ī*|*iy*, *ū*|*uv* (section 66, b); and from *yu* to drive, move (*yuyoti*) he quotes *aṁhoyuvaḥ* 'pressed hard,' *aprāyuvaḥ* 'not lazy'. अप्रायुभिः occurs in viii. 24. 18 and its neut. form अप्रायु in v. 80. 3. अप्रायु (like हृतव and रघुद्रु) was probably originally an *ū*-stem which shows the *u* of the root before consonantal endings (Wackernagel, A. G. III, p. 196). For the lengthening of the upasarga, *cf.* प्रावृष्, प्रावेप etc.

दिवेदिवे—See p. 35

2

देवानां भद्रा सुमतिर्ऋजूयतां	देवानाम् । भद्रा । सुऽमतिः । ऋजुऽयताम् ।
देवानां रातिरभि नो नि वर्तताम् ।	देवानाम् । रातिः । अभि । नः । नि । वर्तताम् ।
देवानां सख्यमुप सेदिमा वयं	देवानाम् । सख्यम् । उप । सेदिम । वयम् ।
देवा न आयुः प्र तिरन्तु जीवसे ॥२॥	देवाः । नः । आयुः । प्र । तिरन्तु । जीवसे ॥२॥

May the gracious (*bhadrā'*) good will (*sumatiḥ*) of the righteous (*ṛjūyatā'm*) Gods (*devā'nām*) come upon us; may the bounty (*rātiḥ*) of the Gods (*devā'nām*) descend upon (*abhi ni vartatām*) us (*naḥ*); we (*vayám*) have won (*úpa sedima*) the friendship (*sakhyám*) of the Gods (*devā'nām*); may the Gods (*devā'ḥ*) extend (*prátirantu*) our (*naḥ*) days (*ā'yuḥ*) that we may live (*jīvase*).

वेङ्कटमाधवव्याख्यानम्। देवानां [भद्रा] भजनीया सुमतिः [ऋजूयताम्] ऋजुमिच्छताम् देवानाम् [रातिः] दानम् [नः] अस्मान् अभिनिवर्तताम्। देवानाम् सख्यम् [उपसेदिम] उपगच्छेम वयम्। देवा नः आयुः [प्रतिरन्तु] वर्धयन्तु [जीवसे] जीवनाय ॥२॥

सायणभाष्यम्। भद्रा सुखयित्री भजनीया वा देवानां सुमतिः शोभना मतिरनुग्रहात्मिका बुद्धिरस्माकमस्त्विति शेषः। कीदृशानाम्? ऋजूयताम् ऋजुमार्जवयुक्तं सम्यगनुष्ठातारं यजमानमात्मन इच्छताम्। तथा देवानां रातिः दानं नः अस्मान् अभिनिवर्तताम् आभिमुख्येन नितरां वर्तताम्। तदभिमतफलप्रदानमप्यस्माकं भवत्वित्यर्थः। वयम् च तेषां देवानाम् सख्यम् सखित्वं सख्युः कर्म वा उपसेदिम प्राप्नवाम*। तादृशा देवाः नः अस्माकम् आयुः जीवसे जीवितुं प्रतिरन्तु वर्धयन्तु। भद्राः। भदि कल्याणे सुखे च [धा° १।१२]। "ऋज्रेन्द्राग्र०" [उ० २।३१] इत्यादौ रक्प्रत्ययान्तो निपातितः। ऋजूयताम्। ऋजुमात्मन इच्छति ऋजूयति†। "सुप आत्मनः क्यच्" [३।१।८]। तदन्ताल्लटः शतृ[1]। "शतुरनुमः०" [६।१।१७३] इत्यजादिविभक्तेरुदात्तत्वम्। रातिः। रा दाने [धा° २।४७]। "मन्त्रे वृष०" [३।३।९६] इति क्तिन उदात्तत्वम्। सख्यम्।

---

* The printed editions have प्राप्नवाम. This is an interesting instance of contamination, being a blend of प्राप्नवाम and प्राप्नवाम. In view of the fact that in the previous and subsequent clauses we have the Imperative, I am inclined to think that प्राप्नवाम is the correct reading here. It is a thousand pities that later editors have often blindly followed Max Müller instead of exercising their own judgment.

† In such cases it is usual to use the number of the word to be explained. See Mahīdhara-bhāṣya (आनोभद्रीयम् p. 10). Should we read ऋजुमात्मन इच्छन्ति ऋजूयन्ति ?

[1] शतृ is neut. here. Bengali writers generally use शता. It is usual to write शतृप्रत्ययः in such cases.

"सख्युर्यः" [५।१।१२६] इति भावे कर्मणि वा यप्रत्ययः[1]। सेदिम। षद्लृ विशरणगत्यवसादनेषु [धा° १।८३९]। "छन्दसि लुङ्लङ्-लिटः" [३।४।६] इति वर्तमाने प्रार्थनायां लिट्। सत्वस्यानैमित्तिकत्वेन[2] लिटि परत आदेशादित्वाभावाद् "अत एकहल्मध्ये०" [६।४।१२०] इत्येत्वाभ्यासलोपौ। "अन्येषामपि दृश्यते" [६।३।१३७] इति संहितायां दीर्घत्वम्। प्रतिरन्तु। प्रपूर्वस्तिरतिर्वर्धनार्थः। तथा च यास्को व्याचख्यौ। "देवानां सख्यमुपसीदेम वयं देवा न आयुः प्रवर्धयन्तु चिरं जीवनाय" [नि० १२।३९] इति ॥२॥

The first half may be regarded as one sentence thus: देवानां भद्रा सुमतिः, ऋजूयतां देवानां रातिः [च] नः अभि नि वर्तताम्. In the second half उपसेदिम need not be taken in the sense of लिङ्. It is the perfect indicative—*we have won the friendship of the Gods* (by our noble way of life), and so we can hope that the Gods will prolong our lives.

ऋजूयताम्—Gen. pl. of the pres. part. of the denom. of ऋजु Av. *ərəzu*, superl. *rajiṣṭha*, Av. *raziśta*. *Cf.* Eng. *right*. The opp. of *ṛju* is *vṛjina* crooked, wrong.

सख्यम्—abstract noun from सखि (p. 302), formed with *-ya* without initial vṛddhi like दूत्य and वणिज्य.

सेदिम—metrical lengthening. *sad-sad-i-ma*>*sa-sad-i-ma*> *sa-sd-i-ma*>*sazdima*>*sedima*. I.E. *az* was represented in Skt. by *e* as in *edhi* for *az-dhi*. From *sa-zd* (Av. *hazd*) the vowel *e* was extended by Analogy to पच्, पत् etc. *Cf.* Pāṇini's rule अत एकहल्मध्येऽनादेशादेर्लिटि vi. 4. 120.

Skt. *sīdati* for (**sīḍati*<*si-zd-a-ti*<*si-sad-a-ti*), Av. *hiδaiti*, Gk. *hizdō*, Lat. *sīdo*, Eng. *sit*.

प्रतिरन्तु—तॄ to cross is भ्वादि, तुदादि and तनादि in the Vedas, and so we can easily have तिरति like किरति. प्र-तिरति means to

[1] Hence S. has said above सखित्वं सख्युः कर्म वा.

[2] This is based on the *Kāśikā*: अनैमित्तिके शत्वसत्वे, तदादि-लिंग्यादेशादिर्न भवति।

increase, to prolong. सावर्णदेवाः प्र तिरन्त्वायुः RV. x. 62. 11, आप ओषधीः प्र तिरन्तु नो गिरः RV. x. 66. 10. See p. 314.

जीवसे—dat. inf. of जीव् to live. See V.G.S. § 211. Skt. *jīva-*, O.P. *jīva-*, Av. *jva*, Lat. *vīvu-s*, Gk. *bios* life, Eng. *quick* (as in 'the quick and the dead' quicklime, quicksilver etc.)

3

तान्पूर्वया निविदा हूमहे वयं	तान् । पूर्वया । निऽविदा । हूमहे । वयम् ।
भगं मित्रमदितिं दक्षमस्रिधम् ।	भगम् । मित्रम् । अदितिम् । दक्षम् । अस्रिधम् ।
अर्यमणं वरुणं सोममश्विना	अर्यमणम् । वरुणम् । सोमम् । अश्विना ।
सरस्वती नः सुभगा मयस्करत् ॥३॥	सरस्वती । नः । सुऽभगा । मयः । करत् ॥३॥

We (*vayám*) invoke (*hūmahe*) them (*tā'n*) with an old (*pū'rvayā*) hymn (*nividā*)—Bhaga (*Bhágam*), Mitra (*Mitrám*), Aditi (*A'ditim*), Dakṣa (*Dákṣam*), the unerring or friendly (*asrídham*), Aryaman (*Aryamáṇam*), Varuṇa (*Váruṇam*), Soma (*Sómam*) and the two Aśvins (*Aśvinā*); may the gracious (*su-bhágā*) Sarasvatī (*Sárasvati*) grant (*karat*) us (*naḥ*) happiness (*máyaḥ*).

वेङ्कटमाधवव्याख्यानम् । तान् पूर्वया [निविदा] वाचा [हूमहे] ह्वयामः वयम् भगादीन् दक्षं च [अस्रिधम्] अक्षयम् । सरस्वती च [नः] अस्माकं सुभगा [मयः] सुखम् [करत्] करोतु ॥३॥

सायणभाष्यम् । तान् विश्वान्देवान् पूर्वया पूर्वकालीनया* नित्यया निविदा वेदात्मिकया वाचा । निविदिति वाङ्नाम । यद्वा निविदा "विश्वे देवाः सोमस्य मत्सन्" [शां० श्रौ० सू० ८।२१।१] इत्यादिकया वैश्वदेव्या निविदा वयम् हूमहे आह्वयामः । देवानिति यत्सामान्येनोक्तं तदेव विव्रियते । भगम् भजनीयं

* This is grammatically indefensible but sanctioned by usage.

द्वादशानामादित्यानामन्यतमम्। मित्रम् प्रमीतेस्त्रायकम् अहरभिमानिनं देवम्। "मैत्रं वा अहः" [तै० ब्रा० १।७।१०।१] इति श्रुतेः। अदितिम् अखण्डनीयामदीनां वा देवमातरम्। दक्षम् सर्वस्य जगतो निर्माणे समर्थं प्रजापतिम्। यद्वा प्राणरूपेण सर्वेषु प्राणिषु व्याप्य वर्तमानं हिरण्यगर्भम्। "प्राणो वै दक्षः" [तै° सं° २।५।२।४] इति श्रुतेः। अस्रिधम् शोषणरहितम्। सर्वदैकरूपेण वर्तमानं मरुद्गणम्। अर्यमणम्। अरीन् मन्देहादीनसुरान्यच्छति नियच्छतीत्यर्यमा सूर्यः। "असौ वा आदित्योऽर्यमा" [तै० सं० २।३।४।१] इति श्रुतेः। तम्। वरुणम्। वृणोति पापकृतः स्वकीयैः पाशैरावृणोतीति रात्र्यभिमानी देवो वरुणः। श्रूयते च। "वारुणी रात्रिः" [तै० ब्रा० १।७।१०।१] इति। सोमम्। द्वेधात्मानं विभज्य पृथिव्यां लतारूपेण दिवि च चन्द्रात्मना देवतारूपेण वर्तमानम्। अश्विना। अश्ववन्तौ। यद्वा सर्वं व्याप्नुवन्तौ। तथा च यास्कः। "अश्विनौ यद्व्यश्नुवाते सर्वं रसेनान्यो ज्योतिषान्यः। अश्वैरश्विनावित्यौर्णवाभः। तत्कावश्विनौ ? द्यावापृथिव्यावित्येकेऽहोरात्रावित्येके सूर्याचन्द्रमसावित्येके राजानौ पुण्यकृतावित्यैतिहासिकाः" [नि० १२।१] इति। एवम्भूतान् सर्वान्देवानस्मद्रक्षणार्थमाह्वयाम इति पूर्वत्र सम्बन्धः। अस्माभिराहूता सुभगा शोभनधनोपेता सरस्वती नः अस्मभ्यं मयः सुखं करत् करोतु। हूमहे। ह्वेञो लटि "ह्वः" इत्यनुवृत्तौ "बहुलं छन्दसि" [६।१।३४] इति संप्रसारणम्। परपूर्वत्वे "हलः" [६।४।२] इति दीर्घत्वम्। "बहुलं छन्दसि" [२।४।७३] इति शपो लुक्। अस्रिधम्। स्रिधु शोषणे[1]। सम्पदादिलक्षणो भावे क्विप्। बहुव्रीहौ "नञ्सुभ्याम्" [६।२।१७२] इत्युत्तरपदान्तोदात्तत्वम्। मयस्करत्। करोतेर्लेट्यडागमः। "बहुलं छन्दसि" [२।४।७३] इति विकरणस्य लुक्। "अतः कृकमि०" [८।३।४६] इति विसर्जनीयस्य सत्वम् ॥३॥

अस्रिधम्—*sridh* is a very ancient root occurring in RV. स्रेधति slips, glides, blunders. Gk. *holisthō* slips. *Cf*. Eng. *slide*.

---

[1] स्रिधु शोषणे is not found in the Pāṇinīya Dhātupāṭha. Under i. 3. 9 S. says: स्रिधेः वधार्थस्य शोषणार्थस्य वा, under i. 13. 9 he says: स्रिधेर्हिंसार्थस्य शोषणार्थस्य वा.

मयः—is read in the list of सुखनामन्'s in the *Nighaṇṭu* (iii.6) and means gladness, joy. मयोभू means conducive to gladness, beneficent.

ॐ

तन्नो वातो मयोभु वातु भेषजं	तत् । नः । वातः । मयःऽभु । वातु । भेषजम् ।
तन्माता पृथिवी तत्पिता द्यौः ।	तत् । माता । पृथिवी । तत् । पिता । द्यौः ।
तद् ग्रावाणः सोमसुतो मयोभुव-	तत् । ग्रावाणः । सोमऽसुतः । मयःऽभुवः ।
स्तदश्विना शृणुतं धिष्ण्या युवम् ॥४॥	तत् । अश्विना । शृणुतम् । धिष्ण्या । युवम् ॥४॥

May the wind (*vā'taḥ*) waft (*vātu*) to us (*naḥ*) that (*tát*) wholesome (*mayo-bhú*) medicine (*bheṣajám*), may Mother Earth (*mātā' pṛthivī'*) convey it (*tát*) to us, may father Heaven (*pitā Dyáuḥ*) convey it (*tát*) to us, may the beneficial (*mayo-bhúvaḥ*) soma-pressing (*soma-sútaḥ*) stones (*grā'vāṇaḥ*), convey it to us. O ye wise (*dhiṣṇyā*) Aśvins (*Aśvinā*), you two (*yuvám*) listen (*śṛṇutam*) to it (*tát*).

वेङ्कटमाधवव्याख्यानम् । तत् नः वातः [मयोभु] सुखस्य भावयितृ आत्मीयं भेषजम् वातु । तत् माता पृथिवी तत् पिता द्यौः । तत् ग्रावाणः [सोमसुतः] सोमस्य सोतारः [मयोभुवः] सुखस्य भावयितारः । तत् [अश्विना] अश्विनौ [युवम्] युवामपि [धिष्ण्या] धिषणार्हौ स्तुत्यर्हौ शृणुतम् ॥४॥

सायणभाष्यम् । वातः वायुः तत् भेषजम् औषधं नः अस्मान् वातु प्रापयतु । यद्भेषजं मयोभु मयसः सुखस्य भावयितृ । माता सर्वेषां जननी पृथिवी भूमिरपि तत् भेषजमस्मान्प्रापयतु । पिता वृष्टिप्रदानेन सर्वेषां रक्षिता द्यौः द्युलोकोऽपि तत् भेषजमस्मान्प्रापयतु । सोमसुतः सोमाभिषवं कृतवन्तो मयोभुवः मयसो यागफलभूतस्य सुखस्य भावयितारो ग्रावाणः अभिषवसाधनाः[1] पाषाणाश्च तत्

[1] See p. 122.

भेषजमस्मान् प्रापयन्तु । हे धिष्ण्या धिषणा बुद्धिः । तदर्हौ अश्विनौ युवम् युवां तत् भेषजं शृणुतम् आकर्णयतम् । यद्भेषजमस्माभिर्वाय्वादिषु[1] प्रार्थ्यते तद्भेषजं देवानां भिषजौ युवामस्माकमनुकूलं यथा भवति तथा जानीतमित्यर्थः । मयोभु । "ह्रस्वो नपुंसके प्रातिपदिकस्य" [१।२।४७] इति ह्रस्वत्वम् । वातु । वा गतिगन्धनयोः [धा° २।४०] । अन्तर्भावितण्यर्थात्प्रार्थनायां लोट् । सोमसुतः । "सोमे सुञः" [३।२।९०] इति भूते क्विप् । धिष्ण्या । धिषणाशब्दादर्हार्थे "छन्दसि च" [५।१।६७] इति यः । वर्णलोपश्छान्दसः । "सुपां सुलुक्०" [७।१।३९] इत्याकारः ॥४॥

युवम्—In RV. AV. etc. युवम् is the nom. du., while युवाम् is the acc. du. युष्मच्छब्दस्य प्रथमाद्विवचनस्य ङे प्रथमयोरम् [७।१।२१] इत्यमादेशः । 'युवावौ द्विवचने [७।२।९२] इति मपर्यन्तस्य युवादेशः । शेषे लोपः [७।२।९०] इति टिलोपोऽन्त्यलोपो वा । अमि पूर्वत्वम् । भाषायामेव आत्वम् । टिलोपपक्षे उदात्तनिवृत्तिस्वरेणाम उदात्तत्वम् । अन्त्यलोपपक्षे एकादेश उदात्तः । S. under i. 15. 6. See notes on i. 116. 7 in our *Selections*.

5

तमीशानं जगतस्तस्थुषस्पतिं
धियंजिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे
रक्षिता पायुरदब्धः स्वस्तये ॥५॥

तम् | ईशानम् | जगतः | तस्थुषः | पतिम् ।
धियम्ऽजिन्वम् | अवसे | हूमहे | वयम् ।
पूषा | नः | यथा | वेदसाम् | असत् | वृधे ।
रक्षिता | पायुः | अदब्धः | स्वस्तये ॥५॥

Him (*tám*), the ruler (*ī'śānam*) of all that moves (*jágataḥ*), the master (*pátim*) of all that stands (*tasthúṣaḥ*), the inspirer of thoughts (*dhiyaṁ-jinvám*) we (*vayám*) invoke (*hūmahe*) for our protection (*ávase*) so that (*yáthā*) Pūṣā (*Pūṣā'*) may help (*ásat*) in the increase (*vṛdhé*) of our possessions (*naḥ védasām*), our protector (*rakṣitā'*) and guard infallible (*pāyúḥ ádabdhaḥ*) for our well-being (*svastáye*).

---

[1] आधारविवक्षायां सप्तमी ।

वेङ्कटमाधवव्याख्यानम्। तम् [ईशानम्] ईश्वरम् [जगतः] जङ्गमस्य [तस्थुषः] स्थावरस्य च [पतिम्] पालयितारम् [धियंजिन्वम्] कर्मणः प्रीणयितारम् [अवसे] रक्षणाय [हूमहे] ह्वयामः वयम्। पूषा [नः] अस्माकम् [वेदसाम्] धनानाम् [असत्] भवति* यथा [वृधे] वर्धनाय। रक्षोभ्यो रक्षिता [पायुः] पालकः [अदब्धः] अहिंसितः [स्वस्तये] अविनाशाय ॥५॥

सायणभाष्यम्। पूर्वार्धेनेन्द्रः स्तूयते, अपरार्धे न पूषा। ईशानम् ऐश्वर्यवन्तम्। अत एव जगतः जङ्गमस्य प्राणिजातस्य तस्थुषः स्थावरस्य च पतिम् स्वामिनं धियंजिन्वम् धीभिः कर्मभिः प्रीणयितव्यम्। एवंभूतं तम् इन्द्रम् अवसे रक्षणाय वयं हूमहे आह्वयामः। पूषा नः अस्माकं वेदसाम् धनानां वृधे वर्धनाय रक्षिता यथा असत् येन प्रकारेण भवति तेनैव प्रकारेण अदब्धः केनाप्यहिंसितः पूषा स्वस्तये अस्माकमविनाशाय पायुः रक्षिता भवतु ॥ तस्थुषः। तिष्ठतेर्लिटः क्वसुः। षष्ठ्येकवचने "वसोः संप्रसारणम्" [६।४।१३१] इति संप्रसारणम्। "शासिवसिघसीनां च"[1] [८।३।६०] इति षत्वम्। "षष्ठ्याः पतिपुत्र०"

---

* Should we read भवेत् ?

[1] The rule for the mutation of the dental sibilant into the cerebral is आदेशप्रत्यययोः viii. 3. 51. Sāyaṇa, however, often quotes शासिवसिघसीनां च in this connexion. The preceding शासि and the following घसि are enough to show that वसि here does not refer to the suffix *kvasu* but to the root *vas*. Further the suffix is always referred to as *vasu* and not *vasi*. But the most important point in this connexion is that in the case of *kvasu* which is a pratyaya the षत्व is already provided for by the rule आदेशप्रत्यययोः, and so no useful purpose would be served by the inclusion of *vas* for *kvasu* in शासिवसिघसीनां च. See p. 93 f. n. There appears to be some misconception regarding the meaning of the Vārttika इक्श्तिपौ धातुनिर्देशे. Here इक् is evidently the pratyāhāra denoting i, u, ṛ, ḷ—short or long.

[८।३।५३] इति विसर्जनीयस्य सत्वम् । धियंजिन्वम् । जिविः प्रीणनार्थः[1] । "कृत्यल्युटो बहुलम्" [३।३।११३] इति बहुलवचनात्खच् । "इच एकाचोऽम् प्रत्ययवच्च" [६।३।६८] इत्यमागमः । असत् । अस भुवि [धा° २।५५] । लेटयडागम । "बहुलं छन्दसि" [२।४।७३] इति शपो लुगभावः । पायुः । पा रक्षणे [धा° २।४।६] "कृवापाजि०" [उ० ११।१] इत्युण् । स्वस्तये । सुपूर्वादस्तेर्भावे क्तिन् । "छन्दस्युभयथा" [३।४।११७] इति तस्य सार्वधातुकत्वाद् "अस्तेर्भूः" [२।४।५२] इति भूभावाभाव इति वृत्तावुक्तम्[2] ॥५॥

परिष्कारः । पूर्वार्धेनेन्द्रः स्तूयतेऽपरार्धेन पूषेति । "इन्द्रो यातोऽवसितस्य राजा" [ऋ° सं° १।३२।१५] इत्यादिश्रुतेः पूर्वार्धस्येन्द्रदेवताकत्वं भाष्यकारस्याभिमतम् । परं पूष्णोऽपीशानत्वश्रवणात्,

अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने विश्वे अर्पितः ।
अष्ट्रां पूषा शिथिरामुद्वरीवृजत् सञ्चक्षाणो भुवना देव ईयते ॥

[ऋ० सं० ६।५८।२] इति पूषदेवताकेऽपि मन्त्रे धियंजिन्वविशेषणसन्दर्शनाच्चास्यापि पूषदेवताकत्वमवसीयते ॥ "कृत्यल्युटो बहुलम्" इति सूत्रतः बहुलमिति पदमुत्तरसूत्रेष्वनुवर्तते । तेन सर्वेऽपि कृत्प्रत्यया बाहुल्येन भवन्ति, येषु धातुषु विहितास्ततोऽन्यत्रापि भवन्ति । "नासिकास्तनयोर्ध्माधेटोः" [३।२।२९] इति वर्तते । धोविश्वयोर्जिन्वेन्वोरपि भवति ॥५॥

धियंजिन्वम्—"The accusative form is common when the final member is formed from a present stem, owing to the close connexion of such verbal nouns with the verb: e. g. उग्रम्पश्य 'looking fiercely', माम्पश्य 'looking at me' For the root see p. 221.

अवसे—See p. 182. Lat. *ave* hail!

हमहे—1. pl. pr. Ātm. of (भ्वादिगणीय) ह्व toi nvoke; class. आह्वयामहे.

---

[1] हिविदिविधिविजिवि प्रीणनार्थाः [धा० १।५८३-५८६] ।

[2] The reference is to *Kāśikā* iii. 4. 117 where we find: स्वस्तये भावमिवावक्षिम । क्तिन: [क्तिच: ?] सार्वधातुकत्वादस्ते र्भूभावो न भवति । *Cf. Nir.* iii. 21 : अस्तिरभिपूजितः । सु अस्तीति ।

6

स्वस्ति न इन्द्रो वृद्धश्रवाः	स्वस्ति । नः । इन्द्रः । वृद्धऽश्रवाः ।
स्वस्ति नः पूषा विश्ववेदाः ।	स्वस्ति । नः । पूषा । विश्वऽवेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः	स्वस्ति । नः । तार्क्ष्यः । अरिष्टऽनेमिः ।
स्वस्ति नो बृहस्पतिर्दधातु ॥६॥	स्वस्ति । नः । बृहस्पतिः । दधातु ॥६॥

May Indra (*I'ndraḥ*) famed far and wide (*vṛddháśravāḥ*) bestow (*dadhātu*) well-being (*svasti*) on us (*naḥ*); may Pūṣan (*Pūṣā'*) possessed of all riches (*viśvá-vedāḥ*) bestow well-being (*svasti*) on us (*naḥ*); may Tārkṣya (*Tā'rkṣyaḥ*) whose fellies are never injured (*áriṣṭa-nemiḥ*) bestow well-being (*svasti*) on us (*naḥ*); may Bṛhaspati (*Bṛ'haspátiḥ*) bestow well-being (*svasti*) on us (*naḥ*).

वेङ्कटमाधवव्याख्यानम् । स्वस्ति [नः] अस्माकम् इन्द्रः [वृद्धश्रवाः] वृद्धान्नः । स्वस्ति नः पूषा [विश्ववेदाः] विश्वधनः । स्वस्ति नः तार्क्ष्यः च [अरिष्टनेमिः] अहिंसितायुधः । स्वस्ति [नः] अस्माकं बृहस्पतिः च दधातु ॥६॥

सायणभाष्यम् । वृद्धश्रवाः वृद्धं प्रभूतं श्रवः श्रवणं स्तोत्रं हविर्लक्षणमन्नं वा यस्य तादृश इन्द्रः नः अस्माकम् । स्वस्तीत्यविनाशनाम [नि०३।२१] । स्वस्ति अविनाशं दधातु विदधातु करोतु । विश्ववेदाः । विश्वानि वेत्तीति विश्ववेदाः[1] । यद्वा विश्वानि सर्वाणि वेदांसि ज्ञानानि धनानि वा यस्य ।

---

[1] The first explanation presents difficulties regarding the accent. Since the word is not a Bahuvrīhi compd., *bahuvrīhau viśvaṁ saṁjñāyām* does not apply and the word will be paroxytone acc. to *gatikārakopapadāt kṛt* vi. 2. 139. In the words of S. there will be *kṛduttarapadaprakṛtisvaratvam*. *Viśvavid* is an upapada compd. and is always accented on the final member acc. to this rule. Of course, *vyatyaya* is always ready to oblige us,

तादृशः पूषा पोषको देवो नः अस्माकं स्वस्ति विदधातु। अरिष्टनेमिः। नेमिरित्यायुधनाम। [1]अरिष्टोऽहिंसितो नेमिर्यस्य। यद्वा। रथचक्रस्य धारा नेमिः। यत्सम्बन्धिनो रथस्य नेमिर्न हिंस्यते सोऽरिष्टनेमिः। एवंभूतः तार्क्ष्यः। तृक्षस्यपुत्रो गरुत्मान् नः अस्माकं स्वस्ति अविनाशं विदधातु। तथा बृहस्पतिः बृहतां देवानां पालयिता नः अस्माकं स्वस्ति अविनाशं विदधातु॥ वृद्धश्रवाः। बहुव्रीही पूर्वपदप्रकृतिस्वरत्वम्। विश्ववेदाः। विद ज्ञाने [धा° २।५४]। विदॢ लाभे [धा° ६।१४८]। आभ्यामसुन्प्रत्ययान्तो वेदस्शब्दः। "बहुव्रीही विश्वं संज्ञायाम्" [६।२।१०६] इति पूर्वपदान्तोदात्तत्वम्। तार्क्ष्यः। तृक्षस्यापत्यम्। "गर्गादिभ्यो यञ्" [४।१।१०५]। ञित्त्वादाद्युदात्तत्वम्। अरिष्टनेमिः। न रिष्टाऽरिष्टा[1]। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। अरिष्टा नेमिर्यस्य स तथोक्तः। बृहस्पतिः। "तद्बृहतोः करपत्योः०" [६।१।१५७ गणसूत्र] इति सुट्तलोपौ। "उभे वनस्पत्यादिषु०"

---

but we should have recourse to *vyatyaya* only when there is no other course open to us. Under AV. i. 32. 4 दिवे च विश्ववेदसे पृथिव्यै चाकरं नमः the printed commentary reads: दिवे चकारात्पृथिव्यै च द्युलोकाय विश्ववेदसे। वेद इति धननाम। विश्वस्य जगतो धनभूताय। वृष्टिप्रदानेन सर्वधनहेतुत्वाद् धनात्मकत्वम्। यद्वा वेद इति ज्ञाननाम। विश्वं विश्वविषयं ज्ञानं यस्याः सा तथोक्ता तस्यै। Here also the first explanation is to be rejected, for in that case the compound will be accented on the final syllable. Again, since all the other three epithets are Bahuvrīhis, there is no reason why we should commit *prakramabhaṅga* by taking *viśvavedas* as an upapada compd. It is just possible that विश्वानि वेत्तीति विश्ववेदाः, यद्वा is an ignorant reader's note, for S. takes no note of this explanation while showing the grammatical formation of the compd.

[1] In all the printed editions we find: अरिष्टोऽहिंसितो नेमिर्यस्य। * * * न रिष्टा अरिष्टा। अरिष्टा नेमिर्यस्य सः। Even if नेमिः had been both masc. and fem., this would have appeared strange, but since the word is exclusively fem. in this sense the first sentence is manifestly incorrect. The correct reading is, of course: अरिष्टाहिंसिता नेमिर्यस्य सः.

[६।२।१४०] इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् ॥६॥

सायणभाष्यम् (तैत्तिरीयारण्यकगतम्)। वृद्धैर्महात्मभिः सदा पुराणेषु श्रूयत इति वृद्धश्रवाः। तादृश इन्द्रः नः अस्माकम् स्वस्ति दधातु अध्ययनश्रवणानुष्ठानार्थं क्षेमं सम्पादयतु। विश्वं वेत्ति जानातीति विश्ववेदाः। तादृशः पूषा अपि नः स्वस्ति दधातु। अरिष्टम् अहिंसा तस्य नेमिस्थानीयः[1]। यथा लोहमयी नेमिः काष्ठमयस्य चक्रस्य भङ्गाभावाय पालयति एवमयं ताक्ष्यः गरुडोऽपि सर्पादिकृतां हिंसां निवार्य तत्पालकत्वादरिष्टनेमिः। तादृशः ताक्ष्यः नः स्वस्ति दधातु। बृहस्पतिश्च ब्रह्मचर्यं परिपाल्य नः स्वस्ति दधातु ॥६॥

स्वस्ति—The word स्वस्ति is both fem. and neut. So we have स्वस्तये in st. 5 and स्वस्ति (neut. Acc. sing.) in this st. See p. 57.

वृद्धश्रवाः—Yāska while explaining अनूर्तो राजा श्रवमिच्छमानः (RV. i. 126. 1) says: प्रशंसाम् इच्छमानः। यज्ञसंयोगाद्राजा स्तुतिं लभते। (*Nir.* ix. 10). Again he says: श्रवः श्रवणीयं यशः (*Nir.* xi. 10). In the *Nighaṇṭu* both श्रवः and यशः are given under धननामानि. As श्रवः corresponds exactly to Gk. *kle(w)os* fame, we have taken it in that sense here. See p. 43.

वृद्धश्रवाः itself came to be used in the later language as a name of Indra. Thus Amara says: वृद्धश्रवाः सुनासीरः पुरुहूतः पुरन्दरः. Cf. Gk. *Periklēs* (परिश्रवाः).

See Kaśyapabhāṣya of this stanza in आ नो भद्रीयम् pp. 26-28.

7

पृषदश्वा मरुतः पृश्निमातरः	पृषत्ऽअश्वाः । मरुतः । पृश्निऽमातरः ।
शुभंयावानो विदथेषु जग्मयः ।	शुभम्ऽयावानः । विदथेषु । जग्मयः ।
अग्निजिह्वा मनवः सूरचक्षसो	अग्निऽजिह्वाः । मनवः । सूरऽचक्षसः ।
विश्वे नो देवा अवसा गमन्निह ॥७॥	विश्वे । नः । देवाः । अवसा । आ । गमन् । इह ॥७॥

[1] The accent shows that this is a Bahuvrīhi.

The Maruts (*Marútaḥ*) with spotted steeds (*pṛ'ṣadaśvāḥ*), with Pṛśni as their mother (*Pṛ'śnimātaraḥ*), marching in splendour (*śubhaṃ-yā'vānaḥ*), visiting sacrifices (*vidátheṣu jágmayaḥ*), the sons of Manu (*Mánavaḥ*) with Agni for their tongue (*Agni-jihvā'ḥ*) and the sun for their eye (*sū'ra-cakṣasaḥ*)—may all the Gods (*viśve devā'ḥ*) come (*ā' gaman*) to us (*naḥ*) here (*ihá*) with their protection (*ávasā*).

वेङ्कटमाधवव्याख्यानम्। [पृषदश्वाः] पृषद्वर्णाश्वाः मरुतः [पृश्निमातरः] गोमातरः [शुभंयावानः] उदकं प्रति गन्तारः [विदथेषु] यज्ञेषु [जग्मयः] गमनशीलाः [अग्निजिह्वाः] अग्न्यास्याः [मनवः] मन्तारः [सूरचक्षसः] सुवीर्यदर्शनाः विश्वे [नः] अस्मान् देवाः [अवसा] रक्षणेन सह [आगमन्] आगच्छन्तु इह ॥७॥

काश्यपक्षितीशचन्द्रभाष्यम्। यागस्थाने देवानां समागमनं प्रार्थयते—पृषदश्वा इति। पृषत्यः श्वेतबिन्द्वङ्किता मृग्यः अश्वाः वाहा येषां ते पृषदश्वाः*। यदा मरुतो वहन्ति तदा बिन्दुशो वारिपतनं सञ्जायते, अत एव "पृषत्योऽश्वास्तु मरुताम्" इत्युच्यते। पृश्निः विचित्रबिन्द्वङ्किता गौः माता येषां ते पृश्निमातरः। "ऋतश्छन्दसि" [५।४।१५८].इति समासान्तप्रतिषेधः। यदान्तरिक्षं मेघनिचितं विचित्रवर्णं भवति तदैव मरुतः प्रवर्तन्ते, अत ईदृशे मेघे तेषां मातृत्वमुपचर्यते, अतस्ते गोमातर इति पृश्निमातर इति च व्यपदिश्यन्ते। शुभंयावानः समुज्ज्वलशोभं यथा स्यात् तथा गन्तारः, तथा च तैत्तिरीयब्राह्मणेऽश्विनावधिकृत्य श्रूयते—शुभं गमिष्ठौ सुयमेभिरश्वैः [३।१२।१०] इति। विदथेषु यज्ञेषु जग्मयः गमनशीलाः। तथा, अग्निजिह्वाः अग्निर्जिह्वा येषां ते। देवा ह्यग्निनैव हविरादिकं लिहन्ति, अत एवाग्निस्तेषां जिह्वेत्युपचारः। सूरचक्षसः सूरः सूर्यः चक्षः चक्षुः येषां ते। अत एव सूर्यमुद्दिश्य श्रूयते "नमो मित्रस्य वरुणस्य चक्षसे" [ऋ० सं० १०।३७।१] इति, "चक्षुर्मित्रस्य वरुणस्याग्नेः" [ऋ० सं० १।११५।१] इति, "सूर्यो यथा सर्वलोकस्य चक्षुः" [कठोपनिषद्

---

* पुंवद्भावश्छान्दसः।

२।२।११] इति च। मनवः मनोः समुत्पन्नाः। आदौ मानुषा अनन्तरं पुण्यप्रभावेण देवत्वमनुप्राप्ता ऋभुप्रभृतयः। यथा—"दिवि रुद्रासो अधि चक्रिरे सदः" [ऋ० सं० १।८५।२] इत्यत्र रुद्रशब्देन रुद्रपुत्रा मरुतो लक्ष्यन्ते, यथा वा "ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः" [ऋ० सं० २।१२।१०] इत्यत्र दानुशब्देन मातृवाचिना दानुतनयो वृत्रो लक्ष्यते, तथात्रापि मनुशब्देन मनुतनया लक्ष्यन्ते। एवं मरुद्भिश्च मनुजैश्चोपलक्षिता विश्वे देवाः सर्वे देवगणाः नः अस्माकम् अवसा रक्षणेन रक्षणसाधनायेत्यर्थः इह अत्र यज्ञभूमौ आगमन् आगच्छन्तु। अस्माभिराहूता यागभूमिमागम्यास्मान् परिरक्षन्तु। "तद्देवानामवो अद्या वृणीमहे" [ऋ° सं° १०।३६।२] इत्यर्थः॥७॥

सायणभाष्यम्। पृषदश्वाः पृषद्भिः श्वेतबिन्दुभिर्युक्ता अश्वा येषां ते तथोक्ताः। पृश्निमातरः पृश्निर्नानावर्णा गौर्माता येषाम्। शुभंयावानः शुभं शोभनं यान्ति गच्छन्तीति शुभंयावानः। शोभनगतय इत्यर्थः। विदथेषु यज्ञेषु जग्मयः गन्तारः। अग्निजिह्वाः अग्नेर्जिह्वायां वर्तमानाः[1]। सर्वे हि देवा हविःस्वीकरणायाग्नेर्जिह्वायां वर्तन्ते। तात्स्थ्यात्ताच्छब्द्यं। मनवः सर्वस्य मन्तारः। सूरचक्षसः। सूर्यप्रकाश इव चक्षः प्रकाशो येषां त एवंभूता मरुतो मरुत्संज्ञका विश्वे देवाः सर्वे देवा नः अस्मान् इह अस्मिन् काले अवसा रक्षणेन सह आगमन् आगच्छन्तु॥ शुभंयावानः। या प्रापणे [धा° २।३९]। "आतो मनिन्०" [३।२।७४] इति वनिप्। "तत्पुरुषे कृति बहुलम्" [६।३।१४] इति बहुलवचनाद्

---

[1] This forced explanation has become necessary because the word is oxytone. It is evidently a Bahuvrīhi, but Bahuvrīhis normally accent the first member. There are several courses open to us. We may include अग्निजिह्वा under निरुदकादि (vi. 2. 184) which is an आकृतिगण or under विचक्रादि vi. 2. 199. 1 (अन्तोदात्त-प्रकरणे विचक्रादीनां छन्दस्युपसंख्यानम्). Under RV. i. 44. 14 S. says: अग्निजिह्वाः, अग्ने र्जिह्वायामवस्थिताः हविर्भाज इत्यर्थः। तात्स्थ्यात्ताच्छब्द्यम्। यद्वा। अग्निर्जिह्वास्थानीयः येषां ते। छान्दसमन्तोदात्तत्वम्। It is most unfortunate that यद्वा is not found in the printed editions, but unless we

द्वितीयाया अप्यलुक्। गमन्। गमेः प्रार्थनायां लेट्यडागमः। "इतश्च लोपः०" [३।४।९७] इतीकारलोपः। "बहुलं छन्दसि" [२।४।७६] इति शपो लुक् ॥७॥

पृश्निमातरः—Both गोमातरः and पृश्निमातरः occur in RV. i. 85, but they would be incorrect in the classical language, the correct form being गोमातृकाः and पृश्निमातृकाः acc. to ऋतश्छन्दसि v. iv. 150. With पृश्नि 'spotted' *cf.* Gk. *perknos* 'dark-coloured'. The Maruts are the sons of *Rudra* and the mottled cow, Pṛśni ("probably representing the mottled storm-cloud").

शुभंयावानः—the first member is the acc. sing. of शुभ् 'brilliance' and the *aluk* compound means 'moving in brilliance'. Similarly we have शुभंया (RV. ix. 3. 6) which means the same thing. शुभंयु (x. 78. 7) is from the denom. and means 'seeking splendour'.

विदथेषु—See p 206. Locative of the goal reached. See p. 40.

जग्मयः—The agent suffix *i* is here added to the reduplicated root with the reduced radical vowel. *Cf.* चक्रि active, जघ्नि striking ततुरि victorious, etc. आदृगमहनजनः किकिनौ लिट् च iii. 2. 171.

गमन्—3. pl. root aorist injunctive of गम्. In the tenth maṇḍala (35. 13) we find—

विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः।
विश्वे नो देवा अवसा गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥

where occurs गमन्तु which is regarded as a blend of गच्छन्तु and गमन् "since the thematic aorist *agamat* is rare and dubious in the Saṁhitās".

---

supply it the explanation will be meaningless. S. first explains अग्निजिह्वाः as a Tatpuruṣa and gets the meaning by लक्षणा with the help of the dictum तात्स्थ्यात्ताच्छब्द्यम्. He is evidently not satisfied with the explanation and suggests that we may regard अग्निजिह्वाः as a Bahuvrīhi compound, the accent on the last syllable being a Vedic peculiarity. As Wackernagel points out, when *Agni, ghṛta* and *citra* are the first members of Bahuvrīhi compounds, the second member is accented.

8

भद्रं कर्णेभिः शृणुयाम देवा	भद्रम् । कर्णेभिः । शृणुयाम । देवाः ।
भद्रं पश्येमाक्षभिर्यजत्राः ।	भद्रम् । पश्येम । अक्षऽभिः । यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभि-	स्थिरैः । अङ्गैः । तुस्तुऽवांसः । तनूभिः ।
र्व्यशेम देवहितं यदायुः ॥८॥	वि । अशेम । देवऽहितम् । यत् । आयुः ॥८॥

Ye Gods (*devāḥ*), may we hear (*śṛṇuyāma*) with our ears (*kárṇebhiḥ*) what is good (*bhadrám*); ye adorable ones (*yajatrāḥ*), may we see (*paśyema*) with our eyes (*akṣábhiḥ*) what is good (*bhadrám*). Praising Gods (*tuṣṭuvā'ṁsaḥ*) with firm (*sthiráiḥ*) limbs (*áṅgaiḥ*) and bodies (*tanū'bhiḥ*) may we attain (*vy-áśema*) the term of life (*yát ā'yuḥ*) appointed by the Gods (*devá-hitam*).

वेङ्कटमाधवव्याख्यानम् । भद्रं [कर्णेभिः] कर्णैः शृणुयाम देवाः । भद्रम् एव पश्येम [अक्षभिः] अक्षिभिः [यजत्राः] यष्टव्याः । स्थिरैः अङ्गैः तुष्टुवांसः तनूभिः च युक्ताः [व्यशेम] व्यश्याम [प्राप्यास्म ?] [देवहितम्] देवैर्निहितम् शतसंख्याकम् आयुः ॥८॥

काश्यपक्षितीशचन्द्रभाष्यम् । अनेन मन्त्रेण प्रार्थनासारसर्वस्वं देवेभ्यो निवेदयति—भद्रमिति । हे देवाः, कर्णेभिः कर्णैः भद्रं कल्याणं वचनं शृणुयाम आकर्णयेम । मा खलु स्वजनविधुराणां करुणक्रन्दितेन मदमत्तानां कलहकोलाहलेन ज्ञातीनां च परुषपरुषेण वचनजालेन दह्यमानकर्णा भूम, प्रत्युत वेदशास्त्राणां स्निग्धगम्भीरनिर्घोषेण पुत्रमित्रकलत्रादीनां प्रहर्षप्रजल्पितेत साधुजनानाममृतायमानेनालपितेन च श्रोत्रयुगलं नः प्रसादमधिगच्छतु । तथाच तैत्तिरीयब्राह्मणे [२।५।२।३] श्रूयते—श्रोत्रेण भद्रमुत शृण्वन्ति सत्यम् । श्रोत्रेण वाचं बहुधोद्यमानाम् । श्रोत्रेण मोदश्च महश्च श्रूयते । श्रोत्रेण सर्वा दिश आशृणोमि ॥ इति । हे यजत्राः यजनीयाः पूजनीया देवा अक्षभिः अक्षिभिः चक्षुर्भिः भद्रम्

शुभं पश्येम अवलोकयेम। युष्माकं पूजनपरा वयं मा तावत् खलानां समुन्नतिं साधूनामधोगतिं धर्मस्य विशरणम् अधर्मस्याभ्युत्थानम् जनानामकालमरणानि बलवतां च पिशाचचेष्टितानि द्राक्ष्म, प्रत्युत साधूनां समुन्नतिम् खलानां सौशील्यम्, धर्मस्याभ्युत्थानम्, अधर्मस्य समूलनाशम्, तरुणानां कर्तव्यपरायणतां बलीयसां च दुर्बलरक्षणं प्रत्यक्षीकुर्याम। तथाच तैत्तिरीयब्राह्मणे [२।५।१।२] श्रूयते—अनन्धाश्चक्षुषा वयम्। जीवा ज्योतिरशीमहि। सुवर्ज्योतिरुतामृतम्॥ इति। स्थिरैः दृढतरैः अचपलैश्च अङ्गैः अवयवैः तनूभिः शरीरैश्च देवान् तुष्टुवांसः स्तुतवन्तः देवानां स्तुतिपरायणा इत्यर्थः। यत् आयुः देवहितम् देवैः मनुष्येषु निहितम्, देवविहितमित्यर्थः।

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्।
पश्येम शरदः शतं जीवेम शरदः शतम्॥

[ऋ० सं० ७।६६।१६] इति श्रुतेः "शतायुः पुरुषः" [तै० सं० १।५।२] "शतायुर्वै पुरुषः" [ऐतरेयब्राह्मण ७।७] इत्यादिश्रुतेश्च वर्षशतपरिमितम्। यच्छब्दश्रुतेस्तच्छब्दाध्याहारः। तत् व्यशेम निराबाधमधिगच्छेम। "नातः पापात् पापीयोऽस्ति यदनुपकरणस्य दीर्घमायुः", अत एव सर्वभोगोपकरणसम्पन्नाः शारीरं स्वास्थ्यमनुभवन्तो यथाविधि देवतोपस्थानमनुतिष्ठन्तः शतं संवत्सरान् जीवेम।

सहृदयशिरोमणिना भर्तृहरिणा गीतम्—

क्वचिद्वीणावाद्यं क्वचिदपि च हाहेति रुदितं
क्वचिन्नारी रम्या क्वचिदपि जराजर्जरवपुः।
क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहो
न जाने संसारः किममृतमयः किं विषमयः॥

इति। तत् संसारोऽयममृतमय एव नोऽस्तु न पुनर्विषमयः। मन्त्रेऽत्र परिसंख्यालङ्कारः॥ तल्लक्षणं च काव्यप्रकाशे—"किञ्चित् पृष्टमपृष्टं वा कथितं यत् प्रकल्पते। तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता॥" इति। ८॥

सायणभाष्यम्। अस्ति सौम्यचरुस्तृतीयसवने। तेन चरुणा देवतामिष्ट्वा शेषे तस्मिन्बहु घृतमवनीय तस्मिन्वषट्कर्ता स्वकीया छाया द्रष्टव्या। सा

यदि न दृश्येत तदानीं "भद्रम्" इत्येका पठितव्या। "त्वं सोम" इति खण्डे तथैव सूत्र्यते। "राज्ञा सोमेन तद्वयमस्मासु धारयामसि भद्रं कर्णेभिः शृणुयाम देवा इति च" [आ० श्रौ० सू० ५।१९।५] इति[1]। महानाम्नीव्रतेऽप्येषा भूमिस्पर्शने जप्या। सूत्रितं च "एतद्विदम्" इति खण्डे। "भद्रं कर्णेभिः शृणुयाम देवाः शं न इन्द्राग्नी भवतामवोभिः" [आ० श्रौ० सू० ८।१४।१८] इति[2]।

हे देवा: दानादिगुणयुक्ताः सर्वे देवाः कर्णेभि: अस्मदीयैः श्रोत्रैः भद्रम् भजनीयं कल्याणं वचनं शृणुयाम। युष्मत्प्रसादाच्छ्रोतुं समर्थाः स्याम। अस्माकं बाधिर्यं कदाचिदपि मा भूत्[3]। हे यजत्रा: यागेषु चरुपुरोडाशादिभिर्यष्टव्या देवा अक्षभि: अक्षिभिरात्मीयैश्चक्षुर्भिः भद्रम् शोभनं पश्येम। द्रष्टुं समर्थाः स्याम। अस्माकं दृष्टिप्रतिघातोऽपि मा भूत्। स्थिर: दृढैः अङ्गै: हस्तपादादिभिरवयवैः तनूभि: शरीरैश्च युक्ता वयं तुष्टुवांस: युष्मान् स्तुवन्तो यत् आयु: षोडशाधिकशतप्रमाणं विंशत्यधिकशतप्रमाणं वा[4] देवहितम् देवेन प्रजापतिना स्थापितं तत् व्यशेम। प्राप्नुयाम॥ कर्णेभिः। "बहुलं छन्दसि" [७।१।१०] इति भिस ऐसभावः। अक्षभिः। "छन्दस्यपि दृश्यते" [७।१।७६] इत्यनङ्, स चोदात्तः। यजत्राः। "अमिनक्षि०" [उ०३।९८] इत्यादिना यजेरत्रन्प्रत्ययः। तुष्टुवांसः। ष्टुञ् स्तुतौ

---

[1] सोमयागे सवनत्रितयमनुष्ठीयते—प्रातःसवनं माध्यन्दिनसवनं तृतीयसवनं चेति। तत्र तृतीयसवने सोमदेवताकश्चरुर्भवति। अध्वर्युणाहृतमुद्गातृभ्यः पूर्वं गृहीत्वा तदवेक्षेत मन्त्रेण वषट्कर्ता। "तस्मिंश्चरौ घृताप्लुते ईक्षमाणः स्वच्छायां यदि न पश्येत् तस्यापश्यतो नैमित्तिकमिदं 'हृदिस्पृक्' इत्यादियजुश्च 'भद्रं कर्णेभि'रिति ऋचं च ब्रूयात्।

[2] गवामयनस्य महाव्रतवर्जमहानि समुपवर्ण्याश्वलायनेनोक्तम्—महाव्रतानुष्ठानात्पूर्वं महानाम्नीव्रतमनुष्ठातव्यम्। तत्र महानाम्न्य ऋचः पठ्यन्त इति तस्य महानाम्नीति संज्ञा। तत्र च व्रते वर्तमानो भूमिमुपस्पृश्य भद्रं कर्णेभिरित्यृचं जपेत्।

[3] Sāyaṇa built better than he knew—May we not be like men who have eyes but see not, who have ears but hear not ! *Cf.* नयन तोमारे पाय ना देखिते, रयेछ नयने नयने.

[4] S. is here thinking of the ṣoḍaśottarīya and viṁśottarīya daśās of Astrology.

[धा° २।३२] । लिटः क्वसुः । "शर्पूर्वाः खयः" [७।४।६१] इति तकारः शिष्यते । अशेम । अशू व्याप्तौ [धा° ५।१८] । "लिङ्याशिष्यङ्" [३।१।८६] । यदि तु तत्र परिगणनमन्यव्यावृत्त्यर्थं[1] तदानीं लिङि व्यत्ययेन शप् । देवहितम् । "तृतीया कर्मणि" [६।२।४८] इति पूर्वपदप्रकृतिस्वरत्वम् ॥८॥

सायणभाष्यम् (तैत्तिरीयारण्यकगतम्)। हे देवाः इन्द्रादयः भद्रं कल्याणं श्रुतिस्मृतिवाक्यरूपं कर्णेभिः आचार्यान्तेवासिरूपाणाम् ऋत्विग्यजमानरूपाणां वास्माकं बहूनां कर्णैः शृणुयाम युष्मत्प्रसादात् सर्वदा श्रोतुं समर्थाः

---

[1] In the Bhāṣya on लिङ्याशिष्यङ् iii. 1. 86 we find: अङ्गमाशिष्यङ् विधीयते तस्य किं प्रयोजनम् ?

* आशिष्यङः प्रयोजनं स्थागागमिवचिविदय: ।

स्था । उपस्थेयं वृषभं तुग्रियाणाम् । गा । अञ्जसा सत्यमुपगेयम् । गमि । यज्ञेन प्रतिष्ठां गमेयम् । वचि । मन्त्रं वोचेमाग्नये । विदि । विदेयमेनां मनसि प्रविष्टाम् ।

* शकिरुद्योऽच ।

शकिरुद्योश्चेति वक्तव्यम् । शकेम त्वा समिधं साधया धिय: । अस्रवन्तीमारुहेमा स्वस्तये ।

* दृशेरक् पितरं च दृशेयं मातरं च ।

दृशेरग् वक्तव्य: । पितरं च दृशेयं मातरं च दृशेयमित्येवमर्थम् ।

[In the N. S. Press ed. we find मातरं च दृशेयम् both in the Vārttika and in the Bhāṣya. In the critical edition of Kielhorn मातरं च दृशेयम् occurs in the Bhāṣya alone and not in the Vārttika. पितरं च दृशेयं मातरं च is the last pāda of RV. i. 24.1 and 2 and occurs unchanged in the *Kāśikā*. The second दृशेयम् would therefore appear to be a reader's note and should be expunged from the *Bhāṣya*.]

The Vārttikakāra has enumerated the roots which come under the scope of this rule, but *aś* is not mentioned by him. So if the list be regarded as exhaustive, the rule does not apply and we are to invoke the aid of vyatyaya. If, however, the list be regarded as merely illustrative, then there is no difficulty.

स्याम, श्रुत्वा च यजत्राः यागक्षमा[1] वयम् भद्रं कल्याणं यज्ञादिकं कर्म अक्षभिः चक्षुरिन्द्रियैः[2] साक्षात् पश्येम। स्थिरैः अविकलैः अङ्गैः चक्षुरादिभिर्हस्तादिभिश्चावयवैः तनूभिः तथाविधशरीरैः युक्ता वयं तुष्टुवांसः युष्मदीयां स्तुतिं कुर्वाणा यत् यस्मात् कारणात्[3] देवहितम् देवेन प्रजापतिना समर्पितं सर्वमपि आयुः व्यशेम विशेषेण प्राप्नवाम। तस्मादपमृत्योरभावाच्चिरं भद्रं शृणुयामेति पूर्ववदन्वयः ॥८॥

कर्णेभिः—Note that both the old inst. pl. कर्णेभिः and the new one अङ्गैः are used in the same stanza. See p. 30.

अक्षभिः—In the classical language अक्षन् is found only *before vocalic endings beginning with the instrumental sing.* In the earlier language, however, other forms are met with. Thus in the *Maitrāyaṇī* and *Kāṭhaka Saṃhitās*, we find *akṣāṇi*. The stem occurs in the well-known expression अक्षण्वत् also. The *Kāśikā* on छन्दस्यपि दृश्यते is interesting: अस्थिदधिसक्थ्यक्ष्णामनङ्, छन्दस्यपि दृश्यते। यत्र विहितस्ततोऽन्यत्रापि दृश्यते। अचीत्युक्तमनजादावपि दृश्यते। इन्द्रो दधीचो अस्थभिः [ऋ० सं० १।८४।१३]। तृतीयादिष्वित्युक्तम्, अतृतीयादिष्वपि दृश्यते। अस्थान्युत्कृत्य जुहोति। विभक्ताविन्युक्तम्, अविभक्तावपि दृश्यते। अक्षण्वता लाङ्गलेन। अस्थण्वन्तं यदनस्था बिभर्ति [ऋ० सं० १।१६४।४]।

यजत्राः—The suffix is *-tra* - with the connecting vowel *-a-*. So also *gāy-a-tra* 'son', *vadha-tra* 'deadly weapon'. Skt. *yajata* also means 'adorable'. देवानां विशेषणमेतत्, यष्टव्या इत्यर्थः H.

व्यशेम—The root *aś* to reach, obtain, is Ubhayapadin. In the *Sāma-veda* and *V. Samhitā* we get the Atm. a-aor. optative

[1] The suffix has been added in the sense of तव्य, so this meaning has to be rejected.

[2] S. evidently takes अक्ष in the sense of इन्द्रिय and states the secondary meaning चक्षुरिन्द्रियैः, साक्षात् would, therefore, appear to be unnecessary.

[3] यत् cannot mean यस्मात् कारणात् here.

form: व्यशेमहि देवहितं यदायुः. "The active is usual with prepositions, and *vyaśema* obviously prior to *vyaśemahi*" (Bloomfield and Edgerton). The finite verb is not accented because it is not connected with *yat* but with *tat* understood.

देवहितम्—See p. 23. *Cf.*

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ।
पश्येम शरदः शतं जीवेम शरदः शतं
नन्दाम शरदः शतं मोदाम शरदः शतं
भवाम शरदः शतं शृणवाम शरदः शतं
प्रब्रवाम शरदः शतमजीताः स्याम शरदः शतं
ज्योक् च सूर्यं दृशे ।

देवहितं यदायुः—Even poets speak of a hundred years as the span of life allotted to man. Thus Bhartṛhari says in his *Vairāgyaśataka*:

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः ।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ॥

Acc. to the Bible the span of life is "three score years and ten" though the mention of a hundred years and a hundred and twenty years is sometimes met with.

"The days of our age are three score years and ten; and though men be so strong that they come to four score years, yet is their strength then but labour and sorrow; so soon passeth it away, and we are gone." *Psalms* xc. 10. "There shall be no more than an infant of days, nor an old man that hath not filled his days: for the child shall die an hundred years old." *Isaiah* lxv. 20. "His days shall be an hundred and twenty years". *Genesis* vi. 3.

9

शतमिन्नु शरदो अन्ति देवा	शतम् । इत् । नु । शरदः । अन्ति । देवाः ।
यत्रा नश्चक्रा जरसं तनूनाम् ।	यत्र । नः । चक्र । जरसम् । तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति	पुत्रासः । यत्र । पितरः । भवन्ति ।
मा नो मध्या रीरिषतायुर्गन्तोः ॥८॥	मा । नः । मध्या । रिरिषत । आयुः । गन्तोः ॥९॥

A hundred autumns (*śatám ít nú śarádaḥ*) stand before us (*ánti*), O ye Gods (*devāḥ*), in which (*yátra*) ye have made (*cakrá*) infirmity (*jarásam*) to descend on our bodies (*naḥ tanū'nām*), in which (*yátra*) the sons (*putrā'saḥ*) become (*bhávanti*) the fathers (*pitáraḥ*); damage ye not (*mā' rīriṣata*) our term of life (*naḥ ā'yuḥ*) in the midst of its course (*gántoḥ madhyā'*).

वेङ्कटमाधवव्याख्यानम् । शतम् [इत् नु] एव शरदः [अन्ति] अन्ततः भवति[1] देवा मनुष्याणामायुः । यत्र [नः] अस्माकम् [चक्रा] कृतवन्तः यूयम् [तनूनाम्] अङ्गानां [जरसम्] जरां कल्पितवन्तः[2] । [पुत्रासः] पुत्रा एव [पितरः] रक्षितारः यत्र भवन्ति तद् आयुः गन्तोः [मध्या] मध्ये मा [नः] अस्मान् [रीरिषत] हिंसीध्वम्[3] इत्यायुष आशासनम् ॥९॥

सायणभाष्यम् । हे देवाः अन्ति अन्तिके मनुष्याणां समीप आयुष्ट्वेन भवद्भिः कल्पिताः शरदः संवत्सराः शतम् इत् नु शतं खलु । यस्मात्सृष्टिकाले मनुष्याणां शतं संवत्सरा आयुरिति युष्माभिः परिकल्पितं तस्मात् नः

1 V. construes भवति with आयुः understood.

2 कल्पितवन्तः is unnecessary, because of the preceding कृतवन्तः.

3 This is the reading in the edition of Sarup who notes the variant हिंसितध्वम्. Both forms are ungrammatical. Read हिंसिष्ट.

अस्माकम् आयुः गन्तोः कृत्स्नस्यायुषो गमनात्पूर्वं मध्या मध्ये मा रीरिषत मा हिंसिष्ट। कीदृशानाम्[1]? नः अस्माकं तनूनाम् शरीराणां जरसं जरां यत्र यस्यामवस्थायां चक्र कृतवन्तो यूयम्। यत्र च पुत्रासः पुत्राः पितरः अस्माकं रक्षितारो भवन्ति। ईदृग्दशापन्नानामि[1]त्यर्थः॥ अन्ति। अन्तिकशब्दस्य "कादिलोपो बहुलमिति वक्तव्यम्" [काशिका ६।४।१४९] इति कलोपः। यत्रा। "ऋचि तुनुघमक्षुतङ्कुत्र०" [६।३।१३३] इति संहितायां दीर्घः। चक्रा। लिटि मध्यमबहुवचनस्य कित्त्वाद् गुणाभावे यणादेशः। "द्व्यचोऽतस्तिङः" [६।३।१३५] इति संहितायां दीर्घत्वम्। जरसम्। "जराया जरसन्यतरस्याम्" [७।२।१०१] इति जरसादेशः। मध्या। "सुपां सुलुक्०" [७।१।३९] इति सप्तम्या डादेशः। रीरिषत।* रिष हिंसायाम् [धा० १।६८१] अस्माण्णयन्तात् माङि लुङि मध्यमबहुवचने च्लेश्चङि णिलोपोपधाह्रस्वद्विर्वचनहलादिशेषसन्वद्भावेत्त्वदीर्घाः। छान्दसः पदकालीनो ह्रस्वः। गन्तोः। भावलक्षणे 'स्थेण्०'[2] [३।४।१६] इति गमेस्तोसुन्प्रत्ययः।

शतम्—Av. *satəm*, Lat. *centum*, Gk. *hekaton*, Goth. *hund*, Lith. *šimtas*.

शरदः—See p. 195.

अन्ति—अन्तिकशब्दस्य कादिलोपो बहुलमिति वक्तव्यमिति कलोपः *i.e.*, in the matter of the elision of the portion beginning with *k* of *antika* we

---

[1] All the printed editions read कीदृशान् and ईदृग्दशापन्नान्, but there is no Acc. pl. in the previous clause to which कीदृशान् can refer.

* रिष रुष हिंसायाम्—अस्मात् ण्यन्तात् All. See S. under RV. i. 41. 2. We may say: रिष हिंसायाम्। अस्मात् ण्यन्तात् or रिष रुष हिंसायाम्। रिषेर्ण्यन्तात्। In the Dhātupāṭha we find: कष खष शिष जष झष शष वष मष रुष रिष हिंसार्थाः।

[2] गन्तोः। भावलक्षणे स्थेण इति गमेस्तोसुन्प्रत्ययः—Unfortunately for S., the rule भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् does not include गम्, and इण् cannot represent गम् here. He might have said ईश्वरपदासन्निधानेऽपि तोसुन्-प्रत्ययः.

should use the word *bahulam*. This is found in the *Kāśikā* [which reads कादिलोपे], giving the substance of the Śloka-vārttika under vi. 4. 149:

तसौत्येव न वक्तव्यो हृष्टो दासतयेऽपि हि ।
यौ लोपऽन्तिषदित्यत्र तयावौ वेऽन्यथर्वसु ॥

Kaiyaṭa explains: तसौत्येव इति । कादिलोपश्च बहुलमित्यत्र विषयमनुपादाय पठितव्यमित्यर्थः ।...घ-शब्देनोत्तरपदं पूर्वाचार्यप्रसिद्धयोच्यते ।...अघाविति । अनुत्तरपदे इत्यर्थः । The example from the Atharva Veda is अन्तिये च दूरके. The Ślokavārttika and the example given in the Mahābhāṣya appears to be based on a vicious reading of the hemistich अरमास इहाइयां ये अन्ति ये च दूरके x. 4. 9. अन्ति occurs again in AV. x. 8. 32: अन्ति सन्तं न जहात्यन्ति सन्तं न पश्यति and in AV. xviii. 3. 23 आ यूथेव क्षुमति पश्वो अख्यद्देवानां जनिमान्त्युग्रः where S. says: अन्ति अन्तिके समीपे । कादिलोपो बहुलमिति वक्तव्यमित्यन्तिकशब्दस्य कादिलोपः. The truth is rather the other way about. Skt. अन्ति is an independent adverb. From it is derived अन्तिक with the suffix क. In Gk. *anti* means 'opposite', *ánta* 'face to face', Lat. *ante* 'before'.

जरसम्—The stem is जरस् (evidently fem.) in RV. In the acc. sing., however, जराम् (like उषाम्, अप्सराम् etc.) is sometimes used for the sake of the metre. This gave rise to the stem जरा before vocalic endings from the Atharva Veda downwards. In Gk., the stem is *geras* neut.

चक्रा—metrical lengthening. In the Paspaśāhnika of the Mahābhāṣya we find: सन्ति वै शब्दा अप्रयुक्ताः । तद् यथा—ऊष तेर चक्र पेचेति । ...ये चाप्येते भवतोऽप्रयुक्ता अभिमता एतेषामपि प्रयोगो दृश्यते । क्व ? वेदे । यद्वो रेवती रेवत्यं तदूष । यन्मे नरः श्रुत्यं ब्रह्म चक्र । यत्रा नश्चक्रा जरसं तनूनामिति ।

तनूनाम्—See p. 313.

रीरिषत—2. pl. inj. reduplicated aorist of the causal of रिष् to be hurt. See p. 241.

गन्तोः—क्रतस्यायुषो गमनात् पूर्वं मध्या मध्ये S.—This is rather cumbrous. गन्तोः is a Gen. infinitive governed by the preposition *madhyā́*, the Instr. sing of *mádhya* with adverbial shifting of accent. *Cf.* मध्या कर्तोर्विततं सं जभार RV. i. 115. 4. Similarly, we have

in Greek the preposition *ánō*:, the Inst. sing. of *aná*, governing the Gen., *e.g.*, *anō toû gonátos* above the knee. See p. 109.

10

अदितिर्द्यौरदितिरन्तरिक्ष-	अदितिः । द्यौः । अदितिः । अन्तरिक्षम् ।
मदितिर्माता स पिता स पुत्रः ।	अदितिः । माता । सः । पिता । सः । पुत्रः ।
विश्वे देवा अदितिः पञ्च जना	विश्वे । देवाः । अदितिः । पञ्च । जनाः ।
अदितिर्जातमदितिर्जनित्वम् ॥१०॥	अदितिः । जातम् । अदितिः । जनिऽत्वम् ॥१०॥

Aditi (*A'ditiḥ*) is heaven (*dyáuḥ*), Aditi (*A'ditiḥ*) is the aerial region (*antárikṣam*), Aditi (*A'ditiḥ*) is the mother (*mātā'*), she is the father (*sáḥ pitā'*), she is the son (*sáḥ putráḥ*): Aditi (*A'ditiḥ*) is all the Gods (*víśve devā'ḥ*), Aditi (*A'ditiḥ*) is the five tribes (*páñca jánāḥ*); Aditi (*A'ditiḥ*) is all that is born (*jātám*), Aditi (*A'ditiḥ*) is all that is to be born (*jánitram*).

ऐतरेयब्राह्मणम् । पाञ्चजन्यं वा एतदुक्थं यद्वैश्वदेवम्, सर्वेषां वा एतत् पञ्चजनानामुक्थं—देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणां च पितॄणां च । एतेषां वा एतत् पञ्चजनानामुक्थं सर्व एनं पञ्चजना विदुः ।...अदितिर्द्यौरदितिरन्तरिक्ष-मित्युत्तमया परिदधाति । इयं वा अदिति द्यौरियमन्तरिक्षम् इति । अदितिर्माता स पिता स पुत्र इति । इयं वै माता, इयं पिता, इयं पुत्र इति । विश्वे देवा अदितिः पञ्च जना इति । अस्यां वै विश्वे देवा अस्यां पञ्च जना इति । अदितिर्जातमदितिर्जनित्वम् इति । इयं वै जातमियं जनित्वम् ॥१३।७॥

वेङ्कटमाधवव्याख्यानम् । अदितिरेव सर्वमित्यदितेर्विभूतिमाचष्टे—अदितिरेव जातम् अदितिरेव [जनित्वम्] जनिष्यमाणं सा च [1]प्रयच्छत्वायुरिति ॥१०॥

[1] Laksman Sarup prints: "प्रयच्छतायुरिति (?)" and notes the variant प्रयच्छयायुः but the correct reading is either प्रयच्छतादायुः or प्रयच्छतामायुः or प्रयच्छत्वायुः. Of these प्रयच्छत्वायुः makes the least departure from the MSS, though प्रयच्छतादायुः sounds better in such cases.

काश्यपक्षितीशचन्द्रभाष्यम्। सर्वभूतान्तरात्मानमदितिं प्रशंसन्नुपसंहरति —अदितिर्द्यौरिति। अदितिः द्यौः यस्य किल महिमेदक्रयेयत्तया वा परिच्छेत्तुं न शक्यते स द्युलोकोऽप्यदितिरेव। अदितिः अन्तरिक्षम् अनन्तविस्तारमन्तरिक्षमप्यदितिरेव। अदितिः माता स पिता स पुत्रः। संसारस्यालम्बनानि पितृमातृपुत्रा अप्यदितिरेव। अदितिः जातम् अदितिः जनित्वम् किं बहुना यद् यत् किल समुत्पन्नं यद् यच्च समुत्पत्स्यते सर्वं खल्वदितिरेव। सेयं सर्वमयी सर्वशक्तिरदितिः संसारपाशान्नश्छिनत्तु॥

"स पिता स पुत्रः" इत्यत्र विधेयप्राधान्यात् पुंस्त्वेन निर्देशः, "तिस्रो द्यावः सवितुर्द्वा उपस्था" [ऋ० सं० १।३५।६] इत्यत्र यथा। "अयं मातायं पितायं जीवातुरागमत्। इदं तव प्रसर्पणं सुबन्धवेहि निरिहि॥" [ऋ० सं० १०।६०।७] इत्यत्र पुनरुद्देश्यानुरोधेन पुंस्त्वेन निर्देशः। महर्षिणा पाणिनिनापि "णेरणौ यत् कर्म णौ चेत् स कर्तानाध्याने" [१।३।६७] इत्यत्र विधेयानुरोधेन स इति पुंलिङ्गेन निर्देशः कृतः, "कर्मणा यमभिप्रैति स सम्प्रदानम्" [१।४।३२] इत्यत्र पुनरुद्देश्यानुरोधेन तथा विहितः। अत एव कैयटेनोक्तम्—उद्दिश्यमानप्रतिनिर्दिश्यमानयोरेकत्वमापादयन्ति सर्वनामानि पर्यायेण तल्लिङ्गमुपाददत इति। व्याख्यातं च नागेशेन—सिद्धवत् कीर्तनमुद्देशः, प्रतिपाद्यतया विधेयतया वा कीर्तनं प्रतिनिर्देशः। यथा "शैत्यं हि यत् सा प्रकृतिर्जलस्य" [रघु० ५।५४] इत्यादौ स्त्रीलिङ्गनिर्देशः। तल्लिङ्गम् तयोर्लिङ्गमित्यर्थः। इति। जनित्वमित्यत्र "कृत्यार्थे तवैकेन्केन्यत्वनः" [३।४।१४] इति सूत्रेण कृत्यार्थे त्वन्प्रत्ययः॥१०॥

निरुक्तम् (४।२३)। अदितिरदीना देवमाता। "अदितिर्द्यौः..." इत्यदितेर्विभूतिमाचष्ट एनान्यदीनानीति वा।

दुर्गाचार्यभाष्यम्। राहूगणस्य गोतमस्येयमार्षम्। तृतीयसवने सर्वस्तोमेष्वेव वैश्वदेवस्य शस्त्रस्य परिधानीयैषा। अदितिः एव देवमाता द्यौः, अदितिः अदितिरेव च अन्तरिक्षम्। अदितिः एव माता सर्वभूतनिर्मात्री, स एव च पिता पालकः, स एव हि पुत्रः। सैव हि परितुष्टा सती स्तोतारं

पुत्रो बहुनः पापात् त्रायते, अथवा सैव निपृणाति सर्वभूतानां यन्निपतव्यं दातव्यमित्यर्थः। येऽपि चैते विश्वे देवाः सर्वे देवाः, एतेऽपि अदितिरेव। पञ्च जनाः गन्धर्वादयः अदितिरेव। सर्वथापि किं बहुना, यावदेतत् किञ्चित् जातं च जनित्वं च जनिष्यमाणं च सर्वमप्येतद् अदितिरेव। इति एवमनेन मन्त्रेण मन्त्रदृग् अदितेर्विभूतिमाचष्टे, देवमातुस्तत् सर्वमप्युपपद्यत एव, माहाभाग्याद्देवतायाः। तदुत्तरत्र वक्ष्यामः। एवमैतिहासिकपक्षेण। नैरुक्तपक्षेण पुनः "एनानि" द्युलोकादीनि सर्वाणि अदीनानि अनुपक्षीणानि इति योज्यम्। न ह्येषां क्षयोऽस्तीति।

महेश्वरभाष्यम्। देवमातृत्वाददितेः, द्युप्रभृतयस्तत्प्रभवाः। तेषां तत्प्रभवत्वाच्च तच्छब्देनैवाभिधानम्। अदितिप्रभवा द्यौरित्यर्थः। एवमेव अदितिरन्तरिक्षम्। अदितिप्रभवत्वादित्यर्थः। अदितिर्माता। सः। स इति लिङ्गव्यत्ययः। सैव पिता, सैव पुत्रः। विश्वे देवा अदितिः। पञ्च जनाश्च गन्धर्वादयः। निषादपञ्चमा वा वर्णाः। किं बहुना। अदितिरेव जातम्। अदितिरेव जनित्वम् जनिष्यमाणमित्यर्थः। एवं लोके यावद् द्युवियन्मातृपितृपुत्रादि सम्मतं तत् सर्वं तत्प्रभवत्वाददितिरिति, कृत्स्नस्य जगतस्तत्प्रभवत्वेन। एवमदितेर्विभूतिमाचष्टे मन्त्रो मन्त्रदृग्वा। अदीनपर्यायो वा नैरुक्तपक्षेऽदितिशब्दो न देवमातृवचनः। अत आह—एनान्यदीनानीति वा इति। अक्षीणा द्यौः तथान्तरिक्षादीनि। अध्यात्ममपि। अदितिः प्रकृतिः कारणं ब्रह्म। प्रकृतिसार्वनाम्याच्च तत्प्रभवत्वे सति सर्वमदितिरिति व्याख्येयम्।

स्कन्दस्वामिभाष्यम्। अदितिर्देवमाता। तत्प्रभवाः सर्वे द्युवादयः[1]। अत इदं कारणशब्देन कार्यस्य गौण्या वृत्त्याभिधानम्। अदितेः कार्यभूतेष्वदितिरेवान्तरिक्षम्। अदितिरेव माता स पिता स पुत्रः। स इति व्यत्ययेन पुंलिङ्गता। सैवादितिः पिता सैव पुत्रः। विश्वे देवा अदितिः

[1] Skandasvāmin evidently forms दिव् with विच् and the word being a धातु, अचिश्नुधातुभ्रुवाम्० vi.4. 77 applies after the change of व् to उ by दिव उत् vi. 1. 131.

पञ्च जनाश्च। गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येते पञ्च जना अभिप्रेताः, निषादपञ्चमा वा ब्राह्मणादयो वर्णाः। अदितिरेव जातम् अदितिरेव जनित्वं जनिष्यमाणम्। एवमशेषजगत्कारणत्वेनादितेर्विभूतिमाचष्टे। अथवा, अदितिशब्दोऽपि क्रियाशब्दोऽदीनपर्यायः। द्युवादीनि वस्तून्यदीनान्यनुपक्षीणानि। नित्यानीत्यर्थः ॥१०॥

महीधरभाष्यम्। मन्त्रदृक् सर्वात्मकत्वेनादितिं स्तौति। द्यौः स्वर्गोऽदितिस्तदधिष्ठातृत्वात्। एवमग्रेऽपि। अन्तरिक्षम् अदितिः माता पुत्रश्च सः। सादितिरेव। लिङ्गव्यत्ययः। विश्वे सर्वे देवाः अदितिः। पञ्चजना मनुष्या अप्यदितिः। किं बहुना जातम् उत्पन्नं प्राणिजातम् जनित्वम् जनिष्यमाणं च सर्वम् अदितिरेव। यद्वा, अदितिर्मन्त्रेण नोच्यते, द्यौरित्यादीनि सर्वाणि जनित्वान्तानि अदितिः अदितीनि अदीनानि महाभाग्य[1]युक्तानि सन्तु ॥१०॥

सायणभाष्यम्। अदितिर्द्यौरदितिरित्येषादितिदेवताके पशौ हविषो याज्या। सूत्रितं च। "अदितिर्द्यौरदितिरन्तरिक्षं न ते विष्णो जायमानो न जातः" [आ० श्रौ० सू० ३।८।१] इति।

अदितिः अदीनाखण्डनीया वा पृथिवी देवमाता वा सैव द्यौः द्योतनशीलो नाकः। सैव अन्तरिक्षम् अन्तरा द्यावापृथिव्योर्मध्य ईक्ष्यमाणं[2] व्योम। सैव [अदितिः] माता निर्मात्री जगतो जननी। [सः] सैव पिता उत्पादकः। ततश्च सः पुत्रः। मातापित्रोर्जातः पुत्रोऽपि सैव। विश्वे देवाः सर्वेऽपि देवा अदितिः एव। पञ्च जनाः निषादपञ्चमाश्चत्वारो वर्णाः। यद्वा गन्धर्वाः पितरो देवा असुरा रक्षांसि। तदुक्तं यास्केन। "गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके। चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवः" [नि० ३।७] इति। ब्राह्मणे त्वेवमाम्नातम्।

---

[1] Yāska has माहाभाग्य०.

[2] अन्तरिक्ष—would appear to have been derived from the root *kṣi* 'to dwell'. The derivation from *īkṣ* by popular etymology led to the spelling of the word with a long *ī* in later times. See p. 95.

सर्वेषां वा एतत्पञ्चजनानामुक्थं देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणां च पितृणां च [ऐ० ब्रा० ३१।७] इति, तत्र गन्धर्वाप्सरसामैक्यात्पञ्चजनत्वम्। एवंविधाः पञ्चजना अप्यदितिरेव। जातम् जननं प्रजानामुत्पत्तिः। सापि अदितिः एव। जनित्वम् जन्माधिकरणं तदपि अदितिः एव। एवं सकलजगदात्मनादितिः स्तूयते। उक्तं च यास्केन। "इत्यदितेर्विभूतिमाचष्टे" [नि० ४।२३] इति। अदितिः। दो अवखण्डने [धा° ४।४०]। अस्मात्कर्मणि क्तिनि 'द्यतिस्यतिमास्थामित्ति किति' [७।४।४०] इतीत्वम्। यास्कपक्षे तु दीङ् क्षये [धा° ४।२६] इत्यस्मात् क्तिनि व्यत्ययेन ह्रस्वत्वम्। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वम्। स पिता। निर्दिश्यमानप्रतिनिर्दिश्यमानयोरेकतामापादयन्ति सर्वनामानि पर्यायेण तल्लिङ्गतामुपाददत इत्युद्देश्यलिङ्गतया पुंलिङ्गत्वम्। जनित्वम्। जनेरौणादिकस्त्वन्-प्रत्ययः [उ° ४।१०४] ॥१०॥

सायणभाष्यम् (तैत्तिरीयारण्यकगतम्)। अदितिशब्दवाच्या देवता सर्वात्मकत्वेन स्तूयते—माता पृथिवी, अतो लोकत्रयात्मिका[1]। स देवताविशेषोऽदित्याख्यः। सर्वस्य जगतः पिता स एव पुत्रश्च। ये विश्वे देवाः सर्वेऽपि देवाः, ये च पञ्च जना निषादपञ्चमा ब्राह्मणक्षत्रियवैश्यशूद्रास्ते सर्वेऽप्यदितिरेव। जातं यत् पूर्वमुत्पन्नं जगत्, जनित्वं जननरूपो व्यापारः तत् सर्वमप्यदितिरेव ॥१०॥

With this stanza we may compare the sublime Greek inscription on an Egyptian temple to the Goddess Neith: *Egō eimi pan to gegonos kai on kai esomenon kai ton emon peplon oudeis pō thnētos apekalupsen.* 'I am all that is and that was and that shall be, and no mortal hath lifted my veil.' Similarly, Aeschylus says: "Zeus is the air, Zeus earth and Zeus the sky, Zeus everything, and all that's more than these.*"

---

[1] The Ānandāśrama edition reads: अतो लोकत्रयात्मिकायदेवताविशेषोऽदित्याख्यः which is meaningless.

* *Zeús e'στιν αι'θη'ρ, Zeùs δε γη, Zeùs δ' oùpαvós,*
Zεùs τοι τα` πα'ντα· Χωτι τωνδ' 'υπε'ρτερον.

अदिति:—The word *diti* (Gk. *de-si-s*) derived from *dā* 'to bind' means 'binding'. Hence *aditi* means 'unbinding', 'boundlessness'. Aditi is thus often invoked for the release of people from all bonds—from the bonds of sin and sorrow: अनागास्त्वं नो अदिति: कृणोतु i. 162. 22; विश्वस्मान्नो अदिति: पात्वंहसो माता मित्रस्य वरुणस्य रेवत: v. 36. 3. She is the universal Goddess: या प्राणेन सम्भवत्यदितिर्देवतामयी (*Kaṭhopaniṣad*, ii. 1.7). See p. 233.

पञ्च जना:—"Roth and Geldner think that all the peoples of the earth are meant: just as there are four quarters, there are people at the four quarters (N. E. S. W.), with the Aryan folk in the middle. Acc. to Zimmer the Aryans alone are meant, and in particular the five tribes of the Anus, Druhyus, Yadus, Turvaśas and Pūrus who are all mentioned together in one or perhaps two hymns of the Rigveda" (*Vedic Index*).

जनित्वम्—Under RV. i. 66. 8 यमो ह जातो यमो जनित्वम् S. says जनी प्रादुर्भावे। "कृत्यार्थे तवैकेन्०" इति कर्मणि त्वन्प्रत्यय:। इडागम:। नित्त्वादाद्युदात्तत्वम्। This is the correct derivation. *Cf.* नह्यस्य प्रतिमानमस्त्यन्तर्जातेषूत ये जनित्वा: RV. iv. 18. 4, "for there is no match for him among those who have been born nor those who will be born". "About a dozen gerundives...end in *-tva* which seems to be the infinitive stem in *-tu* turned into an adjective by means of the suffix *-a*" (Macdonell, *Vedic Grammar*). When जनित्वम् is accented on the final syllable as in RV. x. 18. 8 पत्युर्जनित्वमभि सं बभूव it means जनेर्भाव: and is formed with the taddhita suffix *-tva*.

THE AŚVINS

Characteristic Features

"Who are the Aśvins?" asks Yāska and answers, "Heaven and Earth say some, Day and Night answer others, The Sun and the Moon maintain others, two kings, performers of pious deeds, say the historians." (तत् कावश्विनौ ? द्यावापृथिव्यावित्येके । अहोरात्रावित्येके । सूर्याचन्द्रमसावित्येके । राजानौ पुण्यकृतावित्यैतिहासिका: । *Nir.* xii. 1). They are the most prominent of the Gods of light (य: परस्तु गण: सौर्यो सुस्थानस्तं निबोधत । तस्य मुख्यतरौ देवावश्विनौ सूर्यमाश्रितौ ॥ B. D. ii. 7-8.)

According to some, one of them was Dasra, *i.e.*, wonder-worker and the other Nāsatya *i.e.*, true, or saver (नासत्यश्चैव दस्रश्च यौ स्तुतावश्विनाविति BD. vii. 6). They were called Aśvins, because they were horsemen (अश्वैरश्विनावित्यौर्णवाभ: *Nir.* xii. 1.) Acc. to Yāska, they are called Aśvins, because they pervade everything, one with moisture, the other with light (अश्विनौ यद् व्यश्नुवाते सर्वं रसेनान्यो ज्योतिषान्य:). Modern scholars have variously explained them as the morning and evening twilight, the sun and moon, the morning and evening stars, the two stars of Gemini. They correspond to the Greek Dioskouri, Castor and Pollux, the sons of Heaven or Zeus, brothers of Helena (सूर्या), and to "the Sons of God", in Lettic mythology, "who come riding on their steeds to woo the daughter of the sun".

The Aśvins are the gods of light. They are physicians of the body as well as of the mind (अश्विनौ वै देवभिषजौ). They remove darkness and disease, danger and despondency. They are the never-failing rescuers of men in trouble.

"These Aryan Dioskouri are the earliest light-bearers in the morning sky. As soon as the first beams shine in

the east at break of day (उषसो व्युष्टौ) the sacrifice is made ready for the two sons of heaven, two eternally young and beautiful heroes of miraculous power and deep wisdom. With uplifted hands (उत्तानहस्त, Gk. *kheîras ānaskhōn*, Lat. *palmas tendens*) the singer sends up his devout song of praise as a messenger to the twins who overcome all darkness (तमोहना); he calls to these two helpers as a son to their parents (सूनुर्न पितरा विवक्मि vii. 67.1, अश्विनासत्ता वामिदं वयं पितुर्न नाम सुहवं हवामहे x. 39. 1). At their signal the golden sun-like chariot is harnessed, which stretches over all peoples, and with its wheels touches the ends of heaven and earth. The skilful Ṛbhus fashioned their chariot with three seats and three wheels; without horse and without bridle it glides sure and unwavering, as though on wings, to the house of the upright, bringing prosperity like a stream from the mountain (तं युञ्जाथां मनसो यो जवीयान् त्रिवन्धुरो वृषणा यस्त्रिचक्रः। येनोपयाथः सुकृतो दुरोणं त्रिधातुना पतथो विर्न पर्णैः॥ i. 183. 1, त्रिवन्धुरेण त्रिवृता रथेन त्रिचक्रेण सुवृता यातमर्वाक् i. 118. 2); or, drawn by golden-winged steeds like eagles, it hastens daily with the speed of wind through all the regions of air, through sea and rivers, swift as thought,—swifter even than a mortal's thought, swifter than the twinkling of an eye (मनसो जवीयान् रथः, i. 117. 2, निमिषश्चिज्जवीयसा रथेन viii. 62. 2). Towards the end of the night, the noble drivers mount the chariot, and with them Sūryā, the fair daughter of the Sun-God; she yielded herself to the beauteous heroes and also chose both youths for husbands, and all the gods assented from their hearts. The journey begins; day and night divide; the limits of darkness gradually become visible; the Helpers approach from night and need, rich in joy and rich in wealth, the two guardians of treasure, with abundant never-failing aid. As divine physicians they drive away sickness, bring medicines from far and near, and heal all that is hurtful; they give sight to

the blind and make the lame walk; they help onward the outcast and the slow, even though left far behind. Like rotten cords they snap asunder the net of calamity, and at the feasts their deeds of wonder in the father's times are loudly praised among the people (KAEGI, *The Rigveda*, pp. 49-50).

AS'VINS

i. 116

कक्षीवान् ऋषिः । त्रिष्टुप् छन्दः । अश्विनौ देवता ।

1

नासत्याभ्यां बर्हिरिव प्र वृञ्जे	नासत्याभ्याम् । बर्हिःऽइव । प्र । वृञ्जे ।
स्तोमाँ इयर्म्यभ्रियेव वातः ।	स्तोमान् । इयर्मि । अभ्रियाऽइव । वातः ।
यावर्भगाय विमदाय जायां	यौ । अर्भगाय । विऽमदाय । जायाम् ।
सेनाजुवा न्यूहतू रथेन ॥१॥	सेनाऽजुवा । निऽऊहतुः । रथेन ।

To the Nāsatyas (*Nā'satyābhyām*) I place [the kettle of milk] on the fire (*pra' vṛñje*) like Barhis (*barhíḥ iva*). I send forth (*iyarmi*) songs of praise (*stómān*), as the wind (*vā'taḥ*) the storm-clouds (*abhriyā iva*); [to them] who (*yáu*) led (*nyūhátuḥ*) a wife (*jāyā'm*) to the young (*árbhagāya*) Vimada (*Vimadā'ya*) in a chariot (*ráthena*) swift as arrow (*senājúvā*).

सायणः । सप्तदशेऽनुवाके पञ्च सूक्तानि । तत्र नासत्याभ्यामिति पञ्चविंशत्यृचं प्रथमं सूक्तम् । उशिक्संज्ञायामङ्गराजमहिष्या दास्यां दीर्घतमसोत्पादितः कक्षीवानस्य सूक्तस्य ऋषिः, त्रिष्टुप् छन्दः, अश्विनौ देवता । तथा चानुक्रान्तम् ।

'नासत्याभ्यां पञ्चाधिका कक्षीवान् दैर्घतमस[1] उशिक्प्रसूत आश्विनं वै' इति। तुह्यादिपरिभाषयेदमादीनि पञ्च सूक्तान्यश्विदेवत्यानि। [2]प्रातरनुवाकस्याश्विने क्रतौ त्रैष्टुभे छन्दसीदमादीनि त्रीणि सूक्तानि। अथाश्विन इति खण्डे सूत्रितम्—ग्रावाणेव नासत्याभ्यामिति त्रीणि [आ० श्रौ० ४।१५।३] इति। आश्विनशस्त्रे चैतानि शस्यानि प्रातरनुवाकन्यायेन [आ० श्रौ० ६।५।८] इत्यतिदिष्टत्वात्।

बर्हिरिव यथा कश्चिद् यजमानो यागार्थं बर्हिः प्रवृञ्जे प्रकर्षेणान्यूनानतिरिक्तं यागाय पर्याप्तं दर्भं वृङ्क्ते छिनत्ति सम्पादयतीति यावत्। एवम् अहं नासत्याभ्याम् अश्विभ्यां स्तोमान् स्तुतीः इयर्मि सम्पादयामि। एतदेव विशदीक्रियते। अभ्रियेव यथाभ्रियाण्यभ्रेषु मेघेष्ववस्थितान्युदकानि वातः वायुर्वर्षणार्थं बहुशः प्रेरयति, एवमहमश्विभ्यां स्तोत्राणीयर्मि बहुशः प्रेरयामि। कीदृशावश्विनौ? अर्भगाय बालाय स्वयंवरलब्धभार्याय विमदाय एतत्संज्ञकाय राजपथे मध्येमार्गं स्वयंवरार्थमागतैस्तामलभमानैरन्यैर्नृपैः सह योद्धुमशक्नुवतेऽपि तस्मै सेनाजुवा शत्रुसेनायाः प्रेरकेण शत्रुभिर्दुष्प्रापेण रथेन यावश्विनौ जायां भार्यां परैरनाक्रान्ताम्*। न्यूहतुः शत्रून् निहत्य तदीयं गृहं प्रापया-

---

[1] दीर्घतमस ऋषेः पुत्रः कक्षीवान्नाम ऋषिः। स उशिक्प्रसूतः। अङ्गराजस्य या महिषी तस्या या प्रधानदासी सोशिङ्नाम। उशिग वष्टेः कान्तिकर्मणः। पृषोदरादिः। पुरा किल गङ्गायामङ्गराजो युवतिभिः स्वपत्नीभिः सह जले चिक्रीड। तत्समीपं स्रोतसा वृद्धोऽन्धो दुर्बलो दुर्गन्धोऽशक्तोऽयमिति पतिद्वेषिण्या भार्यया पुत्रैर्दासैश्च प्रत्रे बद्धो गङ्गाया मध्ये प्रक्षिप्तः सर्वज्ञो महर्षिर्दीर्घतमा आजगाम। तं दृष्ट्वाङ्गराजोऽपि बन्धादुन्मुच्य स्थानं चास्मै कल्पयित्वा, हे भगवन्नपुत्रस्य मम ज्येष्ठमहिष्या पुत्रोत्पत्तिं कुर्विति ययाचे। स च तथेति प्रतिपेदे। अथ राजापि महिषीमुवाच—ऋषिं गच्छेति। सा चायमृषिर्वृद्धोऽन्धो दुर्बलः सुगन्धेतरगन्धाढ्य इति मत्वा राज्ञश्च भीतास्मै स्वदासीं प्राहिणोत्। सा चाङ्गराजमहिष्या प्रेरिता सर्वज्ञेन दीर्घतमसा दासीति ज्ञात्वा मन्त्रपूतजलाभिषिक्ता महातेजस्विन्यृषिपत्न्यभूत। स तस्यां कक्षीवन्तमुत्पादयामास। स एवार्थः समाम्नायते—कक्षीवन्तं य औशिज इति। तदेतदाह—उशिक्प्रसूत इति। आश्विनं वै। इदमादीनि पञ्चसूक्तान्यश्विदैवत्यानि। तुह्यिकेत-च्छन्दविशिष्टान्यृषिदैवतच्छन्दांसि द्वित्रिचतुष्पञ्चषट्सूक्तभाञ्जि यथासंख्यम् इति। षड्गुरुशिष्यः।

[2] प्रातरनुवाक etc. See pp. 8-9, 90.

* Many Mss. have अनुक्रान्ताम् for अनाक्रान्ताम्, but परैर्दुष्प्रापेण points to the latter.

मासतुः । ताभ्यामित्यर्थः ॥ नासत्याभ्याम् । सत्सु भवौ सत्यौ । न सत्यावसत्यौ । न असत्यौ नासत्यौ । नभ्राण्नपात्° [६।३।१५]. इत्यादिना नञः प्रकृतिभावः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । वृञ । वृजी* वर्जने [धा° २।१९] । आदादिकः । इदित्वान्नुम् । 'लोपस्त आत्मनेपदेषु' [७।१।४१] इति तलोपः । इयर्मि । ऋ गतौ† [धा° ३।१६] । जौहोत्यादिकः । अर्तिपिपर्त्योश्च [७।४।७७] इत्यभ्यासस्येत्वम्‡ । अभ्यासस्यासवर्णे [६।४।७८] इतीयङ् । अभ्रियेव । 'समुद्राभ्राद् घः' [४।४।११८] इति भवार्थे घः । घस्येयादेशः । 'शेश्छन्दसि बहुलम्' [६।१।७०] इति शेर्लोपः । अर्भगाय । अर्तिगृभ्यां भन् [उ० ३।१५२] इत्यर्तेर्भन् । अर्भ एवार्भकः । 'संज्ञायां कन्' [५।३।८७] । छान्दसो गकारः[1] । अपर आह—अर्भमल्पं गायति शब्दयतीत्यर्भगः । कै गै शब्दे [धा° १।९०१-२] । 'गापोष्टक्' [३।२।८] । 'आतो लोप इटि च' [६।४।६४] इत्याकारलोपः । तदेतत् पदकृतः शाकल्यस्याभिमतम् । सेनाजुवा । जु इति सौत्रो धातुर्गत्यर्थः । अस्मादन्तर्भावितण्यर्थात् क्विब्वचिप्रच्छि°[2] [काशिका ३।२।१७८] इत्यादिना क्विब्दीर्घौ । तन्वादित्वाद् [६।४।७७।१] उवङ् । न्यूहतुः । वह प्रापणे [धा° १।९८४] । लिट्यतुसि यजादित्वात् सम्प्रसारणम् । 'यद्वृत्तान्नित्यम्' [८।१।६६] इति निघातप्रतिषेधः ॥१॥

नासत्याभ्याम्—The exact meaning of the word नासत्य has not yet been settled. Yāska says: सत्यावेव नासत्यावित्यौर्णवाभः । सत्यस्य

---

* वृजी—all. Does Sāyaṇa regard the ई as a contraction of इ and ई, or does he read वृजि वर्जने ? Mādhava says इदित्वादीर्घत्वं वेयादयो दीर्घाश्च. We should say वृजी वर्जने । रौधादिकः ।

† The Dhātupāṭha has ऋ सृ गतौ.

‡ °स्येत्वम्—all.

[1] In the Uṇādi sūtras we find the rule अर्भकपृथुकपाका वयसि v. 53 on which Ujjvaladatta says: ऋधु वृद्धौ । अतो वुन्, भकारश्चान्तादेशः ।

[2] In the *Mahābhāṣya* (iii. 2. 1. 8) we find the Vārttika क्विब्विधिरनुपपदार्थकः and वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घश्च. The *Kaśikā* has क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणञ्च.

प्रणेतारावित्यौर्णवाभः। नासिकाप्रभवौ बभूवतुरिति वा। Some European scholars derive the word from the root *nas* to save, to heal.

प्रवृञ्जे—The root *vṛj* means 'to twist', *pra vṛj* means to twist forward, to hurl down, to place in or on the fire, to strew the sacrificial grass. The object is *barhiḥ* or *gharma* (hot milk). In stanza 24, प्रवृक्त means 'hurled down'.

स्तोमाँ इयर्मि—For sandhi, see p. 32.

इयर्मि—present 1st sing. of ऋ (जुहोत्यादि) to send forth, to go,. इयर्ति is read in the *Nighaṇṭu* in the list of verbs of motion. विप्रो मन्मानि दीर्घश्रुदियर्ति vii. 61. 2, the pious priest, heard afar, sends forth his hymns.

अभ्रिया—neut. acc. pl. of अभ्रिय derived from the cloud, which is an adj. used as a noun here.

अर्भगाय—occurs only here, अर्भक is fairly common.

विमदाय—*Cf.* RV. i. 112. 19 याभिः पत्नीर्विमदाय न्यूहथुः, i. 117. 20 युवं शचीभिर्विमदाय जायां न्यूहथुः पुरुमित्रस्य योषाम् (योषाम् कुमारीम्, दुहितरम्), x. 65. 12 कमद्युवं विमदायोहथुर्युवम्. So the name of the wife was Kamadyū and she was the daughter of Purumitra.

सेनाजुवा—सेने जवत इति सेनाजूः, तेन। सेना means missile from सो to discharge. As सेना is neither a गति nor a कारक, the *ū* is not changed into *v* acc. to ओः सुपि vi. 4. 85 because the Bhāṣyakāra says: गतिकारकपूर्वस्येष्यते. जु is not read in the Dhātupāṭha, though it is used in the rule जुचङ्क्रम्य etc. iii. 2. 150. सेनाजुवा can also be regarded as a nom. dual referring to the Nāsatyas.

2

वीळुपत्मभिराशुहेमभिर्वा
देवानां वा जूतिभिः शाशदाना।
तद्रासभो नासत्या सहस्र-
माजा यमस्य प्रधने जिगाय ॥२॥

वीळुपत्मऽभिः। आशुहेमऽभिः। वा।
देवानाम्। वा। जूतिऽभिः। शाशदाना।
तत्। रासभः। नासत्या। सहस्रम्।
आजा। यमस्य। प्रऽधने। जिगाय॥

Who had become conspicuous (*śā'śadānā*) by their strong-winged (*vīḷupátmabhiḥ*) quick-flying (*āśuhémabhiḥ*) [steeds] or (*vā'...vā*) the inciting shouts (*jū'tibhiḥ*) of the Gods (*devā'nām*). Then (*tát*) your ass (*rā'sabhaḥ*), O Nasatyas (*Nāsatyā*), won (*jigāya*) the thousand (*sahásram*) [ṛks] in the contest (*ājā'*) of Yama (*Yamásya*) by way of prize (*pradháne*).

सायणः। वीळुपत्मभिः। वीड्विति बलनाम। बलवदुत्पतनैः आशुहेमभिः शीघ्रगमनैः। वाशब्दः समुच्चये। हे नासत्या अश्विनौ। एवम्भूतैरश्वैश्च देवानाम् इन्द्रादीनां जूतिभिः प्रेरणैश्च शाशदाना शाशद्यमानयोरत्यर्थं प्रेर्यमाणयोर्युवयोर्वाहनभूतो यो रासभः प्रजापतिना दत्तः सः यमस्य वैवस्वतस्य प्रीतिकरे प्रधने प्रकीर्णधनोपेते आजा आजौ संग्रामे तत् शत्रूणां सहस्रम् जिगाय जितवान्। वैवस्वतो हि बहूनां मरणहेतुना संग्रामेण तुष्टो भवति। यद्वा जेतव्यत्वेन प्रजापतिना निहितमृक्सहस्रं शीघ्रगमनयुक्तो रासभो जिगाय जयेनालभत। अन्येभ्यो देवेभ्यः पूर्वमेवाजिं प्राप्य युवां जयं प्रापयामास। तथा चास्मिन्नर्थे [1]प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् [ऐ० ब्रा० १७।१] इत्यादिकं ब्राह्मणमनुसन्धेयम्॥ वीळुपत्मभिः वीळु बलवत्पतन्त्युत्पतन्तीति वीळुपत्मानः। आशुहेमभिः। आशु शीघ्रं हिन्वन्ति गच्छन्तीत्याशुहेमानः। तैः। हि गतौ वृद्धौ च [धा° ५।११]। अन्येभ्योऽपि दृश्यन्ते [३।२।७५] इति मनिन्। कृदुत्तरपदप्रकृतिस्वरत्वम्। जूतिभिः। 'ऊतियूतिजूति°' [३।३।९७] इत्यादिना क्तिन उदात्तत्वम्। शाशदाना। शद्लृ शातने [धा° १।८४०], अत्र गत्यर्थः, धातूनामनेकार्थत्वात्। अस्माद् यङन्ताल्लटः शानच्। तस्य 'छन्दस्युभयथा' [३।४।११७] इत्यार्धधातुकत्वा-

---

[1] प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् सूर्यां सावित्रीम्। तस्यै सर्वे देवा वरा आगच्छन्। तस्या एतत्सहस्रं वहतुमन्वाकरोत्। यदेतदाश्विनमित्याचक्षते। अनाश्विनं ह वै तद् यदर्वाक्सहस्रम्। तस्मात्तत् सहस्रं वैव शंसेद् भूयो वा।...तस्मिन् देवा न समजानत। ममेदमस्तु ममेदमस्त्विति। ते संजानाना अब्रुवन्। आजिमस्यायामहै। स यो न उज्जेष्यति तस्येदं भविष्यतीति। तेऽग्नेरेवाधि गृहपतेरादित्यं काष्ठामकुर्वत।

च्छवभावः। अतोलोप-यलोपौ। अभ्यस्तानामादिः [६।१।१८९] इत्याद्युदात्तत्वम्। 'सुपां सुलुक्°' [७।१।३९] इति षष्ठ्याः पूर्वसवर्णदीर्घः। आजा। तेनैव सूत्रेण डादेशः। जिगाय। जि जये [धा° १।५५४]। सन्लिटोर्जेः [७।३।५७] इत्यभ्यासादुत्तरस्य कुत्वं गकारः ॥२॥

स्कन्दस्वामी। अत्र प्रजापतिर्वै सोमाय राज्ञे [ऐ० ब्रा° १७।१] इत्याद्यैतरेयब्राह्मणाधीतमिहाक्रष्टव्यम्। प्रजापतिः सवितुर्दुहितरं सूर्यां सोमाय राज्ञे प्रायच्छत्। ये त्वन्ये देवास्तां वरयितुमागच्छंस्तेभ्यो विवाहादनन्तरमृक्सहस्रमददाद् यदेतदाश्विनं नाम। तस्मिन् देवा विवादमकुर्वन्—ममेदमस्तु ममेदमस्त्विति। तेऽब्रुवन्—आजिं धावाम। यो नो जेष्यति तस्येदं भविष्यतीति। तेऽग्नेर्गृहपतेरुपर्यादित्यं काष्ठां कृत्वाभ्यधावन्। काष्ठा आज्यन्त उच्यते। अश्वतरीरथेनाग्निराजिमधावत्, गोभिररुणैरुषाः, हरिरथेनेन्द्रः, गर्दभरथेनाश्विनौ। तत्राश्विनावजयतामिति। तदेतदिहोच्यते—वीळुपत्मभिरित्यादिना। वीळु दृढं पत्म पतनं येषाम्। सन्ततमपि गच्छतां येषां गतिर्न हीयत इत्यर्थः। ते वीळुपत्मानोऽश्विनोः स्वभूता रासभाः। तैर्वीळुपत्मभिः। आशुहेमभिः वा। हि गतौ। वाशब्दश्चात्र चार्थे। शीघ्रगामिभिश्च। देवानां वा जूतिभिः। अत्रापि वाशब्दश्चार्थ एव। जूतिभिरिति जवतेर्गत्यर्थस्य करणे क्तिन्प्रत्ययः। देवानां च गमनैः। देवानामेव योग्या नान्यस्येत्यर्थः। ते शाशदाना। शदिर्गत्यर्थः। ताच्छील्ये चात्र कानच्। षष्ठीद्विवचनस्य चाकारः। गमनशीलयोर्द्वयोः स्वभूतो रासभः गर्दभः रथे नियुक्तः सन् हे नासत्यौ [नासत्या] तत् सहस्रम्। तच्छब्दश्रुतेरुक्तेतिहासार्थयुक्तो यच्छब्दोऽध्याहार्यः। यत् सूर्याविवाहानन्तरं प्रजापतिर्देवेभ्योऽददात् तत्सहस्रमृचाम्। आजा अश्वादेर्धावनभूमिराजिरुच्यते। तस्याम्। यमस्य। तमसां यमनाद्यम आदित्य इहोच्यते। तस्य सम्बन्धिन्याम्। कः पुनरादित्यस्याजिसम्बन्धः? उच्यते। आदित्यस्तस्या अन्त आसीत्। तथाहि ब्राह्मणम्—तेऽग्नेर्गृहपतेरुपर्यादित्यं काष्ठामकुर्वत* [ऐ० ब्रा० १७।१]

---

* AB. reads तेऽग्ने रेवाधि गृहपतेरादित्यं काष्ठामकुर्वत.

इति। प्रधने संग्रामे। अन्यादिभिः सह संस्पर्धायामित्यर्थः। जिगाय जितवान् ॥२॥

वीळुपत्मभिः—वीळु पत्म येषां तैः. Though a Bahuvrīhi, the second member is accented acc. to परादिश्छन्दसि बहुलम् vi. 2. 199. वीळु—(*ui-z-d-u) strong. वीड्वङ्ग—strong of limbs (दृढाङ्ग—Yāska), vīḍayati makes strong, fast (दृढीकरणं Yāska). Lat. vi-r-ēs. Skt. patman, Gk. potmos, potamos flight, course, path, way.

आशुहेमभिः—आशु हेम येषां तैः. हेम (from हि to impel) impulse.

जूतिभिः—Mod. Persian zōr 'strength' is derived from the same root. जूतिर्गतिः प्रीतिर्वा। Nir.

शाशदाना—perf. part. of śad to prevail. See under i. 124. 6.

रासभः—The ass is the vāhana of the two Aśvins. रासभः अश्विनोरश्वयाम् BD.

आजा—loc. sing. of आजि. Alt. form आजौ. The form in au in the case of i-stems is much more common than that in ā in masc. and fem. आजौ is read in the list of संग्रामनाम in the Nighaṇṭu, but आजि in Vedic literature generally means a race and rarely a battle. Gk. agōn 'contest'.

प्रधन—the prize of the contest. धन (from धा to put) also means the prize of the contest, the booty. Cf. Gk. théma the thing proposed as a prize. Yāska says: प्रधनमिति संग्रामनाम, प्रकीर्णान्यस्मिन् धनानि भवन्ति। Nir. ix. 23. Cf. सहस्रं गवां मुद्गलः प्रधने जिगाय RV. x. 102. 5.

3

तुग्रो ह भुज्युमश्विनोदमेघे	तुग्रः। ह। भुज्युम्। अश्विना। उदऽमेघे।
रयिं न कश्चिन्ममृवाँ अवाहाः।	रयिम्। न। कः। चित्। ममृऽवान्। अव। अहाः।
तमूहथुर्नौभिरात्मन्वतीभि-	तम्। ऊहथुः। नौभिः। आत्मन्ऽवतीभिः।
रन्तरिक्षप्रुद्भिरपोदकाभिः ॥३॥	अन्तरिक्षप्रुत्ऽभिः। अपऽउदकाभिः॥

Tugra (*Túgraḥ*) had abandoned (*áva ahāḥ*), O Aśvins (*Aśvinā*), Bhujyu (*Bhujyúm*) in a vast sheet of water (*uda-meghé*), like (*ná*) a dying man (*káścit mamṛvā́n*) his treasure (*rayim*). You carried (*ūhathuḥ*) him (*tám*) in your animated (*ātmanvátībhiḥ*) air-crossing (*antarikṣa-prúdbhiḥ*) water-tight (*ápodakābhiḥ*) ships (*naubhíḥ*).

सायणः। अत्रेयमाख्यायिका। तुग्रो नामाश्विनोः प्रियः कश्चिद्राजर्षिः। स च द्वीपान्तरवर्तिभिः शत्रुभिरत्यन्तमुपद्रुतः संस्तेषां जयाय स्वपुत्रं भुज्युं सेनया सह नावा प्राहैषीत्। सा च नौर्मध्येसमुद्रमतिदूरं गता वायुवशेन भिन्नासीत्। तदानीं स भुज्युः शीघ्रमश्विनौ तुष्टाव। तौ च स्तुतौ सेनया सहितमात्मीयासु नौष्वारोप्य पितुस्तुग्रस्य समीपं त्रिभिरहोरात्रैः प्रापयामासतुरिति। अयमर्थं इदमादिकेन तृचेन प्रतिपाद्यते। हशब्दः प्रसिद्धौ। तुग्रः ह खलु पूर्वं शत्रुभिः पीडितः संस्तज्जयार्थम् उदमेघे, उदकैर्मिह्यते सिच्यत इत्युदमेघः समुद्रः, तस्मिन् भुज्युम् एतत्संज्ञकं प्रियं पुत्रम् अवाहाः नावा गन्तुं पर्यत्याक्षीत्। तत्र दृष्टान्तः। ममृवान् म्रियमाणः सन् धनलोभी कश्चित् मनुष्यः रयिम् न यथा धनं परित्यजति तद्वत्। हे [अश्विना] अश्विनौ तम् च भुज्युं मध्येसमुद्रं निमग्नं नौभिः पितृसमीपम् ऊहथुः युवां प्रापितवन्तौ। कीदृशीभिः? आत्मन्वतीभिः आत्मीयाभिर्युवयोः स्वभूताभिरित्यर्थः। यद्वा धृतिरात्मा धारणावतीभिरित्यर्थः। अन्तरिक्षप्रुद्भिः अतिस्वच्छत्वादन्तरिक्षे जलस्योपरिष्टादेव गन्त्रीभिः अपोदकाभिः सुश्लिष्टत्वादपगतोदकाभिरप्रविष्टोदकाभिरित्यर्थः। उदमेघे। मिह सेचने [धा° १।९७२]। कर्मणि घञ्। न्यङ्क्वादीनां च [७।३।५३] इति कुत्वम्। उदकस्योदः संज्ञायाम् [६।३।५७]। थाथादिना [६।२।१४४] उत्तरपदान्तोदात्तत्वम्। ममृवान्। मृङ् प्राणत्यागे [धा° ६।११९]। लिटः क्वसुः। क्रादिनियमात् [७।२।१३] प्राप्तस्येटः वस्वेकाजाद्घसाम् [७।२।६७] इति नियमादभावः। अहाः। ओहाक् त्यागे [धा° ३।८]। लुङि तिपि च्लेः सिच्। आगमानुशासनस्यानित्यत्वात् सगिटौ न

क्रियेते। बहुलं छन्दसि [७।३।९७] इतीडभावः। 'हल्ङ्याब्भ्यः°' [६।१।६८] इति तिलोपः। हत्वविसर्गौ। यद्वा। 'मन्त्रे घस°' [२।४।८०] इति च्लेर्लुक्। च्लेर्लुक्त्वादिण् न क्रियते। नौभिः। 'सावेकाचः°' [६।१।१६८] इति विभक्तेरुदात्तत्वम्। आत्मन्वतीभिः। आत्मनो मतुप्। 'मादुपधायाः°' [८।२।९] इति वत्वम्। 'अनो नुट्' [८।२।१६] इति नुट्। नलोपः। 'ह्रस्वनुड्भ्यां मतुप्' [६।१।१७६] इति मतुप उदात्तत्वम्। अन्तरिक्षप्रुद्भिः। प्रुङ् गतौ [धा° १।९३७]। क्विप् च [३।२।७६] इति क्विप् ॥३॥

स्कन्दस्वामी। तुग्र इति योऽयमित्यभिसम्बन्धात् पितृशब्देनेदं पुत्रस्याभिधानम्। द्वितीयार्थे च प्रथमा। हेति पदपूरणम्। तुग्रपुत्रं भुज्युं नाम राजानं हे अश्विनौ उदमेघे। मिह सेचने। उदकेन सिञ्चति सिच्यते वेत्युदमेघः समुद्रः। तत्र। रयिं न कश्चिन्ममृवान् यथा धनं कश्चिन्म्रियमाणो जहाति, एवम् अवाहाः। अवेत्येष परीत्येतस्य स्थाने। ओ हाक त्यागे। प्रथमपुरुषबहुवचनस्य स्थाने मध्यमपुरुषैकवचनमेतत्[1]। विपन्ननावं सन्तं परित्यक्तवन्तः। के? सखायः। कुत एतत्? उत त्यं भुज्युमश्विना [ऋ० सं० ७।६८।७] इति मन्त्रान्तरे दर्शनात्। तम् युवाम् ऊहथुः तटं प्रापितवन्तौ। उत्तारितवन्तावित्यर्थः। केन? उच्यते। नौभिः। कीदृशीभिः? उच्यते। आत्मन्वतीभिः। आत्मसंयुक्ताभिः। स्वयमेवेत्यर्थः। अन्तरिक्षप्रुद्भिः। प्रवत इति गतिकर्मा। अन्तरिक्षगामिनीभिः। उदकमसंस्पृशन्तीभिरिव गच्छन्तीभिरित्यर्थः। अपोदकाभिः व्यपगतोदकाभिः। मनागप्युदकेनाभिद्यमानाभिरित्यर्थः। तदेतत् कुत्सेनाप्युक्तम्—भुज्युं याभिः [ऋ० सं० १।११२।६, २०] इति ॥३॥

स्कन्दस्वामी। [१।१।११२] भुज्युं नाम राजानं समुद्रमध्ये विपन्ननावं सखायस्तत्यजुः। तदेतद्वसिष्ठो वक्ष्यति—उत त्यं भुज्युम् [ऋ० सं० ७।६८।७]। स सखिभिस्त्यक्तोऽश्विनौ तुष्टाव। तमश्विनावागत्य नौभीरथैरश्वैरुत्तारितवन्ताविति।

---

[1] This is not correct. See Sāyaṇa.

तुग्र:—from *tuj* 'to urge' with the suffix *ra*.

भुज्युम्—In the Uṇādi sūtras the word is derived from the root भुज् with the suffix युक्. भुजिमृङ्भ्यां युक्त्युकौ iii. 20.

उदमेघे—occurs only here in RV. उदकस्य मेघ उदमेघः। समासस्य इत्यन्तोदात्तत्वम्। उदक never occurs in RV. as a member of a compd.; it is always उदन्.

ममृवान्—perf. part. nom. s. masc. of मृ, lit. dead, here *dying*. For sandhi see p. 32.

अवाहा:—as the upasarga is accented and not the verb, they are regarded as separate words.

अहा:—*s*-aor. 3 sing. of हा to leave; classical अहासीत् with ईट् acc. to अस्तिसिचोऽपृक्ते vii. 3. 96.

आत्मन्वतीभि:—Stems ending in *n* retain their final before the suffix *-vant* in the Vedas. रोमण्वान्, आत्मन्वान्. *Cf.* RV. i. 182. 5: युवमेतं चक्रथुः सिन्धुषु प्लवमात्मन्वन्तं पक्षिणं तौग्र्याय कम्। You brought to the son of Tugra in the streams a winged boat possessed of a soul. RV. xi. 24. 4 आत्मन्वन्नभो दुह्यते घृतं पयः. From the living sky (the Soma plant) are milked ghee and milk.

अन्तरिक्षप्रुद्भि:—Sailing in the air. The root is *pru* (*cf. plu* float). *Pravate* is read in the list of verbs of motion in the *Nighaṇṭu*

Bhujyu, son of Tugra, was abandoned by his malevolent companions in the middle of the sea (उत त्यं भुज्युमश्विना सखायो मध्ये जहुर्दुरेवासः समुद्रे vii. 68. 7). He clung to a log for support in the midst of the waves. (कः स्विद्वृक्षो निष्ठितो मध्ये अर्णसो यं तौग्र्यो नाधितः पर्यषस्वजत् i. 182. 7). The Aśvins carried Bhujyu out of the liquid ocean in a hundred-oared ship. "They rescued him with animated water-tight ships which traversed the air, with four ships, with an animated winged boat, with three flying cars having a hundred feet and six horses, with their headlong flying steeds, with their well-yoked chariot swift as thought" (*Vedic Mythology*). See RV. i. 112. 6,20; 117. 14-15, 118. 6, 119. 4, 8; 158, 3; 180. 5; 182. 5-7; vi. 62. 6; vii. 68. 7, 69. 7; viii. 3. 23, 5. 22; x. 39. 4, 40, 7; 65. 12, 143. 5.

4

तिस्रः क्षपस्त्रिरहातिव्रजद्भि-
र्नासत्या भुज्युमूहथुः पतङ्गैः ।
समुद्रस्य धन्वन्नार्द्रस्य पारे
त्रिभी रथैः शतपद्भिः षळश्वैः ॥४॥

तिस्रः । क्षपः । त्रिः । अहा । अतिव्रजत्ऽभिः ।
नासत्या । भुज्युम् । ऊहथुः । पतङ्गैः ।
समुद्रस्य । धन्वन् । आर्द्रस्य । पारे ।
त्रिऽभिः । रथैः । शतपत्ऽभिः । षट्ऽअश्वैः ॥

With birds (*patañgáiḥ*) persevering (*ativrájadbhiḥ*) for three nights (*tisráḥ kṣápaḥ*) and three days (*tríḥ áhā*), O Nāsatyas (*Nā'satyā*), you carried (*ūhathuḥ*) Bhujyu (*Bhujyúm*), on the shore (*dhánvan*) of the sea (*samudrásya*), on the bank (*pāré*) of the wet (*ārdrásya*), with three (*tribhíḥ*) hundred-footed (*śatápadbhih*) six-horsed (*ṣáḷaśvaiḥ*) chariots (*ráthaiḥ*).

सायणः । [नासत्या] हे नासत्यौ सेनया सहोदके निमग्नं भुज्युम् तिस्रः क्षपः त्रिसंख्याका रात्रीः त्रिः अहा त्रिवारमावृत्तान्यहानि च अतिव्रजद्भिः अतिक्रम्य गच्छद्भिः, एतावन्तं कालमतिव्याप्य वर्तमानैः पतङ्गैः पतद्भिः त्रिभिः त्रिसंख्याकैः रथैः ऊहथुः युवामूढवन्तौ । क्वेति चेत्, उच्यते । समुद्रस्य अम्बुराशेर्मध्ये धन्वन् धन्वनि जलवर्जिते प्रदेशे, तथा आर्द्रस्य उदकेनार्द्रीभूतस्य समुद्रस्य पारे तीरदेशे च । कथंभूतै रथैः । शतपद्भिः शतसंख्याकैश्चक्रलक्षणैः पादैरुपेतैः षळश्वैः षड्भिरश्वैर्युक्तैः ॥ तिस्रः । 'त्रिचतुरोः स्त्रियाम्०' [७।२।९९] इति त्रिशब्दस्य तिस्रादेशः । स चान्तोदात्तः । 'अचि र ऋतः' [७।२।१००] इति रेफादेशे 'उदात्तयणो हल्पूर्वात्' [६।१।२२४] इति विभक्तेरुदात्तत्वम् । क्षपः । विभक्त्यन्तस्य छान्दसं ह्रस्वत्वम् । यद्वा शसि "आतः०" [६।४।१४०] इति योगविभागाद्धातोरप्याकारलोपः । अहा । शेश्छन्दसि बहुलम् [६।१।७०] इति शेर्लोपः । पतङ्गैः । पत्लृ गतौ [धा° १।८३१] ।

पतेरङ्गच् [उ० १।११६] । धन्वन् । धविर्गत्यर्थः[1] [धा° १।५८९] । इदित्वान्नुम् । 'कनिन्युवृषि'' [उ° १।१५६] इत्यादिना कनिन् । 'सुपां सुलुक्°' [७।१।३९] इति सप्तम्या लुक् । शतपद्भिः । शतं पादा येषाम् [तैः] । संख्यासुपूर्वस्य [५।४।१४०] इति पादशब्दस्यान्त्यलोपः समासान्तः । अयस्मयादित्वेन [१।४।२०] भत्वात् 'पादः पत्' [६।४।१३०] इति पद्भावः । यद्वा । पादशब्दसमानार्थः पच्छब्दः प्रकृत्यन्तरं द्रष्टव्यम् ॥४॥

स्कन्दस्वामी । [तिस्रः क्षपः त्रिः अहा] । क्षपेति रात्रिनाम । तिस्रो रात्रीस्त्रीणि चाहानि सातत्येनातिव्रजद्भिः सुष्ठु गच्छद्भिः [नासत्या] हे नासत्यौ भुज्युम् ऊहथुः पतङ्गैः । पतङ्ग इत्यश्वनाम । अश्वैः । क्व प्रदेशे ? उच्यते । समुद्रस्य एकदेशभूते धन्वन् धन्वनि निरुदकप्रदेशे । आर्द्रस्य पारे सोदकः प्रदेश आर्द्रः । तस्य पारेऽन्ते । समुद्रस्य मध्ये या उदकेन परिक्षिप्ताः···तास्वित्यर्थः । न च केवलैरश्वैः । किं तर्हि ? त्रिभिः रथैः । रथैश्च त्रिभिः । द्वाभ्यामात्मनो यानाभ्यामेकेन भुज्योः । कीदृशैः ? शतपद्भिः शतपादैः[2] । शतशब्दश्चात्र बहुनाम, सामर्थ्याच्चात्र पादो बहुत्वे वर्तते । पादशब्दोऽपि चक्रपादवचनः । त्रिचक्रपादैरित्यर्थः । कुत एतत् ? 'क्व त्री चक्रा त्रिवृतो रथस्य' [ऋ° सं° १।३४।२] इत्येवमादिषु मन्त्रान्तरेष्वश्विनो रथस्य त्रिचक्रत्वदर्शनात् । षळश्वैः षड्भिरश्वैर्युक्तैः ॥४॥

क्षपः—acc. pl. of the fem. stem *kṣap* (Av. O. Pers. *xšap*). In the Vedas *kṣapābhiḥ* occurs after the analogy of the Inst. s. *kṣapā*. From this arose the later stem *kṣapā*. The compd. क्षपाह is used in the sense of 'night and day'.

त्रिरहा—त्रिः means thrice. Here it is used for the sake of metre in the sense of त्री(=त्रीणि). *Cf.* त्री षधस्था: सिन्धवस्त्रिः कवीनाम् RV. iii. 56. 5, त्रिरुत्तमा दूणशा रोचनानि त्रयो राजन्त्यसुरस्य वीराः RV. iii. 56. 8. As the first member of a compound त्रिः is sometimes read for त्रि; *e.g.*, त्रिरश्रि three-edged. Skt. *triḥ*, Gk. *tris*, Av. *θriš*.

---

[1] रिवि रवि धवि गत्यर्थाः ।

[2] संख्यासुपूर्वस्य [५।४।१४०] इत्यनेन पादशब्दान्तस्य लोपः प्राप्तः ।

अतिव्रजद्भिः—(*ati* extending beyond, over and *vraj* proceed) flying over.

पतङ्गैः—In the *Nighaṇṭu* पतङ्ग is read in the list of अश्वनाम. The birds are the steeds of the Aśvins. *Cf*. i. 118. 4 : आ वां श्येनासो अश्विना वहन्तु रथे युक्तास आशवः पतङ्गाः । ये अप्तुरो दिव्यासो न गृध्रा अभि प्रयो नासत्या वहन्ति ॥

धन्वन्—loc. sing., desert, waste-land, strand. This word along with समुद्रः, सागरः etc. is read in the list of अन्तरिक्षनाम in the *Nighaṇṭu*.

5

अनारम्भणे तदवीरयेथा-	अनारम्भणे । तत् । अवीरयेथाम् ।
मनास्थाने अग्रभणे समुद्रे ।	अनास्थाने । अग्रभणे । समुद्रे ।
यदश्विना ऊहथुर्भुज्युमस्तं	यत् । अश्विनौ । ऊहथुः । भुज्युम् । अस्तम् ।
शतारित्रां नावमातस्थिवांसम् ॥५॥	शतऽअरित्राम् । नावम् । आतस्थिऽवांसम् ॥

You played the hero (*tát avīrayethām*) on the sea (*samudré*) where there is nothing to lean upon (*anārambhaṇé*), nothing to stand upon (*anāsthāné*), nothing to catch hold of (*agrabhaṇé*), where (*yát*), O Aśvins (*Aśvinā*), you carried (*ūháthuḥ*) home (*ástam*) Bhujyu (*Bhujyúm*) who had boarded (*ātasthivā'ṁsam*) [your] ship (*nā'vam*) with a hundred ores (*śatā'ritrām*).

सायणः । हे अश्विनौ अनारम्भणे आलम्बनरहिते समुद्रे तत् कर्म अवीरयेथाम् विक्रान्तं कृतवन्तौ युवाम् । अनारम्भणत्वमेव स्पष्टीकरोति । अनास्थाने आस्थीयतेऽस्मिन्नित्यास्थानो भूप्रदेशः, तद्रहिते स्थातुमशक्ये जल इत्यर्थः । अग्रभणे अग्रहणे हस्तेन ग्राह्यं शाखादिकमपि यत्र नास्ति तस्मिन्नित्यर्थः । किं पुनस्तत् कर्म ? भुज्युं समुद्रे मग्नं शतारित्राम् बह्वरित्राम् । यैः काष्ठैः पार्श्वतो बद्धैर्जलालोडने सति नौः शीघ्रं गच्छति तान्यरित्राणि । ईदृशीं नावम् आतस्थिवांसम् आस्थितवन्तमारूढवन्तं कृत्वा

अस्तम्। गृहनामैतत्। पितुस्तुग्रस्य गृहं प्रति यत् जह्युः प्रापयामासथुः तत् प्रापणमन्येदुःशाकं युवां समुद्रमध्ये कृतवन्ताविस्यर्थः॥ अनारम्भणे। आरभ्यत इत्यारम्भणम्। 'कृत्यल्युटो बहुलम्' [३।३।११३] इति कर्मणि ल्युट्। 'नञ्सुभ्याम्' [६।२।१७२] इत्युत्तरपदान्तोदात्तत्वम्। अवीरयेथाम्। *वीर विक्रान्तौ [धा° १०।३५९]। चुरादिरात्मनेपदी। अनास्थानाग्रभणयोः पूर्ववल्लुट्स्वरौ। अयं तु विशेषः। 'ह्यग्रहोर्भ°' [८।२।३२।१] इति भत्वम्। अस्तम्। अस्यतेऽस्मिन् सर्वमित्यस्तं गृहम्। †असिहसि°' [Cf. उ° ३।८६] इत्यादिना तन्प्रत्ययः। शतारित्राम्। ऋ गतौ। अर्तिलूधूसू° [३।२।१८] इति करण इत्रप्रत्ययः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्॥५॥

अनारम्भणे—*Cf*. RV. i. 182, 6:

> अवविद्धं तौग्र्यमप्स्वन्तरनारम्भणे तमसि प्रविद्धम्।
> चतस्रो नावो जठलस्य जुष्टा उदश्विभ्यामिषिताः पारयन्ति॥

रभ् is a collateral form of ग्रभ् and means touch, grasp. Hence आरम्भण means अवलम्बन, support.

अवीरयेथाम्—Impf. 2. du. Ātm. of the denom. of वीर.

अस्तम्—see under x. 34, 10. गृहा वा अस्तम् SB. ii. 5. 2. 21.

शतारित्राम्—Skt. *aritra* oar, Gk. *aratron*, Lat. *aratrum* plough.

6

यमश्विना ददथुः श्वेतमश्व-	यम्। अश्विना। ददथुः। श्वेतम्। अश्वम्।
मघाश्वाय शश्वदित् स्वस्ति।	अघऽअश्वाय। शश्वत्। इत्। स्वस्ति।
तद्वां दात्रं महि कीर्तेन्यं भू-	तत्। वाम्। दात्रम्। महि। कीर्तेन्यम्। भूत्।
त्पैद्वो वाजी सदमिद्धव्यो अर्यः॥६॥	पैद्वः। वाजी। सदम्। इत्। हव्यः। अर्यः॥

---

* शूर वीर विक्रान्तौ—all, but चुरादिरात्मनेपदी is sing.

† Both the Pañcapādī and the Daśapādī read the rule without असि.

The white (*śvetám*) horse (*áśvam*) which (*yám*) you gave (*dadáthuḥ*), O Aśvins (*Aśvinā*), to him, whose horse was vicious *aghā'śvāya*), a lasting (*śáśvat it*) blessing (*svasti*), this (*tát*) great (*máhi*) gift (*dātrám*) of yours (*vām*) is (*bhūt*) to be glorified (*kīrtényam*), the horse (*vājī'*) of Pedu (*Paidváḥ*) is always *sádam it*) to be invoked (*hávyaḥ*) by a noble man (*aryáḥ*).

सायणः । अत्रेदमाख्यायते । पेदुर्नाम कश्चित्, स चाश्विनौ तुष्टाव । तस्मै प्रीतौ [तौ] कञ्चिच्छ्वेतवर्णमश्वं दत्तवन्तौ । स चाश्वस्तस्य प्रौढं जयं चकारेति । एतदत्र प्रतिपाद्यते । हे [अश्विना] अश्विनौ युवाम् अघाश्वाय अहन्तव्याश्वाय पेदुनाम्ने राजर्षये यम् श्वेतवर्णम् अश्वम् ददथुः दत्तवन्तौ सोऽश्वस्तस्मै स्वस्ति जयलक्षणं मङ्गलं शश्वत् इत् नित्यमेव चकार। वां युवयोः तत् दात्रं दानं महि महद् अतिगम्भीरम् अत एव कीर्तेन्यम् सर्वैः कीर्त्तनीयं प्रशस्यं भूत् अभूत्[1] । तस्मात् पैद्वः पेदोः सम्बन्धी पतनशीलः शीघ्रगामी वा अर्यः शत्रूणां प्रेरयिता युद्धेषु प्रेरयितव्यो वा वाजी वेजनवान्[2] [नि° २।२८] सोऽश्वः सदम् इत् सदैव हव्यः अस्माभिरप्याह्वातव्यः ॥ दात्रम् ददातेर्भाव औणादिकस्त्रप्रत्यय ।[3] महि । मह पूजायाम् [धा° १।७१६] । इन् सर्वधातुभ्यः* [उ° ४।११७] इतीन् । कीर्तेन्यम् । कॄत संशब्दने [धा° १०।११८] । 'कृत्यार्थे तवैकेन्केन्यत्वनः' [३।४।१४] इति केन्यप्रत्ययः । 'ॠत इद्धातोः' [७।१।१००] इतीत्वम् । भूत् । 'बहुलं छन्दस्यमाङ्योगेऽपि' [६।४।७५] इत्यडभावः । पैद्वः । पेदोः सम्बन्धी । "तस्येदम्" [४।३।१२०] इत्यण् । छान्दसो वर्णलोपः[4] ।

---

[1] भवति VM.

[2] ओ विजी भयचलनयोः । भयवान् । परेभ्यो भयदाता । परेषां हि तं दृष्ट्वा भयमुत्पद्यते । चलनवान् वा ।

[3] In the Daśapādi the rule for *-tra* is दादिभ्यश्छन्दसि viii. 90. The word छन्दसि shows that दा to give is intended here.

* The Daśapādī has simply इन्, while the Pañcapādī reads सर्वधातुभ्य इन्.

[4] Because Paidava was expected acc. to ओर्गुणः vi. 4. 146.

हव्यः । ह्वयतेः 'अचो यत्' [३।१।९७] इति यत् । 'बहुलं छन्दसि' [६।१।३४] इति सम्प्रसारणम् । गुणः । 'धातोस्तन्निमित्तस्यैव' [६।१।८०] इत्यवादेशः । अर्यः । ऋ गतौ[1] । अघ्न्यादयश्च [उ० ४।१११] इत्यौणादिको यत् । व्यत्ययेनान्तोदात्तत्वम्[2] ॥

ददथुः—accented because it occurs in a subordinate clause (यद्वृत्तान्नित्यम् viii. 1. 66).

शश्वत्—here repeating itself, lasting. See under ii. 12. 8.

स्वस्ति—lit. well-being, hence welfare, blessing. It may be either neuter or fem.

सदम्—सदम् is found in RV. beside सदा. In form सदा is the instr. s. while सदम् is the acc. s.

कीर्तेन्यम्—Gerundives with *-āyya*, *-enya* and *-tva* besides those in *-ya* are found in RV. *Vareṇya* 'desirable' has come down to the classical language.

अर्यः—Indian commentators generally regard the form as nom. s. in the sense of 'noble'. Of course, this will involve समास-पुनरात्तता, but that need not detain us. When, however, immediately after a कृत्यप्रत्ययान्त word there is a word which may be regarded as a genitive, one feels inclined to connect those together acc. to नष्टाश्वदग्धरथन्याय. Hence Geldner regards अर्यः as the gen. s. of अरि (*cf.* RV. ii. 12. 5*a*) taking अरि in the sense of the lord of riches, the rich sacrificer.

"The Aśvins gave to Pedu a strong swift, white, dragon-slaying horse animated by Indra, and of incomparable Indra-like powers, which overcame all his enemies, and conquered for him unbounded spoils." OST. "The object of the gift was to replace an inferior horse," *Vedic Mythology*.

---

[1] This is found in the kryādi section of the *Kātantragaṇa-pāṭha*. Mādhava reads ऋ ॠ गतौ [धा° १।९१८-९१९, ३।१६-२९]. Bhaṭṭoji has ऋ गतिप्रसारणयोः [१।९३६] and ऋ ॠ गतौ [३।१६].

[2] We can easily avoid the vyatyaya by having recourse to the rules अर्यः स्वामिवैश्ययोः, iii. i. 103 and स्वाम्यन्तोदात्तत्वं च Vā. 1.

7

युवं नरा स्तुवते पज्रियाय	युवम् । नरा । स्तुवते । पज्रियाय ।
कक्षीवते अरदतं पुरन्धिम् ।	कक्षीवते । अरदतम् । पुरम्ऽधिम् ।
कारोतराच्छफादश्वस्य वृष्णः	कारोतरात् । शफात् । अश्वस्य । वृष्णः ।
शतं कुम्भाँ असिञ्चतं सुरायाः ॥७॥	शतम् । कुम्भान् । असिञ्चतम् । सुरायाः ॥७॥

You (*yuvám*), O heroes (*narā*), granted (*aradatam*) the fulfilment of his wishes (*púrandhim*) to the praising (*stuvaté*) Pajriya Kakṣīvat (*pajriyā'ya Kakṣī'vate*). You poured out (*asiñcatam*) from the hoof (*śaphā't*) of your mighty horse (*vṛ'ṣṇaḥ áśvasya*) as through a strainer (*kārotarā't*) a hundred (*śatám*) jars (*kumbhā'n*) of wine (*súrāyāḥ*).

सायणः । अत्रेयमाख्यायिका । कक्षीवानृषिः पुरा तमसा तिरोहितज्ञानः सन् ज्ञानार्थमश्विनौ तुष्टाव । तस्मा अश्विनौ प्रभूतां धियं दत्तवन्ताविति । तदाह । हे नरा नेतारावश्विनौ युवं युवां पज्रियाय । पज्रा इत्यङ्गिरसामाख्या 'पज्रा वा अङ्गिरसः' इत्याम्नातत्वात् । तेषां कुले जाताय कक्षीवते । 'कक्ष्या रज्जुरश्वस्य' [नि॰ २।२], तद्वते । तत्संज्ञाय स्तुवते युवयोः स्तुतिं कुर्वते मह्यं पुरन्धिम् प्रभूतां धियं बुद्धिम् अरदतम् व्यलिखतम् । यथा [बुद्धिः] सर्वार्थगोचरा भवति तथा कृतवन्तावित्यर्थः । अपि च कारोतरात् । कारोतरो नाम वैदलश्चर्मवेष्टितो भाजनविशेषो यस्मिन् सुरायाः स्रावणं क्रियते । लुप्तोपममेतत् । कारोतराद् यथा सुरायाः सम्पादकास्तां स्रावयन्ति, एवमेव युवां वृष्णः सेचनसमर्थस्य युष्मदीयस्य अश्वस्य शफात् खुरात् सुरायाः शतं कुम्भान् असंख्यातान् सुराघटान् असिञ्चतम् अक्षारयतम् । यद्वा । सिञ्चतिः पूरणार्थः । कारोतरस्थानीयाद् युष्मदीयाश्वखुराद् या सुरा प्रवहति तयासंख्यातान् घटान् असिञ्चतम् अपूरयतम् । ये जनाः सौत्रामण्यादिकर्मणि

युष्मद्यागाय सुरां याचन्ते तेषामित्यर्थः ॥ स्तुवते । स्तौतेर्लटः शतृ । अदादित्वाच्छपो लुक् । "शतुरनुमः°" [६।१।१७३] इति विभक्तेरुदात्तत्वम् । पज्रियाय । पज्रशब्दाच्छैषिको घच् । कक्षीवते । 'आसन्दीवदष्ठीवच्चक्रीवत् कक्षीवत्°' [८।२।१२] इति निपातनात् कक्ष्याशब्दस्य सम्प्रसारणं वत्वं च । अरदतम् । रद विलेखने [धा° १।५३] । पुरन्धिम् । "पुरन्धिर्बहुधीः" इति यास्कः [नि° ६।१३] । पृषोदरादित्वात् पुरन्धिभावः । यद्वा पुरं पूरयितव्यं सर्वविषयजातमस्यां धीयतेऽवस्थाप्यते इति पुरन्धिर्बुद्धिः । कर्मण्यधिकरणे च [३।३।९३] इति दधातेः किप्रत्ययः । तत्पुरुषे कृति बहुलम् [६।३।१४] इति बहुलवचनादलुक् । इदं तु व्युत्पत्तिमात्रम्, वस्तुतः पृषोदरादिरेव । असिञ्चतम् । षिचिर् क्षरणे[1] [धा° ६।१५०] । तौदादिकः । शे मुचादीनाम् [७।१।५९] इति नुम् ॥

युवम्—In the oldest period of the language the ending of all the three numbers of the Nom. in the case of *yuṣmad* was *-am*. So in the Nom. du. युवम् (यु + अम्) is the only form used in RV. Hence Pāṇini frames the rule प्रथमायाश्च द्विवचने भाषायाम् vii. 2. 88.

नरा—nom. du. of नृ (Gk. *anēr*, Av. *nərə*). नर came into being much later.

अरदतम्—Imp. 2. du. of रद् to dig. रदतिः खनतिकर्मा । Yāska. रद विलेखने । Dhātupāṭha (*cf.* Eng. *rat*).

पुरन्धिम्—As the Padapāṭha shows, पुरन्धि is an aluk compd. of पुरम् acc. s. of पुर् (abundance) and धि (reduced form of धा) bestowing.

कारोतरात्—It will be noticed that the final syll. is accented here, so this *tara* can hardly be the comparative suffix. कारोतर means a strainer acc. to Sāyaṇa. Similarly, Uvaṭa says: सुरापावनम्. Mah. सुरापावनचालनी. VM. says कूपसदृशात्. Sk.

---

1 This is acc. to the Gaṇapāṭha of the Kātantra school. The Pāṇini school reads षिच क्षरणे, as the anubandha इर is not necessary, because of the specific mention of सिच् in the rule लिपिसिचिह्वश्च iii. 1. 53.

explains: बहुत्वादिना साहश्येन कूपसदृशात्कषात्. Both meanings are possible here, but the sense of 'well' would appear to be later.

कुम्भाँ असिञ्चतम्—for sandhi see p. 32. *Cf.* RV. i. 117. 6: तद्वां नरा शंस्यं पज्रियेण कक्षीवता नासत्या परिज्मन्। शफादश्वस्य वाजिनो जनाय शतं कुम्भाँ असिञ्चतं मधूनाम्॥ That exploit of yours, O heroes, is to be celebrated, O Nāsatyas, by Kakṣīvat of the race of Pajra about your journey. From the hoof of the prize-winning horse you poured to your people a hundred jars of sweet drinks.

8

हिमेनाग्निं घ्रंसमवारयेथां	हिमेन। अग्निम्। घ्रंसम्। अवारयेथाम्।
पितुमतीमूर्जमस्मा अधत्तम्।	पितुऽमतीम्। ऊर्जम्। अस्मै। अधत्तम्।
ऋबीसे अत्रिमश्विनावनीत-	ऋबीसे। अत्रिम्। अश्विना। अवऽनीतम्।
मुन्निन्यथुः सर्वगणं स्वस्ति॥८॥	उत्। निन्यथुः। सर्वऽगणम्। स्वस्ति॥८॥

You quenched* (*avārayethām*) the flowing fire (*agnim ghraṁsám*) with snow (*hiména*), you brought (*adhattam*) him (*asmai*) nourishing (*pitumátīm*) strength (*ū'rjam*); you rescued (*únninyathuḥ*), O Aśvins (*Aśvinā*), Atri (*A'trim*) hurled headlong (*ávanītam*) into a glowing furnace underground (*ṛbī'se*) safely (*svasti*) along with all his followers (*sárva-gaṇam*).

सायणः। अत्रेदमाख्यानम्। अत्रिमृषिमसुराः शतद्वारे पीडायन्त्रगृहे प्रवेश्य तुषाग्निनाबाधिषत। तदानीं तेन ऋषिणा स्तुतावश्विनावग्निमुदकेनोपशमय्य तस्मात् पीडागृहादविकलेन्द्रियवर्गं सन्तं निरगमयताम्। तदेतत् प्रतिपाद्यते। अश्विना हे अश्विनौ हिमेन हिमवच्छीतेनोदकेन घ्रंसं दीप्यमानम् अत्रेर्बाधनार्थमसुरैः प्रक्षिप्तं तुषाग्निम् अवारयेथां युवां निवारितवन्तौ शीतीकृतवन्तावित्यर्थः। अपि च अस्मै असुरपीडया कार्श्यं प्राप्तायात्रये

* "हत्वा संशम्य शीतं कृतवन्तौ।"

पितुमतीम्। पितुरित्यन्ननाम। अन्नयुक्तम् ऊर्जं बलप्रदं रसात्मकं क्षीरादिकम् अधत्तम् पुष्ट्यर्थं प्रायच्छतम्। ऋबीसे अपगतप्रकाशे पीडायन्त्रगृहे अवनीतम् अवाङ्मुखतयासुरैः प्रापितम् अत्रिम् सर्वगणम्। गणः समूहः। सर्वेषामिन्द्रियाणां पुत्रादीनां वा गणेनोपेतं स्वस्ति अविनाशो यथा भवति तथा उन्निन्यथुः तस्माद् गृहादुद्गमय्य युवां स्वगृहं प्रापितवन्तौ। यद्वा हिमेन शीतेन वृष्ट्युदकेन अग्निम् अग्निवत् तीक्ष्णं घ्रंसम्। अहर्नामैतत्। सामर्थ्यान्निदाघकालीनमहः। अवारयेथाम् तस्याह्नस्तैक्ष्ण्यं च निवारितवन्तौ। अपि च अस्मै अग्नये पितुमतीम् चरुपुरोडाशादिलक्षणान्नोपेतम् ऊर्जं बलकरमुपस्तरणाभिघारणात्मकं घृतम् अधत्तम् वृष्ट्युत्पादनेनाग्नेर्योगार्थं हवींषि निष्पादितवन्तावित्यर्थः। ऋबीसे अपगततेजस्के पृथिवीद्रव्ये अवनीतम् ओषधीनामुत्पादनायावस्तान्नीतम्। पार्थिवाग्निना परिपक्वा उदकेन क्लिन्ना ह्योषधिवनस्पतयो विरोहन्ति। अत्रिम् हविषामत्तारमोषधिवनस्पत्यादीनां वा। एवंविधमग्निं सर्वगणम् व्रीह्याद्योषधिगणोपेतं हे अश्विनौ युवां स्वस्ति अविनाशो यथा भवति तथा उन्निन्यथुः व्रीह्याद्योषधिवनस्पतिरूपेण भूमेरुपरिष्टान्नीतवन्तौ। कारणात्मना पार्थिवाग्नौ वर्तमानं सर्वमोषधिवनस्पत्यादिकमश्विनौ प्रवर्षणेन व्यक्तीकृतवन्तावित्यर्थः। अयं पक्षो यास्केन 'हिमेनोदकेन' [नि° ६।३६] इत्यादिनोक्तः। पितुमतीम्। ह्रस्वनुड्भ्यां मतुप् [६।१।१७६] इति मतुप उदात्तत्वम्। ऋबीसे। अत्र यास्कः। ऋबीसमपगतभासमपचितभासमपहृतभासं गतभासं वा [नि° ६।३५] इति। पृषोदरादित्वादभिमतरूपस्वरसिद्धिः। अत्रिम्। अद भक्षणे [धा° २।१]। *अदेस्त्रिनिश्च" [उ° (द°)

* The Pañcapādi iv. 68 reads the rule as अदेस्त्रिनिश्च, while the Daśapādī has अदेस्त्रिनिश्च which is explained as अदेः त्रिनिच् प्रत्ययो: भवति क्विप् च. Bhaṭṭoji says in his *Prauḍhamanoramā* वधैर्दुःशंसान् [ऋ० सं० १।९४।९] इति मन्त्रस्य भाष्ये अदेस्त्रिनिश्च इति माधवः। न लुमताङ्गस्य [१।१।६३] इति सूत्रे कैयटोऽप्येवमाह। So though अदेस्त्रिनिच् is the reading of all Mss. we have emended it.

३।३७, (प) ४।६८] इति घशब्दात् क्विप्*। अवनीतम्। गतिरनन्तरः [६।२।४९] इति गतेः प्रकृतिस्वरत्वम्। स्वस्ति। अस भुवि [धा° २।५५]। भावे क्तिन्। छन्दस्युभयथा [३।४।११७] इति सार्वधातुकत्वादस्तेर्भूभावाभावः।

घ्रंस—along with घर्म and हव etc. is read in the *Nighaṇṭu* in the list of अहर्नामानि. It is derived from घृ क्षरणदीप्त्योः (hence VM. explains it as अहर्दीप्तिम्) and means heat, glow. अग्निं घ्रंसम् means by hendiadys[1] the glowing fire. Geldner thinks अग्निम् stands for अग्नेः by case-attraction and means the glow of the fire. *Cf.* RV. vii. 69. 4: यद्देवयन्तमवथः शचीभिः परि घ्रंसमोमना वां वयो गात् when you help the godly man with your knowledge. *Cf.* AV. vii. 19. 2: न घ्रंसस्ताप न हिमो जघान।

पितुमतीम् ऊर्जम्—Both पितु and ऊर्क् are read in the *Nighaṇṭu* in the list of अन्ननामानि. Yāska says: पितुरित्यन्ननाम, पातेर्वा पिबतेर्वा, प्यायतेर्वा। Skt. *pitúḥ*, Av. *pitu-š* from *pā* to drink. It meant originally drink, then food in general. ऊर्ज्—sap, strength, vigour, from **varj* swell with, be full of. Gk. *orgē* (Skt. ऊर्जा).

अस्मै—The dative is used with verbs meaning to give.

अधत्तम्—Imp. 2. du. of धा to bestow.

ऋबीसे—The word occurs in three other stanzas: ऋषिं नरावंहसः पाञ्चजन्यमृबीसादत्रिं मुञ्चथो गणेन। i. 117. 3; यदत्रिमवरोहन्नृबीसमजोहवीन्नाधमानेव योषा। श्येनस्य चिज्जवसा नूतनेनागच्छतमश्विना शंतमेन॥ v. 78. 4; युवं ह रेभं वृषणा गुहा हितमुदैरयतं ममृवांसमश्विना। युवमृबीसमुत तप्तमत्रय ओमन्वन्तं चक्रथुः सप्तवध्रये। x. 39. 9; तप्तमृबीसम् अग्निकुण्डम् अत्रये ओमन्वन्तम् अवनवन्तं चक्रथुः। हत्वा निशमय्य शीतं कृतवन्तौ। सायणः।

VM. explains ऋबीसे as अपगतभासि गतभासि वा अग्नौ (smouldering fire, तुषानल). Sk. has अग्निकूटे. It was probably a pit with smouldering fire under the ashes or an underground furnace.

अवनीतम्...उन्निन्यथुः—Mark the contrast.

---

* One of M's Mss. reads क्विप्, while the rest have क्विन्. The latter is to be rejected for the simple reason that it would make the word अन्तोदात्त.

[1] *Cf.* प्रभवः शोकः ii. 38. 5

सर्वगणम्—The accent shows that it is a Bahuvrīhi compound. *Cf.*

स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः ।
बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः ॥ v. 51. 12

स्वस्ति—The contracted (*i.e.* by पूर्वसवर्णदीर्घ) instru. sing. of स्वस्ति is स्वस्ती. The shortened form of this स्वस्ती is used here in the sense of an adverb. *Cf.* पर्षि णः पारमंहसः स्वस्ति RV. ii. 33. 3: Ferry us across to the further shore of distress in safety.

9

परावतं नासत्यानुदेथा-
मुच्चाबुध्नं चक्रथुर्जिह्मबारम् ।
क्षरन्नापो न पायनाय राये
सहस्राय तृष्यते गोतमस्य ॥८॥

परा अवतम् । नासत्या । अनुदेथाम् ।
उच्चाऽबुध्नम् । चक्रथुः । जिह्मऽबारम् ।
क्षरन् । आपः । न । पायनाय । राये ।
सहस्राय । तृष्यते । गोतमस्य । ॥९॥

You overturned (*párā anudethām*), O Nāsatyas (*Nāsatyā*) the well (*avatám*). You made (*cakrathuḥ*) it with the bottom upwards (*uccā'budhnam*) and the mouth athwart in the ground (*jihmábāram*). Like water (*ā'paḥ ná*) wealth flowed [*dhanāni*] (*kṣáran*) for the drinking (*pāyánāya*) of Gotama (*Gótamasya*) who was thirsty for a thousand gold coins (*sahásrāya rāyé tr'ṣyate*).*

सायणः । अत्रेदमाख्यानम् । कदाचिन्मरुभूमौ वर्तमानस्य स्तोतुर्गोतमस्य ऋषेः समीपं देशान्तरे वर्तमानं कूपमुत्खायाश्विनौ प्रापयताम् । प्रापय्य च तं कूपं स्नानपानादिसौकर्यायोपरिमूलमधोबिलमवास्थापयतामिति । तदेतदाह ।

* We have followed VM. who explains: तस्मात् कूपात् उदकानि इव पिपासोर्गोतमस्य पानार्थं धनानि च अक्षरन् । सहस्राय धनाय तृष्यते गोतमाय ।

हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ नासिकाप्रभवौ वा। एतत्संज्ञावश्विनौ युवम् युवाम् अवतम्। कूपनामैतत्। अवस्तात् ततं कूपं परानुदेथां गोतमस्य समीपे प्रेरिषाथाम्। तदनन्तरं तं कूपम् उच्चाबुध्नम् उच्चैरुपरिष्टाद् बुध्नो मूलं यस्य स तथोक्तः। जिह्मबारम् जिह्ममधस्ताद्वर्तमानतया वक्रं बारं द्वारं यस्य स तथोक्तः। एवंगुणविशिष्टं चक्रथुः युवामकृपाथाम्। तस्मात् कूपात् तृष्यते पिपासते गोतमस्य पायनाय पानार्थम् आपो न आपश्च। अयं नशब्दश्चार्थे। क्षरन् प्रवाहरूपेण निरगमन्। कीदृशम्। राये हवींषि दत्तवते। सहस्राय सहनशीलाय। यद्वा सहस्रसंख्याकाय राये धनाय एतत्संख्यधनलाभार्थं चाक्षरन्॥ अनुदेथाम्। णुद प्रेरणे [धा° ६।२]। तौदादिकः। जिह्मबारम्। द्वारशब्दस्य पृषोदरादित्वाद्धकारादेशः। क्षरन्। क्षर सञ्चलने [धा° १।८३६]। बहुलं छन्दस्यमाङ्योगेऽपि [६।४।७५] इत्यडभावः। शपः पित्त्वादनुदात्तत्वम्। तिङ्गं लसार्वधातुकस्वरेण धातुस्वरः। पायनाय। हेतुमति णिच्। शाच्छासाह्वा° [७।३।३७] इति युक्। भावे ल्युट्। राये। रा दाने [धा° २।४७]। राति ददातीति राः। रातेर्डैः [उ° २।६६]। ऊडिदम्° [६।१।१७१] इति विभक्तेरुदात्तत्वम्। तृष्यते। ञि तृषा पिपासायाम् [धा° ४।१२०]। श्यन्। लटः शतृ। श्यनो नित्त्वादाद्युदात्तत्वम्। षष्ठ्यर्थे चतुर्थी वक्तव्या [२।३।६२।१] इति चतुर्थी॥९॥

स्कन्दस्वामी। अत्रेतिहासमाचक्षते। गोतमस्तृषितोऽश्विनावुदकं ययाचे। तस्मा अश्विनौ कूपं हस्ताभ्यां प्रेर्य प्रेर्यैतत्सकाशं नीत्वाधोमुखं च कृत्वा तेनोदकं ददतुरिति। तदेतदिहोच्यते। परावतं नासत्यानुदेथाम् इति। अवत इति कूपनाम। कूपं हे नासत्यौ परानुदेथाम्। णुद प्रेरणे। पराङ्मुखं गोतमं प्रति प्रेरितवन्तौ स्थः। नीचं च सन्तम् उच्चाबुध्नं चक्रथुः जिह्मबारम्। जिह्मशब्दोऽत्राधोभाववचनः, न कुटिलवचनः। उपरिबुध्नमधोमुखं कृतवन्तौ स्थ इत्यर्थः। अधोमुखात् तस्मात् क्षरन् स्रुतवत्य आपः पायनाय पानार्थम्। कथम्? न राये सहस्राय नशब्दोऽत्र पुरस्तादु-

पचारोऽपि सामर्थ्यादुपमार्थीयो द्रष्टव्यः। राये सहस्रायेति प्रथमाबहुवचनस्य स्थाने चतुर्थी।. धनानीव सहस्रसंख्यानि। यथा कूपकलशादधोमुखात् सहस्रसंख्याका रूपकाः क्षरन्ति तद्वदित्यर्थः। कस्य पानाय ? तृष्यते गोतमस्य। तृष्यते इति षष्ठ्यर्थे चतुर्थी। तृषा बाध्यमानस्य गोतमस्य पानायेति।

अनुदेथाम्—Impf. 2nd du. Atm. of *nud* to push.

उच्चाबुध्नम्—उच्चा (Av. *uśca*) 'on high' is the adv. inst. of उच्च (*cf.* उच्चैः). बुध्न bottom. Lat. *fundu-s*. Adverbs often occur as the first member of Bahuvrīhi compounds.

जिह्मबारम्—बार (opening, cognate with बिलम् hole) occurs at the end of the two Bah. compounds नोचीनबारम् and जिह्मबारम्.

चरन्—Impf. 3. pl. without conjunct of चर् to flow (Gk. *phtheirō* to destroy. Av. *γžaraiti*).

तृष्यते—should have been तृष्यतः. It is dat. through the influence of the two immediately preceding datives.

10

जुजुरुषो नासत्योत वव्रिं	जुजुरुषः। नासत्या। उत। वव्रिम्।
प्रामुञ्चतं द्रापिमिव च्यवानात्।	प्र। अमुञ्चतम्। द्रापिम्ऽइव। च्यवानात्।
प्रातिरतं जहितस्यायुर्दस्रा-	प्र। अतिरतम्। जहितस्य। आयुः। दस्रा।
दित्पतिमकृणुतं कनीनाम् ॥१०॥	आत्। इत्। पतिम्। अकृणुतम्। कनीनाम्।

And (*utá*) you stripped off (*prá amuñcatam*), O Nāsatyas (*Nāsatyā*), from the aged (*jujurúṣaḥ*) Cyavāna (*Cyávānāt*) his entire skin (*vavrím*) like a robe (*drāpim iva*). You lengthened (*prā́'tiratam*), O Dasrás (*Dasrā*), the life (*ā́'yuḥ*) of a man who was abandoned (*jahitásya*), and then (*ā́'t ít*) made him (*akṛṇutam*) the husband (*pátim*) of maidens (*kanī́'nām*).

अत्रेदमाख्यानम्। वलीपलितादिभिरुपेतो जीर्णाङ्गः पुत्रादिभिः परित्यक्तश्च्यवनाख्य ऋषिरश्विनौ तुष्टाव। स्तुतावश्विनौ तस्मा ऋषये जरामपगमय्य पुनर्यौवनमकृणुतामिति। तदेतदाह। [नासत्या] हे नासत्यावश्विनौ जुजुरुषः जीर्णात् च्यवानात् च्यवानाख्यादृषेः सकाशाद् वव्रिम् कृत्स्नं शरीरमावृत्यावस्थितां जरां प्रामुञ्चतम् प्रकर्षेणामोचयतम्। तत्र दृष्टान्तः। द्रापिमिव। द्रापिरिति कवचस्याख्या। यथा कश्चित् कवचं कृत्स्नशरीरव्यापकं कृत्वा पश्चाच्छरीरात् पृथक्करोति तद्वत्। उत अपि च हे दस्रा एतत्संज्ञौ दर्शनीयौ वाश्विनौ जहितस्य पुत्रादिभिः परित्यक्तस्य ऋषेः आयुः जीवनं प्रातिरतम् प्रावर्धयतम्। प्रपूर्वस्तिरतिर्वर्धनार्थः। आत् इत् अनन्तरमेव युवानं सन्तं कनीनाम् कन्यानां पतिम् भर्तारम् अकृणुतम् अकुरुतम्। जुजुरुषः। [1]जूष् वयोहानौ [धा° ४।२२]। लिटः क्वसुः। बहुलं छन्दसि [७।१।१०३] इति उत्वम्। द्विर्भावः। पञ्चम्येकवचने वसोः सम्प्रसारणम् [६।४।१३१] इति सम्प्रसारणम्। शासिवसिघसीनां च [८।३।६०] इति षत्वम्[2]। वव्रिम्। वृञ् वरणे [धा° ५।८]। आदृगमहन° [३।२।१७१] इति किप्रत्ययः। जहितस्य। ओ हाक् त्यागे [धा° ३।८]। कर्मणि निष्ठा। तस्य छन्दस्युभयथा [३।४।११७] इति सार्वधातुकत्वाद् यक्। तस्य बहुलं छन्दसि [२।४।७६] इति श्लुः। जहातेश्च [६।४।११६] इतीत्वम्। कनीनाम्। रयेर्मतौ बहुलम् [६।१।३७।६] इति बहुलवचनात् कन्याशब्दस्यात्र सम्प्रसारणम् ॥१०॥

स्कन्दस्वामी। अथ शतपथेऽधीतमितिहासमाचक्षते[3]। शर्यातो नाम राजा संक्रीडद्भिः कृतापराधाय कुपिताय जीर्णाय च्यवनाय प्रत्यापत्त्यर्थं सुकन्यां नाम कन्यकां दुहितरं ददौ। तां तत्रासीनां दृष्ट्वाश्विनौ पुनः पुनरूचतुः। किमिति जीर्णीकृतरूपं कामयसे। आवां सम्भजस्वेति। सा तौ प्रत्युवाच—यस्मै मां पितादात्, नाहं तं जीवन्तं हास्यामीति। तदृषिर्ज्ञात्वा सुकन्यामुवाच, यदि त्वामेतौ पुनरेवं ब्रूयातां ततस्त्वमेनौ प्रतिब्रूयाः असर्वौ वसुसमृद्धौ सन्तौ

---

[1] "जूष् झूष् वयोहानौ" इति धातुपाठः। [2] See pp, 93, 409.

[3] See SB. iv. 1. 5. 1 ff.

पतिं मे निन्दथ इति। तौ यदि त्वां प्रतिब्रूयातां केनासर्वौ वसुसमृद्धौ वेति, तत एनौ प्रतिब्रूयाः, पतिं मे पुनर्युवानं कुरुतमिति। अथ वां वक्ष्यामीति। सा तौ तथोवाच। तामश्विनौ प्रत्यूचतुः। एतं ह्रदमवतरतु। अतो यत् कामयसे तेन वयसा युक्त उत्तरिष्यतीति। स ऋषिस्तं ह्रदमवतीर्योत्ततार युवा भूत्वेति। तदेतदिहोच्यते–जुजुरुषो नासत्येत्यादिना। उतशब्दोऽप्यर्थे। अपि पूर्वोक्तानि कर्माणि चक्रथुः, अपीदमन्यत्। किं तत्? उच्यते। जुजुरुषो जीर्णाद् वृद्धीभूताद् हे नासत्यौ वव्रिं रूपं जरालक्षणं प्रामुञ्चतं प्रमोचितवन्तौ। अपनीतवन्तौ स्त इत्यर्थः। किमिव? उच्यते। द्रापिमिव कवचमिव योद्धुः शरीरात्। कुतोऽपनीतवन्तौ? च्यवनात् च्यवननाम्न ऋषेः। अपनीय च जराम्, प्रतिरत। प्रपूर्वस्तिरतिर्वृद्ध्यर्थः। प्रवर्धितवन्तौ स्थः। जहितस्य। ओहाङ्त्यागे। त्यक्तस्यायुषः। क्षीणप्रायायुष इत्यर्थः। प्रवर्धितवन्तावायुर्जीवितलक्षणं हे दस्रा। आदित् अथैनं पतिं भर्तारम् अकृणुतम् कृतवन्तौ स्थः। कनीनां कन्यकानां सुकन्याप्रभृतीनाम्।

जुजुरुषः—gen. s. of जुजुर्वस् perf. part. of जॄ waste away.

वव्रि—covering; from वृ to cover from the reduplicated root with the suffix *i*. Yāska says: वव्रिरिति रूपनाम वृणोतीति सतः. *Cf.* RV. v. 74. 5: प्र च्यवानाज्जुजुरुषो वव्रिमत्कं न मुञ्चथः। युवा यदी कृथः पुनरा काममृण्वे वध्वः॥ You removed from the old Cyavāna his corporeal covering like a robe. Young, when you have again made him, he again enters into the desire of his wife.

द्रापिम्—Acc. to S. the word means 'armour' (kavaca). Since, however, in v. 74. 5 we have अत्क used in the same sense as द्रापि, it may well mean robe. Western scholars compare it with Lithuanian *drapana* 'cloak, mantle' and assign that meaning to it.

च्यवानात्—च्यवान the prs. part. Ā of *cyu* to move. In RV. the proper noun is च्यवान (moving, shaking) and the verbal noun is च्यवन. Later on च्यवान appeared pedantic and was changed into च्यवन, just as मन्थाद was changed into मान्धातृ in later times. Cyavāna's name has been made immortal by the Cyavana-

prāśa about which Caraka says: अस्य प्रयोगाच्च्यवनः सुवृद्धोऽभूत् पुनर्युवा. The Rigveda (i. 116. 10, 117. 13, 118. 6; v. 74. 5; vii. 68. 6, 71. 5; x. 39. 4) represents him as an old decrepit man to whom the Aśvins restored youth and strength, making him acceptable to his wife, and a husband of maidens. In the Śatapatha Brāhmaṇa, Cyavana is described as wedding Sukanyā, the daughter of Śaryāta and as having been rejuvenated by immersion in a pond (*Vedic Index.*)

जहितस्य—perfect pass. part. of *hā* to abandon; classical हीनस्य. The present stem is used in जहित, दत्त and जग्ध.

कनीनाम्—gen. pl. of कन्या which must originally have been an *n*-stem कन्यान्. In the acc. s. we find in RV. कन्यनाम् viii. 35. 5 which probably stands for कन्यानम्. कनान् is the weak grade of कन्यान् or कन्यन्. The *n*-stem is found in *kanyakā* also.

11

तद्वां नरा शंस्यं राध्यं	तत् । वाम् । नरा । शंस्यम् । राध्यम् । च ।
चाभिष्टिमन्नासत्या वरूथम् ।	अभिष्टिऽमत् । नासत्या । वरूथम् ।
यद्विद्वांसा निधिमिवापगूळ्ह-	यत् । विद्वांसा । निधिम्ऽइव* । अपऽगूळ्हम् ।
मुद्दर्शतादूपथुर्वन्दनाय ॥११॥	उत् । दर्शतात् । ऊपथुः । वन्दनाय ॥११॥

That (*tát*) was, O heroes (*narā*), your (*vām*) praiseworthy (*śáṁsyam*) and (*ca*) excellent (*rā'dhyam*), helpful (*abhiṣṭimát*) protection (*várūtham*), O Nāsatyas (*Nāsatyā*), when (*yát*) you having come to know (*vidvā'ṁsā*) like a buried (*ápagūḷham*) treasure (*nidhim iva*) you dug out (*údūpáthuḥ*) from the visible well (*darśatā't*) [Vandana] for [your] praise (*vándanāya*).

* इव unaccented in M. P. and others.

सायणः । अत्रेदमाख्यानम् । वन्दनो नाम कश्चिदृषिः । स असुरैः कूपे निखात उत्तरीतुमशक्नुवन्नश्विनावस्तौत् । तमश्विनौ कूपादुज्जिन्यतुरिति । तदाह । नरा आरोग्यस्य नेतारौ [नासत्यौ] हे नासत्यावश्विनौ वाम् युवयोः सम्बन्धि अभिष्टिमत् अभ्येषणयुक्तम् आभिमुख्येन प्राप्तव्यं तथा वरूथम् वरणीयं कामयितव्यं तत् कर्म शंस्यम् अस्माभिः प्रशंसनीयम् राध्यम् आराधनीयं च । किं पुनस्तत्कर्म ? विद्वांसा जानन्तौ युवाम् निधिम् इव निक्षिप्तं धनमिव अपगूळ्हम् अरण्ये निर्जने देशे कूपमध्येऽसुरैर्निगूढं वन्दनाय वन्दनमृषिं दर्शतात् अध्वगैः पिपासुभिर्द्रष्टव्यात् कूपात् उदूपथुः उदहार्ष्टम् । एवं यदेतत् कूपादुद्धरणं तदित्यर्थः ॥ शंस्यम् । शन्सु स्तुतौ [धा° १७१४] । अस्माण्ण्यन्ताद् अचो यत् [३।१।९७] इति यत् । यतोऽनावः [६।१।२१३] इत्याद्युदात्तत्वम् ।[1] अभिष्टिमत् । अभिपूर्वात् इष गतौ [धा° ४२०] इत्यस्माद्भावे क्तिन् । मन्त्रे वृषे° [३।३।९६] इति क्तिन उदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । शकन्ध्वादित्वात् [६।१।९४।४] पररूपत्वम् । तादौ च° [६।२।५०] इति तु गतिस्वरस्य सर्वविधीनां छन्दसि विकल्पितत्वादप्रवृत्तिः । ततो मतुप् । अन्तोदात्तादुत्तरस्य तस्य ह्रस्वनुड्भ्याम्° [६।१।१७६] इत्युदात्तत्वम् । वरूथम् । जॄवृञ्भ्यामूथन् [उ° २।५] । विद्वांसा । सुपां सुलुक्° [७।१।३९] इति विभक्तेराकारः । अपगूळ्हम् । *गुहूञ् संवरणे [धा° ११८०] । कर्मणि निष्ठा । यस्य विभाषा [३।२।१५] इतीट्प्रतिषेधः । ढत्वधत्वष्टुत्वढलोपदीर्घाः । गतिरनन्तरः [६।२।४९] इति गतेः प्रकृतिस्वरत्वम् । दर्शतात् । भृमृदृशि° [उ° ३।११०] इत्यादिनातच् । ऊपथुः । डुवप बीजतन्तुसन्ताने [धा° ११८३] । लिट्यथुसि यजादित्वात्सम्प्रसारणम् । द्विर्वचनादि । वन्दनाय । क्रियाग्रहणं कर्तव्यम्† [१।४।३२ भाष्य] इति कर्मणः सम्प्रदानत्वाच्चतुर्थी ॥११॥

---

[1] S. gives the correct derivative (शंस्+ण्यत्) under RV. i. 17.5. See *Mañjūṣa*, vol. x, no. 4.

* Both the Pāṇini and Kātantra schools read गुह संवरणे without the anubandha *ñ*.

† Both Bhāṣya and Kāśikā read क्रियाग्रहणमपि कर्तव्यम्.

. वेङ्कटमाधवः। तत् [वां] युवयोः [नरा] नरौ [शंस्यम्] स्तोतव्यम् *[राध्यम्] राधनीयं लालनीयम्। च। [अभिष्टिमत्] अन्वेषणवच्चाभ्येष्टव्यम्।* [वरूथम्] वरणीयं च [विद्वांसा] पतिं जानन्तौ [अपगूळ्हम्] तिरोहितम्। निधिमिव कूपे पतितम् [वन्दनाय] वन्दनं [दर्शतात्] प्रयत्नेन दर्शनीयादगाधात्कूपात् उदूपथुः। छन्दोऽनुविधानाय विभक्तिव्यत्यय ऋगन्तेषु भवति॥

स्कन्दस्वामी [१।११२।७]। अत्रेतिहासमाचक्षते। रेभमृषिं सन्ध्याकाले स्नात्वा ह्रदादुत्तीर्णमग्निहोत्रं होतुं स्वाश्रमं गच्छन्तमसुरा ददृशुः। ते देवानामयं यष्टा होता चेति ज्ञात्वा संक्रुद्धास्तं ताडयित्वा बद्ध्वा च तस्मिन् ह्रदे प्रक्षिप्य दशरात्रं धारयाञ्चक्रुरिति। तदपि कक्षीवानेव वक्ष्यति। दश रात्रीः [ऋ° सं° १।११६।२४] अश्वं न गूळ्हम् [ऋ० सं० १।११७।४] इति। स तत्र मृतकल्पोऽश्विनावाजुहाव। आहूयमानावश्विनौ तं सञ्जग्मतुरिति। तदपि कक्षीवानेव वक्ष्यति। सन्तं रिणीथः [ऋ° सं° १।११७।४] इति। आगत्य चोत्तरयाञ्चक्रतुरिति। तदपि कक्षीवानेव वक्ष्यति। विप्रुतं रेभम् [ऋ° सं° १।११६।२४] इति। घोषापि वक्ष्यति। युवं ह रेभम् [ऋ° सं° १०।३९।९] इति॥

तथापरमितिहासमाचक्षते। वन्दन ऋषिर्जरया परीतः कूपसमीपं गच्छन् कूपे पपात। स तत्रस्थोऽश्विनौ तुष्टाव। तमश्विनावागत्योत्तरयाञ्चक्रतुरिति। तदेतद् घोषा वक्ष्यति। युवं वन्दनमृश्यदात् [ऋ° सं० १०।३९।८] इति। कक्षीवानपि वक्ष्यति—तद्वां नरा शंस्यम् [ऋ° सं° १।११६।११] सुषुप्वांसम् [ऋ° सं° १।११७।५] इति। उत्तार्य च जरामस्यापनीतवन्तौ, दीर्घं चायुरस्मै दत्तवन्ताविति। तदेतद् द्वयमपि कक्षीवानेव वक्ष्यति। युवं वन्दनं निर्ऋतम् [ऋ° सं° १।११९।७] प्र दीर्घेण वन्दनः [ऋ° सं° १।१२०।६] इति च।

[१।११६।११] तत् कर्म वाम् युवयोः। हे नरा मनुष्याकारौ शंस्यम् स्तुत्यम् राध्यम् आराधनीयं च। अभिष्टिरिच्छा। प्रार्थना। तद्वच [अभिष्टिमत् च] प्रार्थनीयं वेत्यर्थः। हे नासत्या वरूथम् वरणीयं सम्भजनीयं चेत्यर्थः। कतमत्? उच्यते। यद्विद्वांसा निधिमिवापगूळ्हम्। यथा कौचिद्विद्वांसौ पुरुषौ निधिम् अपगूळ्हम् आच्छादितमुत्खनेताम्, एवं दर्शतात् अत्यन्तागाधत्वाद्

दर्शनीयकूपाद् उदूपथुः। उत्खातवन्तौ स्थः। उत्तारितवन्तावित्यर्थः। वन्दनाय। द्वितीयार्थे चतुर्थ्येषा। वन्दनमृषिम्। तदेतत् कुत्सेनाप्युक्तम्। याभी रेभाभिवृतम् [ऋ° सं° १।११२।५] इति ॥११॥

राध्यम्--(gerundive of राध् to succeed, gratify,) worthy to be gained, excellent; राधः gift, blessing.

अभिष्टिमत्—अभिष्टि (from अभि and अस्ति) means help. Under RV. viii. 60. 5 S says: युष्माकम् अभिष्टये साहाय्यार्थमभिगमनाय. अभिष्टिद्युम्न splendid to help, अभिष्टिशवस् strong to help.

वरूथम्—is read in the *Nigh.* in the list of गृहनामन्. The suffix *-tha* is added to जृ to wear out and वृ to cover, with the connecting vowel *ū*. जरूथ a kind of demon, वरूथ cover, then protection.

विद्दांसा—see p. 70 top, p. 139.

निधि—(नि down and धा to put,) treasure.

अपगूळ्हम्—past part. pass. of अप away from and गुह् to hide. Note the change of the intervocal *ḍh* to *ḷh*.

उदूपथुः—perf. 2. du. of *ud-vap* dig up.

दर्शतात्—*a* with *tá* is added to certain roots in the sense of the gerundive. दर्शत visible, worthy to be seen, यजत to be adored, भरत to be tended. Acc. to Indian commentators दर्शत means a well here. I see no reason for rejecting this view. Grassmann thinks दर्शतात् is a corrupt reading for ऋश्यदात् found in x. 39. 8.

वन्दनाय—The dat. is difficult to explain. VM. says that at the end of a stanza one case-ending is often used for another. So acc. to Indian commentators the dat. is used for the acc. *Cf*. i. 117. 5:

सुषुप्वांसं न निरृतेरुपस्थे सूर्यं न दस्रा तमसि क्षियन्तम्।
शुभे रुक्मं न दर्शतं निखातमुदूपथुरश्विना वन्दनाय ॥

You two, O Dasras, O Aśvins, dug up Vandana like one sleeping on the lap of the Goddess of Death, like the sun dwelling in darkness, like a golden ornament beautiful to look at buried (in the ground).

Ludwig suggests that there is a play upon the word वन्दन here and instead of using वन्दनं वन्दनाय the poet simply says वन्दनाय. *Cf.* v. 74. 4. We have accepted this suggestion. Grassmann translates: You hauled up for Vandana from the pit the hidden thing like a treasure. In RV. x. 39. 8 we find युवं वन्दनमृश्यदादुदूपथुः You dug up Vandana from the pit. For the story of Vandana see RV. i. 112. 5, 117. 5, 118. 6, 119. 6-7: x. 39. 8.

12

तद्वां नरा सनये दंस उग्र-	तत् | वाम् | नरा सनये | दंसः | उग्रम् ।
माविष्कृणोमि तन्यतुर्न वृष्टिम् ।	आविः | कृणोमि | तन्यतुः | न | वृष्टिम् ।
दध्यङ् ह यन्मध्वाथर्वणो वा-	दध्यङ् | ह | यत् मधु | आथर्वणः | वाम् ।
मश्वस्य शीर्ष्णा प्र यदीमुवाच ॥१२॥	अश्वस्य | शीर्ष्णा प्र यत् ईम् | उवाच ॥

I shall make manifest (*āviḥ kṛṇomi*), for the sake of gain (*sanáye*), O heroes (*narā*), that (*tát*) mighty (*ugrám*) wonderful deed (*dáṁsaḥ*) of yours (*vām*), as the thunder (*tanyatúḥ ná*) [announces] rain (*vṛṣṭim*), that (*yát*) Dadhyañc (*Dadhyáṅ ha*), son of Atharvan (*Ātharvaṇáḥ*) proclaimed (*uvā'ca*) to you (*vām*) with the horse's (*áśvasya*) head (*śīrṣṇā'*) what the sweetness is (*yát mádhu*).

सायणः । अत्रेयमाख्यायिका । इन्द्रो दधीचे प्रवर्ग्यविद्यां मधुविद्यां चोपदिश्य यदीमामन्यस्मै वक्ष्यसि शिरस्ते छेत्स्यामीत्युवाच । ततोऽश्विनावश्वस्य शिरश्छित्वा दधीचः शिरः प्रच्छिद्यान्यत्र निधाय तत्राश्व्यं शिरः प्रत्यधत्ताम् । तेन च दध्यङ् ऋचः सामानि यजूंषि च प्रवर्ग्यविषयाणि मधुविद्याप्रतिपादकं ब्राह्मणं चाश्विनावध्यापयामास । तदिन्द्रो ज्ञात्वा वज्रेण तच्छिरोऽच्छिनत् । अथाश्विनौ तस्य स्वकीयं मानुषं शिरः प्रत्यधत्तामिति शाट्यायनवाजसनेयकयोः

अपह्नवेनोक्तम्। तदेतत् प्रतिपाद्यते। नरा हे नरावश्विनौ वाम् युवयोः सम्बन्धीनि उग्रम् उद्गूर्णमन्यैर्दुःशकं दंसः। कर्मनामैतत्। युवाभ्यां पुरा कृतं तत् कर्म सनये धनलाभार्थम् आविष्कृणोमि प्रकटीकरोमि। तत्र दृष्टान्तः। तन्यतुः न। यथा मेघस्थः शब्दः वृष्टिम् मेघान्तर्वर्तमानमुदकं प्रवर्षणेन सर्वत्र प्रकटयति तद्वत्। किं तत् कर्म? [आथर्वणः] अथर्वणः पुत्रो दध्यङ् एतत्संज्ञक ऋषिः अश्वस्य शीर्ष्णा युष्मत्सामर्थ्येन प्रतिहितेन शिरसा वाम् युवाभ्याम् ईम् इमां मधु मधुविद्यां यत् ह यदा खलु प्रोवाच प्रोक्तवान्। तदानीमश्वस्य शिरसः सन्धानलक्षणं पुनर्मानुषस्य शिरसः प्रतिसन्धानलक्षणं च यत् भवदीयं कर्म तदाविष्कृणोमीत्यर्थः॥ सनये। षणु दाने [धा° ८।२]। खनिकषिकस्यज्यसिवसिध्वनिस्तनिवनिसनिग्रन्थिचरिभ्यश्च* [उ० ४।१३९]। तन्यतुः। तनु विस्तारे [धा° ८।१]। ऋतन्यञ्जीत्यादिना [उ० ४।२] यतुच्प्रत्ययः। यद्वा स्तन शब्दे [धा[1] २।४५७]। बाहुलकाद्यतुच्। छान्दसः सलोपः। वृष्टिम्। वृष्यते सिच्यतेऽनेनेति वृष्टिः। मन्त्रे वृषेत्यादिना [३।३।९६] क्तिन उदात्तत्वम्। आथर्वणः। अपत्यार्थेऽणि 'अन्' [६।४।१६७] इति प्रकृतिभावाट्टिलोपाभावः। शीर्ष्णा। शीर्षंश्छन्दसि [६।१।६०] इति शिरःशब्दपर्यायः शीर्षन्शब्दोऽन्तोदात्तो निपात्यते। अल्लोपे सत्युदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्॥१२॥

Under *Bṛhadāraṇyakopaniṣad* ii. 5. 16 इदं वैतन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच। तदेतदृषिः पश्यन्नवोचत्। तद्वां etc. Ācārya Śaṅkara says:

स होवाच, इन्द्रेण वा उक्तोऽस्मि एतच्चेदन्यस्मा अनुब्रूयास्तत एव ते शिरश्छिन्द्यामिति। तस्माद्वै बिभेमि यद्वै मे स शिरो न च्छिन्द्यात् तद्वामुपनेष्ये इति। तौ होचतुः, आवां त्वा तस्मात् त्रास्यावहे इति। कथं मां त्रास्येथे इति। यदा नावुपनेष्यसे। अथ ते शिरश्छित्त्वान्यत्राहृत्योपनिधास्यावः। यथाश्वस्य शिर आहृत्य तत्ते प्रतिधास्यावः। तेन नावनुवक्ष्यसि। स यदा नावनु-

---

* Both the *Pañcapādī* and the *Daśapādī* omit कषि and सनि.

[1] The *Dhātupāṭha* has स्तन वन शब्दे [१।४५७-४५८] and स्तनगदी देवशब्दे [१०।२१७-२१८].

वक्ष्यसि। अथ ते तदिन्द्रः शिरश्छेत्स्यति। अथ ते स्वं शिर आहृत्य तत्ते प्रतिधास्याव इति। तथेति तौ होपनिन्ये। तौ यद्गोपनिन्ये। अथास्य शिरश्छित्वान्यत्रोपनिदधतुः। अथाश्वस्य शिर आहृत्य तद्धास्य प्रतिदधतुः। तेन हाभ्यामनूवाच। स यदाभ्यामनूवाच, अथास्य तदिन्द्रः शिरश्चिच्छेद। अथास्य स्वं शिर आहृत्य तद्धास्य प्रतिदधतुरिति। ...तद् दंसः इति व्यवहितेन सम्बन्धः। दंस इति कर्मणो नामधेयम्। तच्च दंसः किंविशिष्टम्? उग्रं क्रूरम्। वां युवयोः। हे नरा नराकारावश्विनौ। तच्च कर्म किंनिमित्तम्? सनये लाभाय। लाभलुब्धो हि लोकेऽपि क्रूरं कर्माचरति, तथैवैतावुपलभ्येते यथा लोके, तद् आविः प्रकाशं कृणोमि करोमि यद्रहसि भवद्भ्यां कृतम्। किमिवेत्युच्यते। तन्यतुः पर्जन्यो न इव। नकारस्तूपरिष्टादुपचार उपमार्थीयो वेदे, न प्रतिषेधार्थः। यथाश्वं न अश्वमिवेति यद्वत्। तन्यतुरिव वृष्टिं यथा पर्जन्यो वृष्टिं प्रकाशयति स्तनयित्न्वादिशब्दैस्तद्वदहं युवयोः क्रूरं कर्माविष्कृणोमीति सम्बन्धः। नन्वश्विनोः स्तुत्यर्थौ कथमिमौ मन्त्रौ स्याताम्, निन्दावचनौ हीमौ। नैष दोषः। स्तुतिरेवैषा। न निन्दावचनौ। यस्मादीदृशमतिक्रूरं कुर्वतोर्युवयोर्न लोम च मीयत इति। न चान्यत् किञ्चिद्धीयत इति स्तुतावेतौ भवतः। निन्दां प्रशंसां हि लौकिकाः स्मरन्ति। तथा प्रशंसारूपा च निन्दा लोके प्रसिद्धा। दध्यङ् नामाथर्वणः। हेत्यनर्थको निपातः। यन्मधु कक्ष्यमात्मज्ञानलक्षणम् आथर्वणो वां युवाभ्याम् अश्वस्य शीर्ष्णा शिरसा प्र यदीमुवाच यत्प्रोवाच मधु। ईमित्यनर्थको निपातः॥१२॥

सनये—for gain, from *san* gain with suffix -*i*.

दंसः—is read in the list of कर्मनाम in the *Nigh*.

तन्यतुः—from *tányati* 'to resound' with -*tu*. तन्यु and तनयित्नु mean 'roaring', 'thundering'.

दध्यङ्—initiated the Aśvins into the secret of the sweet Soma (acc. to some 'to the advent of spring'). See RV. i. 117. 22, 119. 9; ix. 68. 5; SB. iv. 1. 5. 18, xiv. 1. 1. 18.

शीर्ष्णा—शीर्षन् is an enlarged form of शिरः and occurs only in the oblique cases in RV. Gk. *karēnon* head, Lat. *cernus* falling

headlong. The *a* of *śiras*, is dropped before the suffix *an* and there is the lengthening of *i* before the *r*-conjunct. *Cf*. ईर्ष्या and इरस्या.

ईम्—see. pp. 176, 246, 545.

13

अजोहवीन्नासत्या करा वां
महे यामन् पुरुभुजा पुरन्धिः ।
श्रुतं तच्छासुरिव वध्रिमत्या
हिरण्यहस्तमश्विनावदत्तम् ॥१३॥

अजोहवीत् । नासत्या । करा । वाम् ।
महे । यामन् । पुरुऽभुजा । पुरम्ऽधिः ।
श्रुतम् । तत् । शासुःऽइव । वध्रिऽमत्याः ।
हिरण्यऽहस्तम् । अश्विनौ अदत्तम् ॥

The praying (*karā'*) Purandhi (*Púrandhiḥ*), O Nāsatyas (*Nāsatyā*), invoked (*ájohavīt*) you in great difficulty (*mahé yā'man*), O long-armed ones (*purubhujā*). That (*tát**) [invocation] of Vadhrimatī (*Vadhrimatyā'ḥ*) was heard by you (*śrutám*), as though it were a command (*śā'suḥ iva*) and you bestowed on her (*adattam*), O Aśvins (*Aśvinau*), Hiraṇyahasta or the Goldhand (*hiraṇyahastam*).

सायणः । [अत्रेदमाख्यानम् ।] वध्रिमती नाम कस्यचिद्राजर्षेः पुत्री नपुंसकभर्तृका । सा पुत्रलाभार्थमश्विनावाजुहाव । तदाह्वानं श्रुत्वावश्विनावागत्य तस्यै हिरण्यहस्ताख्यं पुत्रं ददतुः । तदेतदाह । पुरुभुजा बहूनां पालकौ प्रशस्तहस्तौ वा नासत्या हे नासत्यावश्विनौ महे महनीये पूजनीये यामन् यामनि । याति गच्छतीति याम स्तोत्रम् । तस्मिन् सति करा अभिमतफलस्य कर्तारौ वां युवां पुरन्धिः बहुधीः वध्रिमती । वध्रिः पुत्रोत्पादनाशक्तः पण्डकः । तद्भार्यैतत्संज्ञा राजपुत्री अजोहवीत् पुनः पुनः स्तुत्या पुत्रलाभार्थमाहूतवती ।

* Though *tát* in *c* would lead one to suppose that the account of Purandhi is being continued, still we know from RV. x. 39. 7 युवं हवं वध्रिमत्या अगच्छतं युवं सुषुतिं चक्रथुः पुरन्धये 'you went at the call of Vadhrimatī and you made the parturition of Purandhi painless' that two different persons are meant.

युवां च वध्रिमत्याः तत् आह्वानं श्रुतम् अशृणुतम्। तत्र दृष्टान्तः। शासुः इव। यथा शासुराचार्यस्य वचनं शिष्योऽवहितः सन्नैकाग्र्येण शृणोति तद्वत्। श्रुत्वा च हे अश्विनौ तस्यै हिरण्यहस्तं सुवर्णमयपाणिं हितरमणीयपाणिं वा एतत्संज्ञं पुत्रम् अदत्तम् प्रायच्छतम्॥ अजोहवीत्। ह्वयतेर्यङ्लुगन्ताल्लङ्। यङो वा [७।३।९४] इति तिप ईडागमः। करा। करोतेः पचाद्यच्। सुपां सुलुक्° [७।१।३९] इति विभक्तेराकारः। यामन्। आतो मनिन्क्वनिब्वनिपश्च [३।२।७४] इति मनिन्। 'सुपां सुलुक्°' इति सप्तम्या लुक्। श्रुतम्। लङि 'बहुलं छन्दसि' [२।४।७३] इति विकरणस्य लुक्। 'बहुलं छन्दस्यमाङ्योगेऽपि' [६।४।७५] इत्यडभावः। शासुः शास्तुः। शासु अनुशिष्टौ [धा° २।६५]। *'शंसिशसिशासि°' [उ० २।९४] इत्यादिना संज्ञायां तृन्। इडभावः। छान्दसस्तलोपः ॥१३॥

स्कन्दस्वामी। अत्रेतिहासमाचक्षते। वध्रिमती नाम योद्धी संग्रामे शत्रुभिश्छिन्नहस्ताश्विनौ तुष्टाव। तस्या अश्विनौ हिरण्मयं हस्तं ददतुरिति। तदिहोच्यते। हे नासत्यौ करा। पूर्वपदलोपोऽत्र द्रष्टव्यः। छिन्नकरा शत्रुभिश्छिन्नहस्ता। अथवा स्तुतीनां कर्त्री करा। वां युवां महे महति यामन् यान्ति योद्धारो यस्मिन् स यामः संग्राम इहाभिप्रेतः। तत्र। हे पुरुभुजा बहूनां हविषामभ्यवहर्तारौ पालयितारौ वार्तानाम्। पुरन्धिः बहुप्रज्ञा। श्रुतं युवामपि श्रुतवन्तौ। तदाह्वानम्। शासुरिव शासितुरिव पितुराचार्यस्य वा। महतादरेणेत्यर्थः। कस्याह्वानम्? उच्यते। वध्रिमत्याः। श्रुत्वा च हिरण्यहस्तम्। हिरण्यशब्देनात्र तद्विकार उच्यते। हिरण्मयौ हस्तौ यस्मिन् स हिरण्मयो बाहुः[1]। तम् हे अश्विनौ अदत्तं दत्तवन्तौ स्थः ॥१३॥

---

* Both the *Pañcapādī* and the *Daśapādī* read: तमृतची शंसिवदादिभ्यः संज्ञायां चानिटौ.

[1] The fact that हिरण्यहस्तम् is accented on the first syllable clearly shows that it is a Bah. compd. Sk. is, therefore, forced to take it as an adj. qualifying बाहुम् understood. This is very far-fetched and far from convincing.

वेङ्कटमाधवः । [अजोहवीत्] आजुहाव वाम् नासत्यौ कर्मणामाश्रयाणां कर्तारौ [महे] महति [यामन्] यज्ञे [पुरुभुजा] बहूनां हविषां भोक्तारौ पुरन्धिः] स्त्री वध्रिमती । तत्राह्वानं भवन्त्यां श्रुतमादरेण यथा शासितुराचार्यस्य शासनम् । अथास्यै हिरण्यहस्तं नाम पुत्रमदत्तम् ॥१३॥

Evidently two different ladies are spoken of in the two hemistichs. In *a b* the poet mentions Purandhi who is mentioned again in i. 117. 19 (यथा युवामिदह्वयत् पुरन्धिरागच्छतं सीं वृषणाववोभिः). We learn from x. 39. 7 (युवं हवं वध्रिमत्या आगच्छतं युवं सुषुतिं चक्रथुः पुरन्ध्ये) that the Asvins helped her to an easy parturition.

अजोहवीत्—Aor. 3. s. of the inten. of ह्वे. Pres. जोहवीति.

करा—(*i*) from कृ to make with पचाद्यच्, active; (*ii*) from कृ to commemorate, स्तुतीनां कर्त्री. *Cf.* RV. i. 117. 15: अजोहवीदश्विना तौग्र्यो वाम्, i. 117. 16 अजोहवीदश्विना वर्तिका वाम्.

महे—Besides महत् which has come down to classical Sanskrit we find in RV. the following adjectives meaning 'great': मह्, मह, महिन्, महि and महस्.

यामन्—from या to go generally means course, journey. *Cf.* i. 181. 7 उपस्तुतावततं नाधमानं यामन्नयामञ्छृणुतं हवं मे being praised you aid the supplicant, whether you are on your journey or not. As journeys are generally attended with danger, I am inclined to take यामन् in our passage in the sense of 'the hour of need' a sense once attributed to the word by Geldner who thinks अवसे is to be understood here after महे.

पुरुभुजा—unaccented, because it is a voc. पुरु विस्तीर्णौ भुजौ ययोस्तौ । In view of the fact that *purubhojasā* occurs in viii. 22. 16 apparently exactly in the sense of पुरुभुजा, Geld. regards the latter as an upapada compound in the sense of 'helpers of many'. बहूनां पालकौ S. बहूनां हविषामभ्यवहर्तारौ पालयितारौ वार्तानाम् Sk. So we should say पुरून् भुङ्क्तः पालयत इति पुरुभुजौ । कृदुत्तरपदप्रकृतिस्वरत्वम् । तत्सम्बोधनम्. *Cf.* RV. vi. 63. 8: पुरु हि वां पुरुभुजा देष्णम्, because manifold is your gift, O helpers of many.

पुरन्धिः—see p. 511

श्रुतम्—past, pass. part of श्रु.

शासुः—under RV. i. 73. 1 S. says: मृभूविदि° [उ० १।११] इत्यादिना विधीयमान उप्रत्ययो बहुलवचनाच्छासेरपि द्रष्टव्यः। तत्र निदित्यनुवृत्तेराद्युदात्तत्वम्। We should rather say अर्तिपृवपियजितनिधनितपिभ्यो नित् [उ० २।११८] इति विधीयमान उसिप्रत्ययो बहुलवचनाच्छासेरपि द्रष्टव्यः। The stem is शासुस् *n.*, like धनुस्, आयुस् etc. यस्य शासुरुभयासः सचन्ते RV. i. 60. 2, both (gods and mortals) follow his command.

वध्रिमत्याः—वध्रि is formed from *vadh* to beat, to strike, to kill with *-ri* and means 'emasculated'. Skt. *vadhar* murderous weapons, Av. *vadar* weapon. Gk. *ethris*, *ithris* eunuch. Vadhryaśva means 'having a castrated horse'. वृष्णो वध्रिः प्रतिमानं बुभूषन् पुरुत्रा वृत्रो अशयद्व्यस्तः RV. i. 32. 7. वध्रिः छिन्नमुष्कः पुरुषः वृष्णो रेतःसेचनसमर्थस्य पुरुषान्तरस्य प्रतिमानं सादृश्यं प्राप्तुमिच्छन् यथा न शक्नोति, तद्वत्। अशयदिति शेषः। वृत्रः पुरुत्रा बहुष्ववयवेषु व्यस्तः विविधं क्षिप्तः ताडितः सन् अशयत् भूमौ पतितवान्। S. वध्रिमती is one who has a castrated or impotent man for her husband. *Cf.* RV. i. 117. 24 हिरण्यहस्तमश्विना रराणा पुत्रं नरा वध्रिमत्या अदत्तम्. You gave, O Aśvins, promptly a son Hiraṇyahasta to Vadhrimatī, O heroes.

14

आस्नो वृकस्य वर्तिकामभीके	आस्नः । वृकस्य । वर्तिकाम् । अभीके ।
युवं नरा नासत्यामुमुक्तम् ।	युवम् । नरा । नासत्या । अमुमुक्तम् ।
उतो कविं पुरुभुजा युवं ह	उतो इति । कविम् । पुरुऽभुजा । युवम् । ह ।
कृपमाणमकृणुतं विचक्षे ॥१४॥	कृपमाणम् । अकृणुतम् । विऽचक्षे ॥१४॥

Right (*abhī'ke*) from the mouth (*āsnáḥ*) of the wolf (*vṛ'kasya*), O Nāsatyas (*Nāsatyā*), you (*yuvám*) set free (*amumuktam*) the quail (*vártikām*), O heroes (*narā*), and further (*utá u*), O helper of many (*purubhujā*), you (*yuvám*) made (*akṛṇutam*) indeed (*ha*) the wailing (*kṛ'pamāṇam*) poet (*kavím*) to see (*vicákṣe*).

सायणः। वर्तिका चटकसदृशस्य पक्षिणः स्त्री तामरण्ये वर्तमानेन शुना ग्रस्तां पुरा किलाश्विनावमोचयताम्। तदेतदाह। हे नरा नेतारौ [नासत्या] नासत्यावश्विनौ युवम् युवाम् अभीके अभिगते वृकवर्तिकयोः संग्रामे वृकस्य विकर्तकस्य शुनः आस्नः आस्यात् वर्तिकाम् चटकसदृशीम् अमुमुक्तम् अमोचयतम्। यास्कस्त्वाह। पुनःपुनर्वर्तते प्रतिदिवसमावर्तत इति वर्तिकोषाः। तां वृकेणावरकेण सर्वजगत्प्रकाशकेनाच्छादयित्रा सूर्येण ग्रस्तां तदीयमुखादश्विनावमुञ्चतामिति [1][नि° ५।२१]। उतो अपि च पुरुभुजा महाबाहू प्रभूतहस्तौ वा युवम् ह युवां खलु कृपमाणम् स्तुवन्तं कविम् एतत्संज्ञकमन्धमृषिं विचक्षे विशेषेण द्रष्टुं समर्थम् अकृणुतम् अकुरुतम्॥ आस्नः। पद्दित्यादिना [६।१।६३] आस्यशब्दस्यासन्नादेशः। अल्लोपोऽनः [६।४।१३४] इत्यकारलोपः। उदात्तनिवृत्तिस्वरेण ऊडिदम्° [६।१।१७१] इति वा विभक्तेरुदात्तत्वम्। अमुमुक्तम्। मुचेरन्तर्भावितण्यर्थाल्लुङि बहुलं छन्दसि [२।४।७६] इति विकरणस्य श्लुः। कृपमाणम्। [2]कृपिः स्तुतिकर्मा तुदादिषु द्रष्टव्यः। विकरणस्वरे प्राप्ते वृषादीनां च [६।१।२०३] इत्याद्युदात्तत्वम्। विचक्षे। 'तुमर्थे सेसेन्°' [३।४।९] इति सेन्प्रत्ययः। 'स्कोः संयोगाद्योः°' [८।२।२९] इति सलोपः॥१४॥

आस्नः—In RV. there are three stems आस् (Av. *āh*, Lat. *ōs*), आसन् (after the analogy of *akṣan-*) and आस्य meaning mouth.

वर्तिका—Kātyāyana framed the Vārttika वर्तका शकुनौ प्राचाम् vii. 3. 45. 8. See RV. i. 117. 16, i. 118. 8; x. 39. 13.

---

[1] आदित्योऽपि वृक उच्यते। यदावृङ्क्ते। अथोऽप्यश्विनौ वर्तिका वामात्तो यत् सीमसुर्चतं वृकस्य। आह्वयन्त्या अश्विनावादित्येनाभिग्रस्ता तामश्विनौ प्रमुमुचतुरित्याख्यानम्। निरुक्तम् ५।२१।

[2] कृपायति and कृपण्यति are read in the *Nighaṇṭu* [iii. 13] in the list of अर्चतिकर्म roots. Yāska says [vi. 8] कृप् कृपतेर्वा कल्पतेर्वा। In the *Pāṇinīya Dhātupaṭha* we find कृपू सामर्थ्ये [i. 450] and चार कृप श्रथ दौर्बल्ये [x. 327]. Hence Sāyaṇa says द्रष्टव्यः.

अभीके—अभीक like प्रतीक is derived from the weak grade of अञ्च् to go. In the *Nighaṇṭu* अभीके is read in the list of संग्रामनाम and again it is read with अपित्वे. Yāska explains: अपित्वेऽभीके इत्यासन्नस्य। अपित्वे प्राप्ते। अभीकेऽभ्यक्ते।

अमुमुक्तम्—pluperfect 2. du. of मुच् to release, *cf.* RV. vi. 50. 10: अत्रिं न महस्तमसोऽमुमुक्तं तूर्वतं नरा दुरितादभीके As you rescued Atri from the great darkness, so help, O heroes, right in our need.

उतो—उत उ। And further.

कविम्—Acc. to VM. the poet is Vailva, the father of Uśanas. Acc. to Sk. kavi refers to the sage Kaṇva: कविं मेधाविनं कण्वम्. Sk. explains अवेतिहासमाचक्षते। कण्व ऋषिरन्धोऽश्विनौ तुष्टाव। तस्याश्विनौ चक्षुर्दत्तुरिति।...तदेतन्मन्त्रान्तरेऽपि कक्षीवानाह्यति। युवं कण्वायापिरिप्ताय [ऋ० सं० १।११८।७] इति। कुत्सेनाप्युक्तम्—याभिः कण्वं प्र सिषासन्तम् [ऋ० सं० १।११२।५] इति।

कृपमाणम्—lamenting. *Cf.* AV. v. 19. 3: अश्रूणि कृपमाणस्य यानि जीतस्य वावृतुः the tears that flowed from the lamenting one who had been conquered. Lat. *crepo* creak, rattle, talk much of.

विचक्षे—dat. inf. of वि-चक्ष्. *Cakṣase* from the stem in *as* also occurs. अभिचक्षे, अभिप्रचक्षे, अवचक्षे and सचक्षे are also found in RV.

15

चरित्रं हि वेरिवाच्छेदि पर्ण-	चरित्रम्। हि। वेःऽइव। अच्छेदि। पर्णम्।
माजा खेलस्य परितक्म्यायाम्।	आजा। खेलस्य। परिऽतक्म्यायाम्।
सद्यो जङ्घामायसीं विश्पलायै	सद्यः। जङ्घाम्। आयसीम्। विश्पलायै।
धने हिते सर्तवे प्रत्यधत्तम् ॥१५॥	धने। हिते। सर्तवे। प्रति। अधत्तम्॥१५॥

The leg (*caritram*) was cut off (*ácchedi*), like the wing of a bird (*véḥ parṇám iva*) in the race (*ājā'*) at the tournament (*páritakmyāyām*) of Khela (*Khelásya*). Forthwith (*sadyáḥ*) you put (*prátyadhattam*) an iron (*ā'yasīm*) leg (*jáṅghām*) on Viśpalā (*Viśpálāyai*) to run (*sártave*), for the stake (*dháne hité*).

सायणः। अगस्त्यपुरोहितः खेलो नाम राजर्षिः। तस्य सम्बन्धिनी विश्पला नाम स्त्री। सा संग्रामे शत्रुभिश्छिन्नपादासीत्। पुरोहितेनागस्त्येन स्तुतावश्विनौ रात्रावागत्यायोमयं पादं समधत्ताम्। तदेतदाह। आजा आजौ संग्रामेऽगस्त्यपुरोहितस्य खेलस्य सम्बन्धिन्या विश्पलाख्यायाः चरित्रम् चरणं वेरिव वेः पक्षिणः पर्णम् पतत्रमिव अच्छेदि हि पुरा छिन्नमभूत् खलु। हे अश्विनौ युवामगस्त्येन स्तुतौ सन्तौ परितक्म्यायाम्। परितक्म्या रात्रिः। परित एनां तकति [निरु° ११।२५] इति यास्कः। एनामुभयतः सूर्यो गच्छतीति तस्यार्थः। रात्रावागत्य सद्यः तदानीमेव हिते शत्रुषु निहिते धने जेतव्ये विषयभूते सति सर्तवे सर्तुं गन्तुं विश्पलायै आयसीम् अयोमयीं जङ्घां जङ्घोपलक्षितं पादं प्रत्यधत्तम्। सन्धानमेकीकरणं कृतवन्तावित्यर्थः॥ चरित्रम्। अर्तिलूधूसूखनसहचर इत्रः [३।२।१८४] इति करण इत्रप्रत्ययः। आजा। सुपां सुलुक्° [७।१।३९] इति विभक्तेर्डादेशः। आयसीम्। अयःशब्दाद्विकारार्थे प्राणिरजतादिभ्योऽञ् [४।३।१५४]। 'टिड्ढाणञ्°' [४।१।१५] इति ङीप्॥१५॥

स्कन्दस्वामी। [१।११२।११] अत्रेतिहासमाचक्षते। अगस्त्यपुरोहितः एलो [खेलो ?] नाम राजा बभूव। तस्य सेनायां योद्‌ध्री विश्पला नाम स्त्री। तस्या अन्नार्थं धनार्थं च युध्यमानायाः शत्रवो जङ्घां चिच्छिदुः। तदपि कक्षीवान् वक्ष्यति। चरित्रं हि वेरिवेति। तस्याश्छिन्नां जङ्घां ज्ञात्वा पुरोहितोऽगस्त्योऽश्विनौ तुष्टाव। तौ विश्पलां प्रति जग्मतुः। तदेतत्कक्षीवानपि वक्ष्यति। सूनोर्मानें [ऋ° सं° १।११७।११] इति। आगत्य च सद्यो लोहमयीं जङ्घां विश्पलायाश्चक्रतुः। तदेतत् कक्षीवानेव वक्ष्यति। सद्यो जङ्घामिति, प्रति जङ्घाम् [ऋ° सं° १।११८।८] इति च।

वेङ्कटमाधवः। विश्पलां नाम स्त्रियमैलस्यार्थाय तस्य शत्रुभिः सह युध्यमानां शत्रुभिश्छिन्नजङ्घामगन्त्रीं सहस्रधननिमित्ते संग्रामे एलस्य पुरोहितेनागस्त्येन स्तुतावश्विनौ लोहमयजङ्घाप्रतिसन्धानाद् ररक्षतुः।

चरित्र—is formed by adding त्र (originally *-tr* with the secondary suffix *-a*) with the connecting vowel *i*. Similarly formed

are खनित्र shovel, जनित्र birth-place, पवित्र sieve, भरित्र arm, भवित्र world, सनित्र gift. Note that the word चरित्र means विचरणसाधन (instrument of moving about) *i.e.*, leg or foot in RV: मा रक्षन्तु विस्रसश्चरित्रात् may they protect me from the breaking of the leg viii. 48. 5. In the later language this sense has become obsolete and चरित, चरित्र, आचरण etc. mean conduct, behaviour. In German *wandeln* means to wander, and the noun *Wandel* means conduct, behaviour.

वेः—वि means bird. Lat. *ovis.*

पर्णम्—wing. Lithuanian *spárna*. Eng. *fern.*

आजा—loc. s. of आजि race.

खेलस्य—Khela is mentioned only here in RV.

परितक्म्यायाम्—from तकि, तकति to run, to rush along. Av. *tacaiti* runs, flows, Mod. Pers. *tāxtan* run. तकति is read in the list of गतिकर्म roots in the *Nighaṇṭu*. So परितक्म्या means running about, turmoil, meléc.

विश्पलायै—Acc. to VM., Sk. and S., Viśpalā was a female soldier in the army of Khela. Acc. to Pischel Viśpalā was a racing mare who having broken her leg while running a a race in honour of Vivasvant (Khela) was supplied by the Aśvins with an iron leg which enabled the mare to run the race and win the prize. In RV. i. 182. 1 the Aśvins are called Viśpalāvasū or the patrons of Viśpalā.

धने हिते—the wages placed apart; *cf.* प्रधने in st. 2.

सर्तवे—dat. inf. of सृ flow.

16

शतं मेषान्वृक्ये चक्षदान-
मृज्राश्वं तं पितान्धं चकार ।
तस्मा अक्षी नासत्या विचक्ष
आधत्तं दस्रा भिषजावनर्वन् ॥१६॥

शतम् । मेषान् । वृक्ये । चक्षदानम् ।
ऋज्रऽअश्वम् । तम् । पिता । अन्धम् । चकार ।
तस्मै । अक्षी इति । नासत्या । विऽचक्षे ।
आ । अधत्तम् । दस्रा । भिषजौ । अनर्वन् ॥१६॥

His father (*pitā'*) made (*cakāra*) blind (*andhám*) the Ṛjrāśva (*tám Ṛjrā'śvam*) who had given (*cakṣadānám*) a hundred (*śatám*) rams (*meṣā'n*) to the she-wolf (*vṛkyé*). On him (*tásmai*), O Nāsatyas (*Nāsatyā*) you bestowed (*ā' adhattam*) eyes (*akṣī'*) to see (*vicákṣe*), O wonder-workers (*dasrā*), unrivalled (*anarván*) physicians (*bhiṣajau*).

सायणः। वृषागिरः पुत्र ऋज्राश्वो नाम राजर्षिः, तस्य समीपेऽश्विनोर्वाहनभूतो रासभो वृकी भूत्वावतस्थे। स च तस्या आहारार्थमेकोत्तरशतसंख्यान् पौरजनानां स्वभूतान्मेषाञ्छकलीकृत्य प्रददौ। ऋज्राश्वः शतमेकं च मेषान् [ऋ० सं० १।११७।१८] इति मन्त्रान्तरे दर्शनात्। एवं पौराणामहिते प्रवृत्तं पिता शापेन नेत्रहीनमकरोत्। तेन स्तूयमानावश्विनावस्मद्वाहननिमित्तमस्यान्ध्यं जातमिति जानन्तौ तस्मा अक्षिणी प्रायच्छतामिति। तदेतदाह। अत्र तच्छब्दश्रुतेर्यच्छब्दाध्याहारः। यः ऋज्राश्वः शतं शतसंख्याकान् मेषान् वृक्ये आत्मना पोषिताय वृकस्त्रियै शकलीकृत्य प्रादात् तं चक्षदानम्। क्षदतिरत्तिकर्मात्र शकलीकरणार्थः। शकलीकृत्य दत्तवन्तम् ऋज्राश्वं पिता शापेन अन्धं दृष्टिहीनं चकार कृतवान्। हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ वा भिषजौ देवानां वैद्यभूतौ। अश्विनौ वै देवानां भिषजौ [ऐ० ब्रा० ४।१, तै० आ० २।३।११।१२] इति श्रुतेः। दस्रा दर्शनीयावेतत्संज्ञौ वा हे अश्विनौ। अनर्वन् अनर्वणी द्रष्टव्यं प्रति पितृशापाद्गमनरहिते। अक्षी चक्षुषी विचक्षे विविधं द्रष्टुं समर्थे तस्मै ऋज्राश्वाय आ अधत्तम् न्यधत्तम् अकुरुतम्॥ वृक्ये। वृकोऽरण्यश्वा तस्य स्त्री वृकी। जातेरस्त्रीविषयादयोपधात् [४।१।६३] इति ङीष्। जसादिषु छन्दसि वावचनम्° [७।३।१०९।१] इति चतुर्थ्येकवचनस्याडभावे यणादेशे "उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' [८।२।४] इति परस्यानुदात्तस्य स्वरितत्वम्। चक्षदानम्। क्षदेर्लिटः कानच्। चित्स्वरः। अक्षी। ई च द्विवचने [७।१।७७] इति द्विवचनपरत्वादक्षिशब्दस्येकारान्तादेशः*। स च उदात्तः। तस्मिन्

* ई च द्विवचन इति परत्वादक्षशब्दस्येकारान्तादेशः। M. ई च द्विवचने ...इति परत्वात् अक्षशब्दस्य ई° P. See S. under i. 72. 10, 117. 17, 120, 6.

कृते सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव [प० ४०] इति परिभाषया पुनर्नुम् न भवति। विचक्षे। चक्षेः सम्पदादिलक्षणो भावे क्विप् [३।३।१०८।९]। अनर्वन्। ऋ गतौ*। अस्माद् अन्येभ्योऽपि दृश्यन्ते [३।२।७५] इति दृशिग्रहणस्य विध्यन्तरोपसंग्रहार्थत्वाद्भावे वनिप्। अर्वं गमनं विषयं प्रत्यनयोर्नास्तीति बहुव्रीहौ नञ्सुभ्याम् [६।२।१७२] इत्युत्तरपदान्तोदात्तत्वम्। सुपां सुलुक्° [७।१।३९] इति द्विवचनस्य लुक्। छान्दसो नलोपाभावः ॥२६॥

शतम्—'एकं च' इति वाक्यशेषः। कुत एतत्। ऋज्राश्वः शतमेकं च मेषान् [ऋ० सं० १।११७।१८] इति मन्त्रान्तरे दर्शनात्। स्कन्दः। अन्वहमेकैकं यावच्छतम्। माधवः।

वृक्ये - Note the independent svarita. *Vṛ'ka* is accented on the first syllable, *vṛkī'* on the second, because the fem. suff. is *ṅīṣ* (*ī'*), *vṛkī' + e = vṛk + y + e = vṛkyé*.

The first line is regarded as a complete sentence, because acc. to Pāṇini शतृ and शानच् are the substitutes for लट् and consequently they may sometimes act as finite verbs.

चक्षदानम्—perf. part. of चद् to cut up, divide, distribute. विशसनम् VM. चदिरत्र विशसनार्थः Sk. चदिः शकलीभावकर्मा वा दानकर्मा वा। Mādhava. चक्ष is read in the list of उदकनाम and अन्ननाम in the *Nigh*. तद्यथैवादो मनुष्यराज आगतेऽन्यस्मिन् वार्हति, उक्षाणं वा वेहतं वा क्षदन्त एवमेवास्मा एतत् क्षदन्ते यदग्निं मन्थन्ति, अग्निर्हि देवानां पशुः। *Ait. Br.* i. 15.

शतं मेषान् वृक्ये मामहानं तमः प्रणीतमशिवेन पित्रा।
आक्षी ऋज्राश्वे अश्विनावधत्तं ज्योतिरन्धाय चक्रथुर्विचक्षे ॥
शुनमन्धाय भरमह्वयत्सा वृकीरश्विना वृषणा नरेति।
जारः कनीन इव चक्षदान ऋज्राश्वः शतमेकं च मेषान् ॥

RV. i. 117. 17-18.

He had dealt out a hundred rams to the she-wolf and was led into darkness (blindness) by his wicked father. You gave, O Aśvins, eyes to Ṛjrāśva, you made for the blind light to see.

Safety, prosperity invoked the she-wolf on the blind man, O Aśvins, O bulls, with these words, O heroes, 'Ṛjrāśva (it

---

* गतिप्रापणयोः [धा° १।८९८]। ऋ सृ गतौ [धा° ३।१६-१७]।

is who) like a young lover has served up a hundred and one rams'.

ऋज्राश्वम्—ऋज्र means moving straight, quick, white or shining. *Cf.* दिवा हरिर्ददृशे नक्तमृज्रः RV. ix. 97. 9. During the day he appeared as a dun-horse and during the nig' t as a white (one).

अक्षी—The stem was originally *akṣ* and the original dual is probably preserved in अक्षी (*cf.* वाससी from वासस्). The analogy of this अक्षी was followed in अक्षीभ्याम् etc.

अनर्वन्—Indian commentators regard it as an adj. qualifying अक्षी. अनर्वणी अप्रत्यृते ओप्रगमने सूक्ष्मदर्शने VM. अन्यं प्रत्याश्रिततया यो न गतः सोऽनर्वा । व्यत्ययेन चैकवचनम् । अनर्वणी अनन्याश्रिते, स्वायत्ते । पिता शापेनापनेतुमशक्य इत्यर्थः । Sk. अस्खलिते Mādhava.

It may also be regarded as a loc. used adverbially (like अये) meaning without hindrance. अर्वन् means enemy, rival. *Cf.* RV. i. 94. 2 अनर्वा चेति.

The best way would be to regard it as an adj. qualifying भिषजा. In the Vedas when there are two words with the same case-ending in apposition, sometimes the first alone retains its ending. (*Cf.* the principle of पुंवद्भाव and loss of endings in Samāsa.) Here there are three vocatives placed side by side and so the last drops its ending.

17

आ वां रथं दुहिता सूर्यस्य	आ । वाम् । रथम् । दुहिता । सूर्यस्य ।
कार्ष्मेवातिष्ठदर्वता जयन्ती ।	कार्ष्मऽइव । अतिष्ठत् । अर्वता । जयन्ती ।
विश्वे देवा अन्वमन्यन्त हृद्भिः	विश्वे । देवाः । अनु । अमन्यन्त । हृत्ऽभिः ।
समु श्रिया नासत्या सचेथे ॥१७॥	सम् । ऊँ इति । श्रिया । नासत्या । सचेथे इति ॥

The daughter (*duhitā'*) of the Sun (*Sū'ryasya*) mounted (*ā' atiṣṭhat*) your (*vām*) chariot (*rátham*) like one who has

won (*jáyantī iva*) the goal (*kā'rṣma*) with the horse (*árvatā*). All (*viśve*) the Gods (*devā'ḥ*) approved (*ánu amanyanta*) with their hearts (*hṛdbhiḥ*). You, O Nāsatyas (*Nāsatyā*), indeed are (*u*) united with (*sám sacethe*) glory (*śriyā'*).

सायणः। सविता स्वदुहितरं सूर्याख्यां सोमाय राज्ञे प्रदातुमैच्छत्। तां सूर्यां सर्वे देवा वरयामासुः। तेऽन्योन्यमूचुः। आदित्यमवधिं कृत्वाजिं धावाम। योऽस्माकं मध्य उज्जेष्यति, तस्येयं भविष्यतीति। तत्राश्विना-वुदजयताम्। सा च सूर्या जितवतोस्तयो रथमारुरोह। अत्र प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् [ऐ० ब्रा० १६।७] इत्यादिकं ब्राह्मणमनुसन्धेयम्। इदं चाख्यानं सूर्याविवाहस्य स्तावकेन सत्येनोत्तभिता भूमिः [ऋ० सं० १०।८५।१] इति सूक्तेन विस्पष्टयिष्यते। हे अश्विनौ वाम् युवयोः रथम् कार्ष्मेव। कार्ष्मशब्दः* काष्ठावाची। यथा काष्ठामाजिधावनस्यावधितया निर्दिष्टं लक्ष्य-माशुगामी कश्चित् सर्वेभ्यो धावद्भ्यः पूर्वं प्राप्नोति, एवमेव सर्वेभ्यो देवेभ्यः पूर्वम् अर्वता शीघ्रमवधिं प्राप्नुवता युष्मदीयेनाश्वेन करणभूतेन युवाभ्यां जयन्ती जीयमाना सूर्यस्य सवितुः दुहिता या अतिष्ठत् आरूढवती। विश्वे सर्वे इतरे देवाः एतदारोहणस्थानं हृद्भिः हृदयैः अन्वमन्यन्त अन्वजानन्। तदानीं हे [नासत्या] नासत्यावश्विनौ श्रिया ऋक्सहस्रलाभरूपया सम्पदा कान्त्या वा युवां संसचेथे संगच्छेते॥ जयन्ती। व्यत्ययेन कर्मणि शतृप्रत्ययः। हृद्भिः। पद्दन्नित्यादिना [६।१।६३] हृदयशब्दस्य हृद्भावः। सचेथे। षच समवाये [धा° १।९७७]। स्वरितत्वादात्मनेपदम् ॥१७॥

कार्ष्म—occurs only in RV. It means the goal in a race-course. The stem is कार्ष्मन् n. formed with -*man* added to *kṛ* with the वृद्धि of the radical vowel which is accented. *Cf.* भार्मन्

---

* काष्ठवाची।...यथा काष्ठम्—all. But the word is काष्ठा and not काष्ठ. Yāska says: आज्यन्तोऽपि काष्ठोच्यते, क्रान्त्वा स्थितो भवति (*Nir.* ii. 16). VM. has कार्ष्मशब्दः काष्ठावचनः, यथाजिं धावञ्छीघ्रं काष्ठामातिष्ठति...Under RV. ix. 74. 8, S. says: कार्ष्मशब्दः काष्ठावचनः.

table, शाक्मन् power. Sk.'s explanation क्रियते तदिति कार्म शुभाशुभलक्षणं कर्म, तद् यथा कर्तारमातिष्ठति, एवमातिष्ठद्दाश्विनवती is very far-fetched.

जयन्ती—Acc. to Indian commentators the active has been used here for the passive. But that is not necessary.

सचेथे—सच् or सम्-सच् Atm. with the Instr. means to be connected with, to associate with, to obtain. संसचेथे=संगच्छेथे. *Cf.* सचन्त यद्वसः सूर्येण RV. x. 111. 7 (संगच्छन्ते S.)

The Aśvins are in many parts of RV. connected with Sūryā, the youthful daughter of the Sun. Allusion is also made to Sūryā in connexion with the Aśvins in x. 55. 9, where, however, they no longer appear as her husbands.

सोमो वधूयुरभवदश्विनास्तामुभा वरा ।
सूर्यां यत् पत्ये शंसन्तीं मनसा सवितादद्दात् ॥९॥
यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः ।
विश्वे देवा अनु तद्वामजानन् पुत्रः पितराववृणीत पूषा ॥१४॥

Soma was the wooer, the Aśvins were the two friends of the bridegroom, when Savitṛ gave to her husband Sūryā, consenting in her mind. When ye came, O Aśvins, to the marriage procession of Sūryā, to make enquiries, all the gods approved, and Pūṣan, as a son, chose you as his parents. O. S. T. It appears that the Aśvins were originally the best men, then they themselves must have married Sūryā.

18

यदयातं दिवोदासाय वर्ति-	यत् । अयातम् । दिवःऽदासाय । वर्तिः ।
र्भरद्वाजायाश्विना हयन्ता ।	भरत्ऽवाजाय । अश्विना । हयन्ता ।
रेवदुवाह सचनो रथो वां	रेवत् । उवाह । सचनः । रथः । वाम् ।
वृषभश्च शिंशुमारश्च युक्ता ॥१८॥	वृषभः । च । शिंशुमारः । च । युक्ता ॥१८॥

As (*yát*) you, O Aśvins (*Aśvinā*) went (*áyātam*) the round (*vartíḥ*) for Divodāsa (*Divodāsāya*) for Bharadvāja (*Bharádvājāya*), driving (*háyantā*) [the steed], your (*vām*) true (*sacanáḥ*) chariot (*ráthaḥ*) carried (*uvāha*) rich goods (*revát*). The bull (*vṛṣabháḥ ca*) and the dolphin (*śiṁśumā'raḥ ca*) were yoked to it (*yuktā'*).

सायणः। [अश्विना] हे अश्विनौ हयन्ता स्तुतिभिराहूयमानौ युवां भरद्वाजाय सम्भ्रियमाणहविर्लक्षणान्नाय यजमानाय दिवोदासाय एतसंज्ञाय राजर्षयेऽभीष्टं फलं दातुं वर्तिः तदीयं गृहं यत् यदा अयातम् अगच्छतं तदानीं रेवत् धनयुक्तमन्नं वाम् युवयोः सचनः सेवनो रथः उवाह तस्मै दिवोदासाय प्रापयामास। अपि च तस्मिन् रथे वृषभः अनड्वान् शिंशुमारः ग्राहश्च परस्परविरुद्धावपि स्वसामर्थ्यप्रकटनाय युक्ता वाहनतया संयुक्तावास्ताम्॥ दिवोदासाय। दिवश्च दासे षष्ठ्या अलुग्वक्तव्यः [काशिका ६।३।२१*] इत्यलुक्। दिवोदासादीनां छन्दस्युपसंख्यानम्† [६।२।९१।१] इति पूर्वपदाद्युदात्तत्वम्। भरद्वाजाय। भृञ् भरणे [धा° १।८८२]। अस्माद् व्यत्ययेन कर्मणि शतृप्रत्ययः। शतुः छन्दस्युभयथा [३।४।११७] इत्यार्धधातुकत्वेन लसार्वधातुकानुदात्तत्वाभावात्प्रत्ययाद्युदात्तत्वम्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। हयन्ता। हृञः कर्मणि लटो व्यत्ययेन शतृ। बहुलं छन्दसि [६।१।३४] इति सम्प्रसारणम्। शपि गुणे छान्दसोऽयादेशः। रेवत्। रयिशब्दान्मतुप्। रयेर्मतौ बहुलम् [६।१।३७।६] इति सम्प्रसारणम्। छन्दसीरः [८।२।१५] इति मतुपो वत्वम्। रयिशब्दाच्च‡ [का° ६।१।१७६] इति मतुप उदात्तत्वम्। सचनः। षच सेवने [धा° १।९७७]। अनुदात्तेतश्च हलादेः [३।२।१४९] इति युच्। 'सुपां सुलुक्' [७।१।३९] इति विभक्तेराकारः॥१८॥

---

* The Bhāṣya has दिवश्च दासे ६।३।२१।५।

† Both Bhāṣya and Kāśikā have आद्युदात्तप्रकरणे दिवो°.

‡ The Bhāṣya has मतुबुदात्तत्वे रेवद्ग्रहणम् vi. 1. 176. 1 which is found in the Kāśikā as रेशब्दाच्च मतुप उदात्तत्वं वक्तव्यम्.

स्कन्दस्वामी। [१।११२।१४] दिवोदासो नाम राजा शम्बरनाम्नासुरेण युयुत्समानोऽश्विनौ स्तुत्वा सहायावाजुहाव। तस्यागत्याश्विनौ सहायौ बभूवतुः।

भयातम्—accented because of the conjunction यत्. निपातैर्यद्यदिहन्तकुविन्नेच्चण्कच्चिद्यत्र युक्तम् viii. 1. 30.

दिवोदासाय—"Divodāsa Atithigva is one of the leading princes in the early Vedic age. He was a son of Vadhryaśva, and father, or more probably grandfather, of Sudās. His great enemy was Sambara, the Dāsa, who was apparently the chief of a mountain people, and whom he repeatedly defeated" (*Vedic Index*). RV. i. 112. 14 याभिर्महामतिथिग्वं कशोजुवं दिवोदासं शम्बरहत्य आवतम् by which you aided the great Atithigva Kaśojū Divodāsa in the battle with Sambara.

वर्तिः—neuter *s*-stem, from वृत् to revolve (Lat. *verto* I turn) like सर्पिस्, हविस्, अर्चिस्, ज्योतिस्, बर्हिस् etc. It means circuit round and is generally the cognate object of a गत्यर्थक root.

भरद्वाजाय—It is a governing compd. meaning lit. carrying off the prize, like Jamad-agni (going to Agni).

In these verbally governing compds the first member is generally a pres. part. and the second member its object. The compd. is accented on the final syll. of the first member.

"Acc. to the Pañcaviṁśa Brāhmaṇa Bharadvāja was the Purohita of Divodāsa." Acc. to VM. Divodāsa was a descendant of Bharadvāja: भरद्वाजकुलोत्पन्नाय.

हयन्ता—Nom. du. of pres. part. of the denom. हय to run. The root हि is स्वादि. "There are a few denominative forms made without suffix direct from nominal stems" (MACDONELL).

रेवत्—wealthy (Av. *raēvant*) formed from रयि (from रि a reduced form of रा to give) with the possessive suffix *-vant*. रयिमत् and रयिवत् are also rare forms. Hence, Kātyāyana says: रयेर्मतौ बहुलम्.

सचनः—formed from सच् to accompany with अन (युच्) accompanying, never-failing.

शिंशुमारः—later शिशुमारः.

19

रयिं सुक्षत्रं स्वपत्यमायुः	रयिम् । सुऽक्षत्रम् । सुऽअपत्यम् । आयुः ।
सुवीर्यं नासत्या वहन्ता ।	सुऽवीर्यम् । नासत्या । वहन्ता ।
आ जह्नावीं समनसोप वाजै-	आ । जह्नावीम् । सऽमनसा । उप । वाजैः ।
स्त्रिरह्नो भागं दधतीमयातम् ॥१८॥	त्रिः । अह्नः । भागम् । दधतीम् । अयातम् ॥

Bringing (*váhantā*) riches (*rayim*) along with good dominion (*sukṣatrám*) and [long] life (*ā'yuḥ*) along with good progeny (*svapatyám*), noble valour (*suvī'ryam*), you, O Nāsatyas (*Nāsatyā*) came (*ā' ayātam*) with reward (*vā'jaiḥ*) with one intention (*sámanasā*) to Jahnāvī (*Jahnā'vīm*) who offered (*dádhatīm*) a portion (*bhāgám*) thrice (*triḥ*) a day (*áhnaḥ*).

सायणः । हे [नासत्या] नासत्यावश्विनौ सुक्षत्रं शोभनबलं रयिम् धनम् स्वपत्यम् शोभनैः पुत्रादिभिरुपेतम् । सुवीर्यम् शोभनवीर्योपेतम् । आयुः । अन्ननामैतत् । एवंगुणविशिष्टमन्नं च वहन्ता धारयन्तौ युवां समनसा समानमनस्कौ सन्तौ जह्नावीम् जन्होर्महर्षेः सम्बन्धिनीं प्रजाम् आ अयातम् आभिमुख्येनागच्छतम् । कीदृशीम् ? वाजैः हविर्लक्षणैरन्नै रुपेताम् । अह्नः । अत्राहः-शब्देन तत्रानुष्ठेयः सोमयागो लक्ष्यते । तस्य प्रातःसवनादिरूपेण त्रिः त्रिधा विभक्तं भागम् अंशं दधतीम् बिभ्रतीम् । अनुसवनं हविर्भिर्यजमानामित्यर्थः ॥

सुक्षत्रम् । बहुव्रीहौ नञ्सुभ्याम् [६।२।१७२] इत्युत्तरपदान्तोदात्तत्वम् । सुवीर्यम् । वीरवीर्यौ च [६।२।१२०] इत्युत्तरपदाद्युदात्तत्वम् । जह्नावीम् । जह्नु शब्दात् तस्येदम् [४।३।१२०] इत्यर्थेऽण् । टिड्ढाणञ्° [४।१।१५] इति ङीप्[1] । ह्रस्वदीर्घयोर्विनिमयः पृषोदरादित्वात् । उक्तं च—वर्णागमो वर्णविपर्ययश्च [काशिका ६।३।१०९] इति । अत एव मध्योदात्तत्वम् ॥१९॥

[1] ओर्गुणः इति गुणः ।

जह्नावीम्—probably the wife of Jahnu, just as Manāvī is the wife of Manu and Agnāyī the wife of Agni; acc. to S. the race of Jahnu. जह्नुशब्दस्य मनोरौ वा [४।१।३८] इत्यौकारो ङीप् च स्त्रीप्रत्ययश्छान्दसत्वात्। जह्नोर्भार्या जाह्नवी। अथवा जह्नोरपत्यं जाह्नवी। जह्नोः प्रजा जाह्नवी सती जह्नावीत्युच्यते। प्रथमद्वितीययोरक्षरयोः स्वरव्यत्यासश्छान्दसत्वात्। जह्नोः प्रजां बलकाश्व-कुशिक-गाधि-विश्वामित्रप्रभृतिकामित्यर्थः। Sk. जह्नोरपत्यभूतां प्रजाम्। बलाकाश्वकुशिकविश्वामित्रप्रभृतिम्। VM. "Jahnu occurs in the plural in the legend of Śunaḥśepa, who is said to have obtained, as Devarāta, both the lordship of the Jahnus and the divine love of the Gāthins. A Jāhnava, a descendant of Jahnu, was, according to the Pañcaviṁśa Brāhmaṇa, Viśvāmitra, who is said, by means of a certain Caturātra ritual, to have secured the kingdom for the Jahnus in their conflict with the Vṛcīvants." Jahnāvī is mentioned here and under RV. iii. 58. 6 पुराणमोकः सख्यं शिवं वां युवोर्नरा द्रविणं जह्नाव्याम्. Your ancient residence, your auspicious friendship, your riches, O heroes, are in the family of Jahnu.

सुवीर्यम्—Acc. to S. it is a Bah., acc. to Sk. and probably VM. it is a Karm. In RV. i. 36. 17 अग्निर्वव्ने सुवीर्यमग्निः कण्वाय सौभगम् (Agni won mastery, Agni gave good luck to Kaṇva) the word is, evidently, a Karm.

त्रिः—Gk. *tri-s*, Lat. *tri-s*. Similarly, द्विः, Gk. *di-s*, Lat. *bi-s*. The genitive is used with these adverbs used in a multiplicative sense. त्रिरह्नः RV. vii. 11. 3 three times a night.

अह्नः—The partitive genitive is used with multiplicative adverbs like सकृत्, द्विः त्रिः, etc. कृत्वोऽर्थप्रयोगे कालेऽधिकरणे ii. 3. 64.

20

परिविष्टं जाहुषं विश्वतः सीं	परिऽविष्टम् । जाहुषम् । विश्वतः । सीम् ।
सुगेभिर्नक्तमूहथू रजोभिः ।	सुऽगेभिः । नक्तम् । ऊहथुः । रजःऽभिः ।
विभिन्दुना नासत्या रथेन	विऽभिन्दुना । नासत्या । रथेन ।
वि पर्वताँ अजरयू अयातम् ॥२०॥	वि । पर्वतान् । अजरयू इति । अयातम् ॥

You carried away (*ūhathuḥ*) at night (*náktam*) through easily passable (*sugébhiḥ*) aerial regions (*rájobhiḥ*) the son of Jahuṣa (*jāhuṣám*) surrounded (*párivistam*) on all sides (*visvátaḥ*). With your car (*ráthena*) that splits asunder everything on its way (*vibhindúnā*), O Nāsatyas (*Nāsatyā*), you went (*vi ayātam*) through the mountains (*párvatān*), O unageing one (*ajarayū'*).

सायणः। जाहुषो नाम कश्चिद्राजा। विश्वतः सर्वतः परिविष्टम् शत्रुभिः परिवृतं* तं राजानं [जाहुषम्] हे [नासत्या] नासत्यावश्विनौ अजरयू जरावर्जितौ† नित्यतरुणौ युवां विभिन्दुना विशेषेण सर्वस्य भेदकेनात्मीयेन रथेन नक्तम् रात्रौ सुगेभिः सुष्ठु गन्तुं शक्यैः रजोभिः रजकैर्मार्गैः ऊहथुः तस्माच्छत्रुसमूहान्निरगमयतम्। सीम् इत्येतत् पदपूरणम्‡। निर्गतेन तेन सह पर्वतान् शत्रुभिरारोढुमशक्यान्छिलोच्चयान् वि अयातम् विशेषेणागच्छतम्॥ परिविष्टम्। [1]विश प्रवेशने [धा° ६।१३०]। कर्मणि निष्ठा। गतिरनन्तरः [६।२।४९] इति गतेः प्रकृतिस्वरत्वम्। सुगेभिः। सुदुरोरधिकरणे [३।२।४८।३] इति गमेर्डः। विभिन्दुना। भिदिर् विदारणे [धा° ८।२]। औणादिक उप्रत्ययो नुमागमश्च। अजरयू। न जरा अजरा। तामात्मन इच्छतः। सुप आत्मनः क्यच् [३।१।८] नच्छन्दस्यपुत्रस्य [७।४।३५] इतीत्वदीर्घयोर्निषेधः। क्याच्छन्दसि [३।२।१७०] इत्युप्रत्ययः ॥२०॥

स्कन्दस्वामी। अत्रेतिहासमाचक्षते। जाहुषो नाम ऋषिर्वृद्धो वृद्धया भार्यया वृद्धैश्च पुत्रपौत्रादिभिः परिवृतो देवानियाज। तं दृष्ट्वासुरास्तुङ्गैः पर्वतैः परिक्षिप्ते मरुदेशे प्रचिक्षिपुः। स ततः प्रवृद्धत्वात्स्वयं निर्गन्तुमशक्नुवन्नश्विनौ महाकारुणिकौ तुष्टाव। तमश्विनावागत्यैकयैव रात्र्याश्वेन रथेन तान् पर्वतानतिक्रमयाञ्चक्रतुरिति।

* Some Mss. read परिवेष्टितम्.

† जरारहितौ M. P.

‡ पादपूरणम् M. P., but in the *Nirukta* (i. 7) we find: सीमिति परिग्रहार्थीयो वा पदपूरणो वा.

[1] The root is विष्लृ व्याप्तौ [धा° ३।१३].

तदेतद्विहोच्यते परिविष्टमित्यादिना। परिशब्दोऽत्र विश्वत इत्येतेन पौनरुक्त्यप्रसङ्गाद् धात्वर्थानुवादी। विषिव्योप्त्यर्थः। स्यास्र जरया। जाहुषं नामर्षिम्। विश्वतः सर्वतः स्वतः पुत्रतो दारतश्च। सपुत्रदारं वृद्धमित्यर्थः। रजोभिः रजःशब्दोऽत्र तेजोवचनोऽन्तर्णीतमत्वर्थश्च। तेजस्विभिः। शीघ्रगामिभिरित्यर्थः। विभिन्दुना पर्वतभेदनसमर्थेन रथेन तुङ्गानपि पर्वतान् हे अजरयू। युशब्दोऽत्र तद्वदर्थे। अश्वयुगंव्यू रथयुः [ऋ० सं० १।५१।१४] इति यथा। अजरावन्तौ। जरारहिताविल्यर्थः। व्ययातम्। यातिरत्रान्तर्णीतण्यर्थः। विगमितवन्तौ युवाम्। अतिक्रमितवन्ताविल्यर्थः।

वेङ्कटः। विश्वतः [परिविष्टम्] परिगृह्यावष्टभ्यासुरैः परिवृतम्। जाहुषं नाम देवानां यजमानम्। [सुगेभिः] सुगमैः [रजोभिः] मार्गैः नक्तम् ऊहथुः। [विभिन्दुना] तदानीं पर्वतानां विभेत्रा रथेन [पर्वतान्] पर्वतानां मध्ये [अजरयू] जरारहितावजीर्णौ सन्तौ [व्ययातम्] गतवन्तौ ॥

जाहुषम्—*cf.* युवं च्यवानं जरसोऽमुमुक्तं नि पेदव ऊहथुराशुमश्वम्। निरंहसस्तमसः स्पर्तमत्रिं नि जाहुषं शिथिरे धातमन्तः॥ RV. vii. 71. 5 you released Cyavāna from old age, you carried a swift horse to Pedu; you rescued Atri from distress and darkness; you placed Jāhuṣa in freedom.

सीम्—like ईम् and कीम् was originally a pronominal form which has crystallized into a particle and is used as the acc. of all numbers and genders in the third person. Like ईम् it is always accentless. See pp. 176, 246.

विभिन्दुना—Acc. to Geldner the second half describes a different exploit of the Aśvins. *Cf.* RV. i. 117. 16 वि जयुषा ययथुः सान्वद्रेः you passed through the back of the mountain with your victorious (car). वि जयुषा रथ्या यातमद्रिम् vi. 62. 7. ता वर्तिर्यातं जयुषा वि पर्वतम् x. 39. 13. The formation of भिन्दु is explained by S. under RV. i. 11. 4. It is formed from the present stem of भिद with the agent suffix *u*, like *-vindu* finding. भिदिर् विदारणे। 'कुः' इत्यनुवृत्तौ पृभिदिव्यधिगृधिधृषिहृषिभ्यः [उ० १।२३] इति कुप्रत्ययः। तस्य छन्दस्युभयथा [३।४।११७] इति सार्वधातुकसंज्ञायां श्नमादिभ्यः श्नम् [१।१।७८]। मिस्वादन्त्यादचः परो भवति। श्नसोरल्लोपः [६।४।१११]। अनुस्वारपरसवर्णौ।...

पर्वतान्—If we take the whole stanza as describing a single exploit 'parvata' would mean 'cloud'.

अजरयु—ageless. See Sk.

21

एकस्या वस्तोरावतं रणाय	एकस्याः । वस्तोः । आवतम् । रणाय ।
वशमश्विना सनये सहस्रा ।	वशम् । अश्विना । सनये । सहस्रा ।
निरहतं दुच्छुना इन्द्रवन्ता	निः । अहतम् । दुच्छुनाः । इन्द्रऽवन्ता ।
पृथुश्रवसो वृषणावरातीः ॥२१॥	पृथुऽश्रवसः । वृषणौ । अरातीः ॥

You aided (*āvatam*), O Aśvins (*Aśvinā*) Vaśa (*Váśam*) in battle (*ráṇāya*) so that he might gain (*sanáye*) thousands (*sahásrā*) in a single morning (*ékasyāḥ vástoḥ*). Accompanied by Indra (*indravantā*), you killed off (*niḥ ahatam*), the ill luck (*ducchúnāḥ*), the enemies (*árātīḥ*) of Pṛithuśravas (*Pṛthuśrávasaḥ*), O bulls (*vṛṣaṇau*).

सायणः । हे [अश्विना] अश्विनौ वशम् एतत्संज्ञमृषिम् एकस्याः वस्तोः एकस्याह्नः रणाय रमणीयाय सहस्रा सहस्रसंख्याकाय सनये धनलाभाय आवतम् अरक्षतम् । स ऋषिः प्रत्यहं यथा सहस्रसंख्यं धनं लभते तथा रक्षितवन्तावित्यर्थः । अपि च हे वृषणौ कामानां वर्षितारावश्विनौ इन्द्रवन्ता इन्द्रेण संयुक्तौ युवां दुच्छुनाः दुष्टसुखान् दुःखस्य कर्तॄन् पृथुश्रवसः विस्तीर्णयशसः अरातीः शत्रून् निरहतम् निःशेषेणावधिष्टम् । यद्वा । कानीनस्य पृथुश्रवःसंज्ञस्य राज्ञः शत्रूनिति योज्यम् ॥ सहस्रा । सुपां सुलुक्° [७।१।३९] इति चतुर्थ्या डादेशः । अहतम् । लङि थसस्तम् । 'अनुदात्तोपदेश°' [६।४।३७] इत्यादिनानुनासिकलोपः । दुच्छुनाः । शुनमिति सुखनाम् । दुष्टं सुखं यासां तास्तथोक्ताः । परादिश्छन्दसि बहुलम् [६।२।१९९] इत्युत्तरपदाद्युदात्तत्वम् ॥२१॥

स्कन्दस्वामी। पृथुश्रवा नाम राजा सन्ततैर्बहुभिर्बृभिन्नैः पीड्यमानोऽश्विना-वियाज तुष्टाव च। तस्याश्विनौ तु महत्या वृष्ट्या तान्यपनिन्यतुरिति।

स्कन्दस्वामी। वशो नाम राजा श्वप्रायबलः। स हस्तिबलैः शत्रुभिः पराजीय-मानः साहाय्यं कर्तुमश्विनौ स्तुत्याजुहाव। तं प्रति तस्मिन्नेवाहन्यश्वि-नावाजग्मतुरिति।

वस्तोः—gen. in a temporal sense. अत्ययेनात्र स्त्रीलिङ्गता सप्तम्यर्थे च षष्ठी, Sk. वस्तोः is read in the list of aharnāman in the *Nigh.* There is no question of अत्यय here for *vas-tu* (morning from *vas* shine) and *sūtu* (birth) are fem.

रणाय—In the *Nigh.* रण heads the list of words denoting battle. रणाय is explained by Yāska in two passages as रमणीयाय संग्रामाय. रण from *raṇ* to rejoice means pleasure, joy, battle in which heroes rejoice.

वशम्—Vaśa was the priest of King Pṛthuśravas. He is the author of RV. viii. 46. वश is also mentioned as a protégé of the Aśvins in RV. i. 112. 10: याभिर्वशमश्व्यं प्रेणिमावतम् with which you aided Vaśa, the son of Aśva, the Preṇi. He is also mentioned in the *Sāṅkhāyana Srauta Sūtra* (xvi. 11. 13) as having received bounty from Pṛthuśravas Kānita. *Cf.* RV. viii. 46. 21: आ स एतु य ईवदाँ अदेवः पूर्तमाददे। यथा चिद्वशो अश्व्यः पृथुश्रवसि कानीतेऽस्या व्युष्याददे. "Now let the not-god man approach who hath received reward so great. As Vaśa Aśvya, when this light of morning dawned, received from Pṛthuśravas, from Kanīta's son." RV. viii. 46. 24: दानास: पृथुश्रवसः कानीतस्य सुराधसः। रथं हिरण्ययं ददन्मंहिष्ठः सूरिरभूद्वर्षिष्ठमकृत श्रवः॥ These are the gifts of the liberal Pṛthuśravas, son of Kanīta. Giving the golden car, he became the most liberal patron and won most lofty fame.

निरहतम्—warded off, expelled, removed.

दुच्छुनाः—acc. pl of दुच्छुना from दुस् and शुन (growth, success welfare) misfortune, calamity. अदुच्छुन—free from evil, propitious. दुच्छुन is an instance of Prākritism in the Vedas.

अरातीः—hostilities, hence enemies. See p. 335.

22

शरस्य चिदार्चत्कस्यावतादा	शरस्य। चित्। आर्चत्ऽकस्य। अवतात्। आ।
नीचादुच्चा चक्रथुः पातवे वाः।	नीचात्। उच्चा। चक्रथुः। पातवे। वारिति वाः।
शयवे चिन्नासत्या शचीभि-	शयवे। चित्। नासत्या। शचीभिः।
र्जसुरये स्तर्यं पिप्यथुर्गाम् ॥२२॥	जसुरये। स्तर्यम्। पिप्यथुः। गाम्॥२२॥

For Sara (*Śarásya cit*), the son of Ṛcatka (*ārcatkáṣya*) to drink (*pā'tave*) you raised (*uccā' cakrathuḥ*) the water (*vā'ḥ*) from the well (*avatā't ā'*) from below (*nīcā't*). For Śayu (*Śayáve cit*), O Nāsatyas (*Nāsatyā*), pining away (*jásuraye*), you made the dry cow swell (*staryā́m pipyathuḥ*).

सायणः। आर्चत्कस्य ऋचत्कपुत्रस्य शरस्य एतत्संज्ञस्यापि स्तोतुः पिपासितस्य पातवे पानार्थं नीचात् नीचीनात् अवतात् कूपात् उच्चा उच्चैरुपरिष्टात् वाः उदकं हे अश्विनौ युवाम् आ चक्रथुः आभिमुख्येन कृतवन्तौ। तथा हे [नासत्या] नासत्यावश्विनौ शचीभिः युष्मदीयैः कर्मभिः परिचरणैः जसुरये श्रान्ताय शयवे चित् शयुनाम्ने ऋषये स्तर्यम् निवृत्तप्रसवां गाम् अग्निहोत्रार्थस्य पयसो दोग्ध्रीं पिप्यथुः पयसा युवामापूरितवन्तौ॥ पातवे। पा पाने [धा° १।९०८]। तुमर्थे सेसेन्° [३।४।९] इति तवेन्प्रत्ययः। जसुरये। जसु हिंसायाम् [धा° १०।१३४]। जसिसहोरुरिन् [उ° २।७३]। स्तर्यम्। स्तीर्यते आच्छाद्यते प्रसवसामर्थ्याभावेनेति स्तरीः। अवितॄस्तृतन्त्रिभ्य ईः [उ० ३।१५८] इतीकारप्रत्ययः। वा छन्दसि [६।१।१०६] इत्यमिपूर्वत्वस्य विकल्पितत्वात् तदभावे यणादेशः। उदात्तस्वरितयोर्यणः [८।२।४] इति परस्यानुदात्तस्य स्वरितत्वम्। पिप्यथुः। *प्यायी वृद्धौ [धा° १।४८४]। लिटि व्यत्ययेन परस्मैपदम्। लिड्यङोश्च [६।१।२९] इति पीभावः॥२२॥

The *Pāṇinīya Dhātupāṭha* has स्फायी ओप्यायी वृद्धौ.

स्कन्दस्वामी।···शरो नाम ऋषिः। स मरुदेशेन गच्छन् पिपासितः सन् सुदूरतोयं कूपं ददर्श। स ततः पातुमशक्नुवन्नश्विनौ तुष्टाव। तस्याश्विनौ सुलभ्यं चक्रतुः। अवतात्। सप्तम्यर्थेऽत्र पञ्चमी। कूपे। नीचात्। द्वितीयैकवचनस्याथ' सुपां सुलुक्° [७।१।३९] इति लुगादेशः। नीचम्। सुदूरवर्तित्वाद् ग्रहीतुमशक्यम्। उच्चा। अयमपि द्वितीयैकवचनस्याकारः। उच्चम्। हस्तग्राह्यमित्यर्थः। आचक्रथुः आभिमुख्येन कृतवन्तौ स्थः।··· शचीभिः स्वाभिरतिशयवतीभिः प्रज्ञाभिः कर्मभिर्वा। जसुरये। जसु ताडने। ताडयित्रे शत्रूणाम्। ताडिताय वा। गोः प्रसवनिवृत्त्या अधेनुत्वापत्त्या च पीडितायेत्यर्थः। स्तर्यं निवृत्तप्रसवा स्तरीरुच्यते। तां पिप्यथुः आप्यायितवन्तौ धेनुतां कृतवन्तौ। काम्? उच्यते। शाम्। तदेतत्परस्तादपि पुनर्वक्ष्यति अधेनुं दस्रा [ऋ° सं° १।११७।२०] इति। कुत्सेनाप्युक्तम्—याभिर्धेनुम् [ऋ° सं° १।११२।३] इति। शयुर्नाम राजर्षिः। सोऽश्विनौ परिचर्यया तुष्टावोवाच च। मम गौरधेनुर्निवृत्तप्रसवा वृद्धा च। तां मे धेनुं कुरुतमिति। तामस्मा अश्विनौ धेनुं चक्रतुरिति।

भार्चत्कस्य—for the analysis in the Padapāṭha (भार्चत्ऽक), see p. 297.

पातवे—dat. infin. of पा to drink.

वाः—वार् water, neut. Av. *vār* m., Gk. *ouron* water, then wine, Lat. *ūrīna*. वारि is the later form of this *vār* which is preserved in class. वार्धि ocean.

जसुरये—जसुरि from जस् to be exhausted with the suffix *-ri* and connecting *u*. *Cf.* वध्रि st. 13. जसति is read in the *Nigh.* in the list of गतिकर्म roots. It means exhausted, exhausted with hunger or thirst. अजस्तमर्यो वनुषामरातीः RV. iv. 50. 11 weaken the hostilities of foes and rivals. जस dying out. I. E. **gwes* to go out, to become extinguished. Gk. *sbennūmi* to quench, *asbestos* unquenchable. नीचायमानं जसुरिं न श्येनम् RV. iv. 38. 5 like a hungry eagle swooping downwards. कृणोषि यच्छवसा भूरि पश्वो वयो वृकायारये जसुरये RV. vi. 18. 5 when you make with your might many cattle food to the hungry wolf or the rival;

स्तर्यम्—acc. s. of स्तरी a barren cow. *Cf.* Eng. *ster-ile*, Lat. *sterilis* unfruitful, Gk. *steira* sterile, from स्तृ to be stiff, rigid. This स्तरी is found in अध्वस्तरी etc. with the dissimilatory disappearance of the initial *s*. Note the independent svarita as in the case of *kumāryâm, nadyâm, lakṣmyâm*, etc. Those are to be read as *stariam, kumāriam, nadiam, lakṣmiam*, etc. V. G. S., p. 88.

पिप्यथुः—perf 2. du. of *pyā(y)* fill up, swell, overflow.

23

अवस्यते स्तुवते कृष्णियाय	अवस्यते । स्तुवते । कृष्णियाय ।
ऋजूयते नासत्या शचीभिः	ऋजुऽयते । नासत्या । शचीभिः ।
पशुं न नष्टमिव दर्शनाय	पशुम् । न । नष्टम्ऽइव । दर्शनाय ।
विष्णाप्वं ददथुर्विश्वकाय ॥२३॥	विष्णाप्वम् । ददथुः । विश्वकाय ॥२३॥

To the help-seeking (*avasyaté*), praising (*stuvaté*) straight-acting (*ṛjūyaté*) Viśvaka (*Viśvakāya*), son of Kṛṣṇa (*kṛṣṇiyā'ya*), you gave (*dadathuḥ*), O Nāsatyas (*Nā-atyā*), by your powers (*śácībhiḥ*) Viṣṇāpū (*Viṣṇāpvâm*) who was like a lost animal (*paśúm ná naṣṭám iva*) for seeing again (*dárśanāya*).

सायणः । अवस्यते अवनं रक्षणमात्मन इच्छते । स्तुवते स्तुतिं कुर्वते कृष्णियाय । कृष्णो नाम कश्चित् । तस्य पुत्राय । ऋजूयते आर्जवमिच्छते विश्वकाय एतत्संज्ञकाय ऋषये नासत्या हे नासत्यौ युवां शचीभिः आत्मीयैः कर्मभिः विष्णापूम् नाम विनष्टम् पुत्रं दर्शनाय दर्शनार्थं ददथुः दत्तवन्तौ । तत्र दृष्टान्तः । पशुम् न नष्टमिव । एक उपमार्थीयः पूरकः । यथा कश्चिद्विनष्टं पशुं स्वामिनो दृष्टिपथं प्रापयति तद्वत् । अवस्यते । अवःशब्दात् सुप आत्मनः क्यच् [३।१।८] । 'शतुरनुमः°' [६।१।१७३] इति विभक्तेरुदात्तत्वम् । कृष्णियाय । कृष्णशब्दादपत्यार्थे छान्दसो घच् ॥२३॥

स्कन्दस्वामी।...विश्वको नाम राजर्षिः। तस्य बालः पुत्रः प्रमादादुपननाश। स्नेहाद्विपत्त्याशङ्कया तस्य पालनं पुनश्च दर्शनमिच्छन्नश्विनौ तुष्टाव। तस्मै तमानीयाश्विनौ ददतुरिति।...पशुं न नष्टमिव दर्शनाय। इवशब्दोऽत्र नेत्यनेन पौनरुक्त्यात् "अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोगः" [निरु० ७।३१] इति पदपूरणः।

अवस्यते, स्तुवते and ऋजूयते are the dat. s. of अवस्य (denom. of अवस् aid) स्तु and ऋजूय (denom. of ऋजु straight) respectively.

शचीभिः—*śácī* might, power from *śak* to be able. Indra was the god of might *par excellence* and was known as *śacīpati* (master of might) which, people thought, meant 'husband of might' and thus in later times Śacī came to be regarded as the name of the wife of Indra.

पशुं न नष्टमिव—Tautology is fairly common in the language of the Vedas. सूर्यस्येव न रश्मयः RV. ix. 64. 7, यथेव occurs in x. 86. 7. *Cf*. सारं ततो ग्राह्यमपास्य फल्गु हंसैर्यथा क्षीरमिवाम्बुमध्यात्। पञ्चतन्त्रम्.

विष्णाप्वम्—acc. s. of विष्णापू. Contrast कण्वोःजुवे in i. 112. 14. He was the son of Viśvaka and was a great help to his father. When he was lost, the father prayed to Aśvins and got back his son. The word विष्णापू appears to be a form of विष्णुपू. There are several words in the Vedas ending in -पू. Thus we have अग्रेपू drinking first, उदपू purified by water, क्रतुपू purifying the will, घृतपू clarifying ghee, मधुपू purifying itself by sweetness, वातपू purified by the wind, सुपू clarifying well and स्वपू broom. In class. we have खलपू cleaning the threshing floor, cleaner, sweeper. Sāyaṇa derives the word thus: विष्णोः सर्वेषां देवानां मुख्यत्वात् तद्ग्रहणेन सर्वे देवा गृहीता भवन्ति। विष्णुवादीन् कर्मणा व्याप्नोतीति विष्णापूः पृषोदरादिः। यद्वा विष्णुं सर्वयज्ञेषु व्याप्तं सोमं दशापवित्रेणापुनातीति। तस्य चतुर्थी विष्णाप्व इति। एतन्नामके मम पुत्रे पौत्रे वा। Viṣṇāpu is mentioned also in RV. i. 117. 7 (युवं नरा स्तुवते पज्रियाय विष्णाप्वं ददथुर्विश्वकाय), viii. 86. 3 (of which Viśvaka is the seer)

and x. 65. 12 (विष्णाप्वं विश्वकायाव सृजथः). RV. viii. 86. 3-4 run thus: युवं हि ष्मा पुरुभुजेममेधतुं विष्णाप्वे ददथुर्वस्यइष्टये। ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम्॥ उत त्यं वीरं धनसामृजीषिणं दूरे चित्सन्तमवसे हवामहे। यस्य स्वादिष्ठा सुमतिः पितुर्यथा मा नो वि यौष्टं सख्या मुमोचतम्॥ O Aśvins, protectors of many, you two gave this good fortune to Viṣṇapū so that he might gain wealth. Viśvaka calls on you two for his descendant. Break not off our friendship. Come and set me free. And that treasure-winning man who has pressed out the Soma-skin, we call on him when he is at a distance for aid, whose gracious favour is most sweet like that of a father.

कृष्णियाय—अपत्येऽर्थे घप्रत्ययो द्रष्टव्यः। कृष्णनाम्न ऋषेः पुत्राय. Acc. to घच्छौ च iv. 4. 117 घन् is added after अग्र in the Vedas in the sense of तत्र भवः. Tradition assigns to Kṛṣṇa or Viśvaka his son the authorship of RV. viii. 86. The word Kṛṣṇiya may be a patronymic formed from the same name in two other hymns of the *Ṛgveda* (i. 116. 23, i. 117. 7) where the Aśvins are said to have restored Viṣṇāpū to Viśvaka Kṛṣṇiya. This Kṛṣṇa may be identical with Kṛṣṇa Āṅgiras mentioned in the *Kauṣītaki Brāhmaṇa*. As a patronymic Kṛṣṇiya would be an isolated formation (*cf.* however Pajriya) instead of Karṣṇya (*Vedic Index*). In the *Sarvānukramaṇī* Karṣṇi is used instead of Kṛṣṇiya, where the commentator says कृष्णपदाद् बाह्वादित्वादिञ्.

24

दश रात्रीरशिवेना नव द्यू-	दश । रात्रीः । अशिवेन । नव । द्यून् ।
नवनद्धं श्नथितमप्स्वन्तः ।	अवऽनद्धम् । श्नथितम् । अप्ऽसु । अन्तरिति ।
विप्रुतं रेभमुदनि प्रवृक्त-	विऽप्रुतम् । रेभम् । उदनि । प्रऽवृक्तम् ।
मुन्निन्यथुः सोममिव स्रुवेण ॥२४॥	उत् । निन्यथुः । सोमम्ऽइव । स्रुवेण ॥२४॥

You raised up (*út ninyathuḥ*), like Soma (*Sómam iva*) in a ladle (*sruvéṇa*), Rebha (*Rebhám*) as he lay in the water (*apsú antáḥ*) floating to and fro (*viprutam*) for ten nights (*dáśa rā́trīḥ*) and nine days (*náva dyū́n*) bound (*ávanaddham*) by his enemy (*dáśivena*) and pierced through (*śnathitám*), hurled (*právṛktam*) in the water (*udáni*).

सायणः। [अत्रेदमाख्यानम्।] पुरा खलु रेभमृषिं पापा असुराः कूपे कस्मिंश्चिद्दिवसस्य सायंकाले प्रचिक्षिपुः। स चाश्विनौ स्तुवन् दश रात्रीर्नवाहानि च कूपमध्ये तथैवावतस्थे। दशमेऽहनि प्रातरश्विनौ तं कूपादुदतारयतामिति। तदाह। अप्सु कूपान्तर्वर्तमानासु अन्तः मध्येऽसुरैः पातितम् अशिवेन दुःखहेतुना दाम्ना अवनद्धम् बद्धं श्नथितम् शत्रुभिर्हिंसितं दश रात्रीः दशसंख्याका निशा नव द्यून् नवसंख्याकान्यहानि। अत्यन्तसंयोगे द्वितीया। एतावन्तं कालं तत्रैव कूपेऽवस्थितम् अत एव उदनि उदके विप्रुतम् विप्लुतं व्याप्तसर्वाङ्गं प्रवृक्तम्। लुप्तोपममेतत्। प्रवृक्तेन सन्तप्तं घर्ममिव व्यथया सन्तप्यमानम्। एवंभूतं रेभम् हे अश्विनौ युवाम् उन्निन्यथुः तस्मात्कूपादुन्नीतमुत्तीर्णं कृतवन्तौ। तत्र दृष्टान्तः। सोममिव यथाग्निहोत्रहोमार्थमभिषुतं सोमरसं कूपसदृशेऽग्निहोत्रस्थालीमध्ये वर्तमानं स्रुवेण अध्वर्युरुन्नयति ऊर्ध्वं नयति तद्वत्॥ अवनद्धम्। णह बन्धने [धा° ४।५८]। कर्मणि निष्ठा। नहो धः [८।२।३४]। झषस्तथोर्धोऽधः [८।२।४०] इति निष्ठातकारस्य धत्वम्। गतिरनन्तरः [६।२।४९] इति गतेः प्रकृतिस्वरत्वम्। श्नथितम्। श्नथ हिंसार्थः[1]। निष्ठा। विप्रुतम्। [2]प्रुङ् गतौ [धा° १।९९७]। अवनद्धवत्प्रत्ययस्वरौ। कपिलकादित्वात् [८।२।१८ भाष्यम्] लत्वविकल्पः। उदनि। पद्दन्नित्यादिना [६।१।६३] उदकशब्दस्योदन्नादेशः ॥२४॥

स्कन्दस्वामी। [१।११२।५] अत्रैतिहासमाचक्षते। रेभमृषिं सन्ध्याकाले स्नात्वा ह्रदादुत्तीर्णमग्निहोत्रं होतुं स्वाश्रमं गच्छन्तमसुरा ददृशुः। ते देवानामयं

---

1 श्नथ is not read in the *Pāṇiniya Dhātupāṭha*.

2 The *Dhātupāṭha* has च्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ.

यदा ओता चेति ज्ञात्वा संरुद्धाङ्गं ताडयित्वा बद्ध्वा च तस्मिन् ह्रदे प्रक्षिप्य दशरात्रं धारयाञ्चक्रुरिति। तदपि कक्षीवानेव वक्ष्यति। दश रात्रीरिति, अश्वं न गूळ्हम् [ऋ० सं० १।११७।४] इति। स तत्र मृतकल्पोऽश्विनावाजुहाव। आहूयमानावश्विनौ तं समाजग्मतुरिति। तदपि कक्षीवानेव वक्ष्यति। सं तं रिणीथः [ऋ० सं० १।११७।४] इति। आगत्य चोत्तारयाञ्चक्रतुरिति। तदपि कक्षीवानेव वक्ष्यति। विप्रुतं रेभमिति। घोषापि वक्ष्यति। युवं ह रेभम् [ऋ० सं० १०।३९।९] इति।

अशिवेना—metrical lengthening. See p. 302.

द्यु—reduced grade of दिव्. द्युरित्यह्नो नामधेयं द्योतत इति सतः। *Nir.* i. 7.

अवनद्धम्—past pass. part. of अव-नह् to bind. *Naddhá* from *nah* is formed after the analogy of *baddhá* from *bandh*. सितम् is used in RV. i. 112. 5: याभी रेभं निवृतं सितमद्भ्य उद्वन्दनमैरयतं स्वर्दृशे.

श्नथितम्—from *śnath* pierce, Av. *snath* strike, *snaithiś* weapon for striking or cutting. In the *Nigh.* श्नथति is read in the list of वधार्थक roots.

अप्स्व१न्तः—for the numeral, see pp. 131-32.

विप्रुतम्—see p. 503. प्रु is the same root as प्लु. Both प्रवते to leap up, hop, hasten (*cf.* मण्डूकप्लुति) and प्लवते float, swim, Gk. *pleō* float, sail are read in the list of गत्यर्थक roots in the *Nigh.* RV. i. 117. 4:

अश्वं न गूळ्हमश्विना दुरेवैरृषिं नरा वृषणा रेभमप्सु ।
सं तं रिणीथो विप्रुतं दंसोभिर्न वां जूर्यन्ति पूर्व्या कृतानि ॥

O Aśvins, O bull-like heroes, you restored by your wondrous powers the sage Rebha concealed by the malevolent in the waters like a bone [by thieves] and floating to and fro. Your ancient exploits do not grow old, *i.e.*, fade not frcm memory.

उदनि—loc. s. of *udan* (Gk. *hudat*, Goth. *watin* etc.) which is an extended form of **ud* which has not been preserved. See pp. 83-84.

स्रुवेण—a small ladle used to convey the offering (*ājya*) from the cooking pot (*sthālī*) to the large ladle (*juhū*). In the *Ṛgveda*, however, it wrs clearly used for the actual Soma

libation. युवं ह रेभं वृषणा गुहा हितमुदैरयतं ममृवांसमश्विना x. 39. 9. O bulls, O Aśvins, you raised Rebha placed in concealment and dead. Raibhya, 'descendant of Rebha' figures in the list of teachers in the *Bṛhadāraṇyaka Upaniṣad*.

25

प्र वां दंसांस्यश्विनाववोच-	प्र । वाम् । दंसांसि । अश्विनौ । अवोचम् ।
मस्य पतिः स्यां सुगवः सुवीरः ।	अस्य । पतिः । स्याम् । सुऽगवः । सुऽवीरः ।
उत पश्यन्नश्नुवन्दीर्घमायु-	उत । पश्यन् । अश्नुवन् । दीर्घम् । आयुः ।
रस्तमिवेज्जरिमाणं जगम्याम् ॥२५॥	अस्तम्ऽइव । इत् । जरिमाणम् । जगम्याम् ॥

I have proclaimed (*prá avocam*), O Aśvins (*Aśvinā*), your wonderful deeds (*dáṁsāṁsi*); may I become (*syām*) lord (*pátiḥ*) of this (*asya*) with good cattle (*sugávaḥ*) and good sons (*suvī'raḥ*) and (*utá*) seeing (*páśyan*) and attaining (*aśnuván*) long life (*dīrghám ā'yuḥ*) come to (*jagamyām*) old age (*jarimā'ṇam*) as to my house (*ástam iva it*).

सायणः । एवमनेन सूक्तेनाश्विनोर्महिमानं प्रशस्याधुना मन्त्रद्रष्टा स्वाभीष्टं प्रार्थयते । हे अश्विनौ वाम् युवयोः दंसांसि पुरा कृतानि कर्माणि प्र अवोचम् स्पष्टमुक्तवानस्मि । सोऽहं सुगवः शोभनगोयुक्तः सुवीरः शोभनवीरश्च भूत्वा अस्य राष्ट्रस्य पतिः अधिपतिः स्याम् भवेयम् । उत अपि च पश्यन् अक्षिभ्यां पश्यन् । उपलक्षणमेतत् । सर्वैरिन्द्रियैः स्वस्वविषयग्रहणसमर्थः* दीर्घम् वर्षशतरूपेणायतम् आयुः जीवितं च अश्नुवन् प्राप्नुवन्नहम् अस्तमिव यथा गृहं स्वामी निष्कण्टकं प्रविशति, एवं जरिमाणं जरां जगम्याम् कण्टकराहित्येन प्राप्नुयाम् । वृद्धः संश्चिरकालं निवसेयमित्यर्थः ॥ स्याम् । अस्तेः प्रार्थनायां लिङ् । यासुट् । असोरल्लोपः [६।४।१११] इत्यकारलोपः ।

---

* Should we add उपलभमानः here?

अश्नुवम्। *अद्य ज्यानौ [धा० ५।१८]। व्यत्ययेन शतृ। जरिमाणम्। जॄष् वयोहानौ [धा° ४।२२]। अन्तर्भावितण्यर्थादौणादिक इमनिच्। जगम्याम्। गमेः प्रार्थनायां लिङ्। बहुलं छन्दसि [२।४।७६] इति विकरणस्य श्लुः ॥२५॥

स्कन्दस्वामी। अस्य बुद्धिस्थस्याभिप्रेतस्य धनादेरयं प्रतिनिर्देशः। यद् इदमस्मदभिलषितं धनादि तस्य पतिः स्यां भवेयमहम्। सुगवः शोभना गावो यस्य सः सुगवः। छान्दसत्वादकारः समासान्तः। शोभनाभिर्गोभिरुपेतः सन्नित्यर्थः।...यथा कश्चित् स्वगृहमनुद्विग्नो गच्छेत्तद्वत् जरां गच्छेयम्।

सुगवः—In the *Ṛgveda* गो becomes गव after *su* and *sam*. संगवः time when cows come together. After अतिथि, एत, दश and नव, गो becomes ग्व. In the class. language गो as the final member of बहुव्रीहि compds. is not changed into गव. सुगुः occurs in RV. i. 125. 2: सुगुरसत् सुहिरण्यः स्वश्वः may he be rich in kine, in gold and in horse. सुगव as a Bahuvrīhi would appear to occur only here. As a Karm. (class. सुगौः) it is found in the *Mahābhārata* in the sense of a nice bull. शोभनगोयुक्तः of S. is open to objection. Samāsānta is barred in connexion with सु and अति and not with शोभन, सुन्दर, etc.

जरिमाणम्—The suffix as in most cases of *imanic* is *man* with connecting *-i*. In the Uṇādi sūtras, we find immediately after अशिशक्यां छन्दसि the Vedic rule हृभृधृसृस्तृशृभ्य इमनिच् iv. 147. Probably the rule read originally हृभृधृसृस्तृजॄभ्य इमनिच्, as जरिमन् is a well-known Vedic word. *Cf*. RV. i. 71 10:

मा नो अग्ने सख्या पित्र्याणि प्र मर्षिष्ठा अभि विदुष्कविः सन्।
नभो न रूपं जरिमा मिनाति पुरा तस्या अभिशस्तेरधीहि॥

Do not forget, O Agni, our paternal friendships, you who excel as a learned seer. Age changes the appearance, as the sky (changes its appearance). Before such a calamity happens think of us.

अस्तम्—See pp. 274, 325.

जगम्याम्—Opt. 1. s. of the perf. of गम्.

* Mādhava reads अद्य ज्यानौ जॄष् च.

UṢAS

Among the Goddesses of the *Ṛgveda*, Uṣas occupies a most prominent place and the hymns to Uṣas (twenty in number) are among the most poetical in the Vedas. In the case of this Goddess, the personification is very slight, for the poet is always thinking of the physical phenomenon of dawn. The name Uṣas (Gk. Ἠώς, Lat. Aurora) is derived from the root *vas* 'to shine' (*cf.* उवासोषा उच्छाच्च नु i. 48. 3) and forms from the root are used to describe her activities even as forms from the root *su* 'to stimulate' are used with the name of Savitṛ.

The poet in his enthusiasm uses simile after simile, as he is enraptured by the first appearance of the rosy-fingered dawn in the Eastern sky:

Thou sweetly smilest, goddess fair,
  Disclosing all thy youthful grace,
  Thy bosom bright, thy radiant face,
And lustre of thy golden hair;—

(So shines a fond and winning bride,
  Who robes her form in brilliant guise,
  And to her lord's admiring eyes
Displays her charms with conscious pride,—

Or virgin by her mother decked,
  Who, glorying in her beauty, shows
  In every glance, her power she knows
All eyes to fix, all hearts subject;—

Or actress, who by skill in song
  And dance, and graceful gestures light,
  And many-coloured vestures bright,
Enchants the eager, gazing throng;—

Or maid, who wont her limbs to lave
In some cool stream among the woods,
In deep surrounding solitudes,
Emerges fairer from the wave.)*

This reminds one of Shelley's lines:

Like a poet hidden
In the light of thought,
Singing hymns unbidden,
Till the world is wrought
To sympathy with hopes and fears it heeded not:

Like a high-born maiden
In a palace tower,
Soothing her love-laden
Soul in secret hour
With music sweet as love, which overflows her bower:

Like a glow-worm golden
In a dell of dew,
Scattering unbeholden
Its aerial hue
Among the flowers and grass, which screen it from the view:

Like a rose embower'd
In its own green leaves,
By warm winds deflower'd,
Till the scent it gives
Makes faint with too much sweet these heavy-winged thieves.

Uṣas is the daughter of the sky (दिवो दुहिता). She is the sister of Bhaga, a form of the Sun-god, and kinswoman of Varuṇa who is connected with the night (भगस्य स्वसा वरुणस्य जामि . 123. 5). She is also the elder sister of the night, who is also called the daughter of the sky. As the sun appears

* Muir, *Metrical Translations from Sanskrit Writers*.

on the horizon, immediately after Uṣas, he is called her lover (उषाजयायी सूर्योऽस्याः सूर्यस्येव तु पत्नयः BD. ii. 8.). For the same reason the Dawns are said to have generated the sun, the sacrifice and fire (अजीजनन्सूर्यं यज्ञमग्निम् vii. 78. 3). Uṣas is also described as the friend of the Aśvins (सखाभूदश्विनोरुषाः iv. 52. 2). Indra is said to have created Uṣas (यः सूर्यं य उषसं जजान ii. 12. 7). He is also said to have crushed her chariot with his thunderbolt (वज्रेणान उषसः सम्पिपेष ii. 15. 6). Her steeds are represented as ruddy kine (रुशन्तोऽश्वास्तु गावोऽरुणा BD. iv. 141), just as Homer speaks of the rosy-fingered dawn (*hrododaktulos Ēōs*).

She is born over and over again and yet is ancient (पुनः पुनर्जायमाना पुराणी i. 92. 10). She is the life and breath of all beings whom she wakes to motion. "One for dominion, another for fame, another for acquisition of greatness; another to go, as it were, to his goal, to seek out various kinds of livelihood." (क्षत्राय त्वं श्रवसे त्वं महीया इष्टये त्वमर्थमिव त्वमित्यै ।...उषा अजीगर्भुवनानि विश्वा ॥ i. 113. 6). She brings rich rewards and she brings the life of mortals nearer old age (मर्तस्य देवी जरयन्त्यायुः i. 92. 10).

The following are some of the epithets of Uṣas (see *Nigh.* i. 8): विभावरी (fem. of विभावन्), 'the resplendent', सूनरी (i. 48. 5), 'bountiful', भास्वती 'shining', चोदती (i. 48. 6) flowing, gushing, चित्रामघा (vii. 75. 5) 'possessed of brilliant riches', अर्जुनी (i. 49. 3) 'the white', वाजिनी (iii. 61. 1) 'rich in rewards', वाजिनीवती (i. 48. 6) 'possessed of rich rewards', सुभावरी (i. 113. 12) gracious, अहना (i. 123. 4) 'dawning', द्योतना 'the brilliant', श्वेत्या (i. 113. 2) 'the white', अरुषी 'the ruddy,' सूनृता (i. 123. 5) 'generous', 'noble', सूनृतावती (i. 92. 14) 'benign, noble-minded', सूनृतावरी (iv. 52. 4) 'high-souled', अमृता 'the immortal', इन्द्रतमा (vii. 79. 3) 'most Indra-like', ऋतावरी 'the righteous', ऋतपा 'the preserver of moral order', ऋतेजा (i. 113. 12) 'born in season', घृतप्रतीका (vii. 85. 1) 'shining like clarified butter', वाजप्रसूता

(v. 59. 6) 'bringing brilliant gift', देवी 'the goddess', मघोनी 'liberal,' शुचि 'bright', रण्वसंदृक् (iii. 61. 5) 'of joyous face', सुदृशीकसंदृक् (vii. 77. 2) 'of beauteous aspect', सुप्रतीका (i. 92. 6) 'of fair countenance'.

USAS

i. 124.

म० सू०

दीर्घतमा ऋषिः । उषो देवता । त्रिष्टुप् छन्दः

1

उषा उच्छन्ती समिधाने अग्ना
उद्यन्त्सूर्य उर्विया ज्योतिरश्रेत् ।
देवो नो अत्र सविता न्वर्थं
प्रासावीद्द्विपत्प्र चतुष्पदित्यै ॥१॥

उषाः । उच्छन्ती । सम्ऽइधाने । अग्नौ ।
उत्ऽयन् । सूर्यः । उर्विया । ज्योतिः । अश्रेत् ।
देवः । नः । अत्र । सविता । नु । अर्थम् ।
प्र । असावीत् । द्विऽपत् । प्र । चतुःऽपत् । इत्यै ॥१॥

While the fire is kindling (*agnáu samidhāné*) the shining (*ucchántī*) Uṣas (*Uṣā́ḥ*) [as well as] the rising (*udyán*) Sun (*Sū́ryaḥ*) has spread (*aśret*) [their] effulgence (*jyótiḥ*) afar (*urviyā́*). God (*deváḥ*) Savitṛ (*Savitā́*) has urged on (*prá asāvīt*) our (*naḥ*) bipeds (*dvipát*) here (*átra*), and (*prá*) [our] quadrupeds (*cátuṣpat*) to advance (*ityái*) now (*nu*) to their goal (*ártham*).

वेङ्कटः । 'उषाः' 'उच्छन्ती' व्युच्छन्ती 'समिधाने' होमार्थं दीप्यमाने 'अग्नौ' भवति । 'उद्यं'श्च 'सूर्यः' 'उर्विया' विस्तीर्णं 'ज्योतिः' 'अश्रेत्' श्रयति । 'देव'श्च 'सविता' 'अत्र' 'नु' क्षिप्रं 'नः' अस्मान् । 'अर्थम्' कामं प्रति 'प्रासावीत्' प्रसौति । 'द्विपद्' 'चतुष्पद्'च 'इत्यै' गमनाय प्रसौति ।

क्रमेण। उषा उच्छन्तीति दशर्चं चतुर्थं सूक्तं *दैर्घतमसस्य कक्षीवत आर्षं त्रैष्टुभमुषस्यम्। उषा उच्छन्तीत्यनुक्रान्तम्। विनियोगस्तु पूर्वसूक्त उक्तः[1]।

एषा उषाः समिधाने अग्नौ। अग्नित्वसामान्येनैकवचनम्। अग्निषु समिध्यमानेषु सत्सु। कर्मणि कर्तृप्रत्ययः। उषःकाले ह्याहवनीयादयः प्रज्वाल्यन्ते[2]। उच्छन्ती तमो विवासयन्ती उर्विया उरु बहुलं ज्योतिः प्रकाशम् अश्रेत् सेवते प्रकाशते प्रकाशयति वा सर्वम्†। किमिव? उद्यन् सूर्यः। उपमाप्रधानो निर्देशः। उदितः सूर्य इव। सूर्यो यथा प्रकाशयति तथेत्यर्थः। अत्र त्वदुदयानन्तरमस्मिन् कर्मणि वा सविता देवः सर्वस्य प्रेरकः सूर्यः नः अस्मदर्थं नु क्षिप्रम्। अर्थम्। अर्थशब्दोऽत्र विशेषणवाची नपुंसकलिङ्गः। अयज्ञथानि कृणवन्नपांसि [ऋ° सं° ७।६३।४] इत्यादौ तथा दृष्टत्वात्। अरणीयं द्विपत् पादद्वयोपेतं मनुष्यादिरूपं धनम्। प्रासावीत् अनुजानातु‡ ददात्वित्यर्थः। तथा चतुष्पत् पादचतुष्टयोपेतं गवादिरूपं धनं प्रासावीत्§। इदुदुपधस्य चाप्रत्ययस्य [८।३।४१] इति विसर्जनीयस्य षत्वम्। किमर्थम्?

---

* दर्घतमस: कक्षीवत M. P., but the son of Dīrghatamas is Dairghatamasa and not Dairghatamas. So we must either read दैर्घतमसस्य कक्षीवत or दैर्घतमसकक्षीवत.

[1] प्रातरनुवाक उषस्ये क्रतावैते चोत्तरस्य च विनियोगः। प्रयोक्ता इति खण्डे सूत्रितम्—पृथू रथ इति सूक्ते प्रत्यांचारत्यष्टौ [आ० श्रौ० ४।१४।२] इति। तथाश्विनशस्त्र इदमादि सूक्तद्वयस्य विनियोगः प्रातरनुवाकन्यायेन [आ० श्रौ० ६।५।८] इत्यतिदिष्टत्वात्। See pp. 8, 90.

[2] The correct form, of course, is प्रज्वाल्यन्ते.

† Some Mss. read प्रक्षयात। इयाडियाजीकाराणामुपसंख्यानम् [७।१।३९।१] इति इयाजादेशः। सर्वम्।

‡ The same Mss. read अनुजानातु। [द्विपत्] संख्यासुपूर्वस्य [५।४।१४०] इत्यन्त्यलोपः। पादस्य लोपोऽहस्त्यादिभ्यः पात् [६।४।१३०] इति पद्भावः। द्विचतुर्भ्यां चाहन्° [६।२।१९७] इत्युत्तरपदान्तोदात्तत्वम्।

§ The same Mss. add: इदुदुपधस्य चाप्रत्ययस्य [८।३।४१] इति विसर्जनीयस्य षत्वम्।

इत्थं द्विपदां चतुष्पदां च गमनाय । यद्वा । नः इत्यस्य इति सम्बन्धः, अस्मद्गमनागमनादिव्यापारायेत्यर्थः ॥१॥

This hymn is conspicuous for its repeated words, probably meant to emphasize the recurrence of the phenomena of dawn (MACDONELL).

उषाः—from वस् to shine. It takes the Vikaraṇa छ and is conjugated in the present as उच्छति, उच्छतः etc. and is consequently read in the *Dhātupāṭha* as उछी विवासे. See p. 98.

उच्छन्ती—pres. part. fem. nom. s. of वस् to shine. उच्छन्ति with the short final is the pres. 3. pl. वि चेदुच्छन्त्यश्विना उषासः प्र वां ब्रह्माणि कारवो भरन्ते RV. vii. 72. 4, when the Dawns shine forth, O Aśvins, the poets send forth their songs of praise to you.

समिधाने—In the Vedas, the Ātmanepada endings are often added without the Vikaraṇa *ya* in the passive voice.

उद्यन्त्सूर्यः—For the glide त् the rule is नश्च viii. 3. 80.

उर्विया—for उर्व्या the instrumental sing. of उर्वी the fem. of उरु wide. One expected *उरव्या like पृथ्विया etc.

अश्रेत्—3. s. root-aor., of श्रि. Under iii. 14. 1 S. says: श्रिञ् सेवायाम् इत्यस्य छन्दसि वर्तमाने लङ् । बहुलं छन्दसि [२।४।७३] इति शपो लुक् । सार्वधातुकगुणः । निघातः । Similarly, अश्रोत् occurs as the root-aorist of श्रु to hear in i. 85. 5. Sāyaṇa merely says: श्रु श्रवणे । बहुलं छन्दसि इति विकरणस्य लुक् । In x. 76. 3 we find both अश्रेत् (class. अशिश्रियत्) and अश्रियुः (class. अशिश्रियुः).

अर्थम्—*ártha* n. m. from ऋ 'to go' means literally that which one goes for, goal, aim, object, purpose, goal of the journey, journey, path. समानमर्थं चरणीयमाना चक्रमिव नव्यस्या ववृत्स्व RV. iii. 61. 3, "striving towards the self-same goal, turn hither like a wheel, thou newest" (MACDONELL).

प्रासावीत्—8. s. *iṣ*-aor of सू with प्र to bring forth. See p. 56.

द्विपत्, चतुष्पत्—See p. 349. The stems are द्विपाद् and चतुष्पाद्. प्रबोधयन्तीरुषसः ससन्तं द्विपाच्चतुष्पाच्चरथाय जीवम् RV. iv. 51. 5, awakening, O Dawns, the sleeping and all that lives, biped and quadruped

to motion. In the Nom. Acc. Voc. s. the neuter Bahuvrīhis fluctuate between *-pād* and *-pad*.

इत्यै—dat. s. of इति (=गति). क्षत्राय त्वं श्रवसे त्वं महीया इष्टये त्वमर्थमिव त्वमित्यै RV. i. 113. 6, "one for dominion, another for fame, another for acquisition of greatness, another to go as it were to his goal" (MACDONELL).

2

अमिनती दैव्यानि व्रतानि	अमिनती । दैव्यानि । व्रतानि ।
प्रमिनती मनुष्या युगानि ।	प्रऽमिनती । मनुष्या । युगानि ।
ईयुषीणामुपमा शश्वतीना-	ईयुषीणाम् । उपऽमा । शश्वतीनाम् ।
मायतीनां प्रथमोषा व्यद्यौत् ॥२॥	आऽयतीनाम् । प्रथमा । उषाः । वि । अद्यौत् ॥२॥

Infringing not (*áminatī*) the divine (*dáivyāni*) ordinances (*vratā'ni*), [but] diminishing (*praminatī'*) the span of human life (*manuṣyā̂ yugā'ni*), the last (*upamā'*) of endless (*śáśvatīnām*) [dawns] that have departed (*iyúṣīṇām*), the first (*prathamā'*) of those that are coming (*āyatīnā'm*), Uṣā (*Uṣā'h*) has dawned (*vyâdyaut*).

वेङ्कटः । 'अमिनती' अहिंसती 'दैव्यानि व्रतानि' यज्ञान् । 'प्रमिनती' प्रहिंसती 'मनुष्या युगानि' मनुष्याणाम् आयुषो व्यवच्छेदकान्यहोरात्राणि(?) । 'शश्वतीनाम्' बह्वीनाम् 'ईयुषीणाम्' गतानामुषसाम् 'उपमा' अन्तिमा 'आयतीनाम्' आगच्छन्तीनाम् 'प्रथमा' मुख्या 'उषाः' 'व्यद्यौत' प्रादुरभवत् ।

सायणः । दैव्यानि व्रतानि देवसम्बन्धीन्यग्निहोत्रादीनि कर्माणि । व्रतमिति कर्मनाम व्रतम् कर्वरम् [निघ० २।१] इति तन्नामसु पाठात् । तानि कर्माणि अमिनती अहिंसती* आगमप्रदानेनानुकूलं कुर्वती । तथा मनुष्या

---

* अहिंसन्ती M. P.

मनुष्याणां युगानि युगोपलक्षितान् निमेषादिकालावयवान् प्रमिनती प्रकर्षेण हिंसती*, आयुः क्षपयन्तीत्यर्थः। यद्वा युगानि युग्मानि परस्परसंयोगं प्रमिनती हिंसती* वियोगं कुर्वतीत्यर्थः। उषःकाले सर्वे यथायथं स्वस्वव्यापाराय गच्छन्तीति प्रसिद्धम्। किंच ईयुषीणाम् अतीतानाम् शश्वतीनाम् नित्यानाम् उषसाम् उपमा ताभिः सदृशीत्यर्थः। सादृश्यं च सदृशीरद्य सदृशीरिदु श्वः [ऋ० सं० १।१२३।८] इत्यत्रोक्तम्। तथा आयतीनाम् प्रथमा आगामिनीनामुषसां प्रथमभाविनी सती व्यद्यौत् विशेषेण प्रकाशते। यद्वा ईयुषीणाम् गमनशीलानां पश्वादीनां शश्वतीनाम् सन्ततिप्रवाहरूपेण नित्यानाम् उपमा तद्वद्विनश्येत्यर्थः। तथा आयतीनाम् रात्र्यवसानसमये उत्पद्यमानानां प्रज्ञा-यागादीनां प्रथमा प्रथमभाविनी। उषस्यागतायां यागो बुद्धयश्च स्फुरन्तीति प्रसिद्धम्।[1] तादृशी देवी व्यद्यौत् प्राणिनामनुग्रहाय द्योतते ॥२॥

आमिनती, प्रमिनती—pr. part. P. fem. s. nom. from मी to damage. *Cf*. Eng. di*min*ution. In A. आमिनाना and प्रमिनाना. *Cf*. पुनः पुनर्जायमाना पुराणी समानं वर्णमभि शुम्भमाना। श्वघ्नीव कृत्नुर्विज आमिनाना मर्तस्य देवी जरयन्त्यायुः ॥ RV. i. 92. 10. As a rule, before the Vikaraṇa, roots of the *kryādi* class shorten their vowels; *e.g.*, *mināti*, *punāti*. क्रीणाति, जानाति etc. are exceptions. प्रमिनाति becomes प्रमीणाति in class. Sk. with ण acc. to हिनुमीना viii. 4. 15.

दैव्यानि—देवाद्यञञौ [४।१।८५।२] इति यञ्। यस्येति च [६।४।१४८] इत्यकारलोपः। ञ्नित्यादिर्नित्यम् [६।१।१९७] इत्याद्युदात्तत्वम्। The alternative form दैव्या is much more frequent in RV.

मनुष्या—class. मनुष्याणि. Note the independent Svarita. It is formed from मनुस् 'man' with the secondary suffix यत् and means 'human'. S. regards it as a genitive. "षष्ठ्या डादेशः।"

व्यूर्ण्वती दिवो अन्ताँ अबोध्यप स्वसारं सनुतर्युयोति।
प्रमिनती मनुष्या युगानि योषा जारस्य चक्षसा वि भाति ॥ RV. i. 92. 11,

---

* हिंसन्ती M.P.

[1] *Cf*. अवनमदवसन्नमन्दबुद्धिर्भ्रमताः *Śiś*. xi. 6 and पश्चिमाद्यामिनीयामात्प्रसाद-मिव चेतना *Raghu*. xviii. 1.

She has awakened disclosing the ends of heaven, she drives off her sister far awav. D·minishing hu·nan generations, the maiden shines with the sp!endour of her lover.

ईयुषीणाम्—gen. pl. of ईयुषी f·m of ईयिवस् perf. part. of इ 'to go'.

आयतीनाम्—gen. pl. of आयती, fem. of आयत्. pres. part. of आ-इ. "The feminine is formed with ī from the weak stem; thus *ghnat-ī'-, duhat-ī'-, yat-ī'-, yāt-ī'-, bhāt-ī'-, rudat-ī',...snāt-ī'-* (MACDONELL, *Vedic Grammar*).

उपमा—the fem. form of *upamá* (superl. of उप) highest, nearest. It is read in the list of अन्तिकनाम in *Nigh.* उपमश्रवस् having highest glory. उपमा here, meaning likeness, is a different wor l altogether.

शश्वतीनाम्—see p. 192.

व्यद्यौत्—3. s. s-aor. of *dyut* shine. *Cf.* व्यश्वैत् in i. 113. 15. Under i. 113. 14 S. says: द्युत दीप्तौ। लुङ्। द्युद्भ्यो लुङि [१।३।९१] इति परस्मैपदम्। व्यत्ययेन च्लेः सिच्। गुणे प्राप्ते हलन्तलक्षणा वृद्धिः। यदा तु अभिगमने आदादिकः। तदा उतो वृद्धिर्लुकि हलि [७।३।८९] इति वृद्धिः। *ed* occur in i. 113 15, also, only व्यश्वैत् occurs there for our व्यद्यौत्.

3

एषा दिवो दुहिता प्रत्यदर्शि	एषा । दिवः । दुहिता । प्रति । अदर्शि ।
ज्योतिर्वसाना समना पुरस्तात् ।	ज्योतिः । वसाना । समना । पुरस्तात् ।
ऋतस्य पन्थामन्वेति साधु	ऋतस्य । पन्थाम् । अनु । एति । साधु ।
प्रजानतीव न दिशो मिनाति ॥३॥	प्रजानतीऽइव । न । दिशः । मिनाति ॥३॥

This (*eṣā'*) daughter (*duhitā'*) of Heaven (*Divdḥ*) has appeared (*prdti adarśi*) clad in light (*jyótiḥ vdsānā*) in the east (*purdstāt*) at the same time (*samanā'*). She follows (*dnueti*) straight (*sā'dhú*) the path (*pdnthām*) of order (*ṛtdsya*). Like one knowing well (*prajānatī'va*) she does not miss (*ná mināti*) the quarters (*diśaḥ*).

येह्नद:। 'एषा दिवो दुहिता' 'प्रत्यदर्शि' प्रतिदृश्यते 'पुरस्तात्' पूर्वस्यां दिशि। 'ज्योतिः' 'वसाना' आच्छादयन्ती 'समना' समनस्का। 'ऋतस्य' आदित्यस्य 'पन्थाम्' पन्थानम् 'साधु' 'अन्वेति' अनुगच्छति। 'प्रजानति इव' प्रागेवावगच्छन्तीव 'दिशश्च' 'न' 'मिनाति' हिनस्ति।

सायणः। एषा उषाः दिवः *द्योतनात्मकस्य द्युलोकस्य दुहिता दुहितृस्थानीया। तत उत्पद्यमानत्वाद्दुहितेत्युपचर्यते। पुरस्तात् पूर्वस्यां दिशि प्रति प्रत्येकम् अदर्शि दृश्यते। सर्वेषामपि प्राणिनामाभिमुख्येन प्रकाशत इत्यर्थः। कीदृशी सा? ज्योतिः वसाना तेजोरूपं वस्त्रमाच्छादयन्ती तेजसा प्रकाशयन्ती समना सम्यगानायित्री† चेष्टयित्री। अन्तर्भावितण्यर्थोऽयम्। यद्वा सह युगपदेव मन्यतेऽवबुध्यते प्राणिभिरिति समना। व्युत्पत्त्यनवधारणादनवग्रहः। सा तादृशी ऋतस्य आदित्यस्य पन्थाम् पन्थानं मेरोः प्रान्तप्रदेशम् अनुक्रमेण साधु सम्यक् एति गच्छति। सूर्यो यत्र यत्र गच्छति तत्र तत्र पुरस्तादुषा अपि गच्छतीत्यर्थः। सैव विशेष्यते। प्रजानतीव‡ प्रियभूतस्य सूर्यस्य मार्गो मयापि गन्तव्य इति चेतयन्तीव। यथा लोके प्रियतमेऽनुरागयुक्ता काचिद्भर्तारं सर्वास्ववस्थासु न विमुञ्चति[1] तथेयमपीत्यर्थः। किञ्च दिशः प्रागादिकाः न मिनाति न हिनस्ति। किन्तूषा यत्र गच्छति सा प्राचीत्येवं प्रागादिव्यवहारं करोतीत्यर्थः ॥३॥

समना—adv. meaning together, in the same way. In form it is the old instr. s. of समन (formed from सम with the taddhita suffix न, or from सम् and अन्). RV. iv. 51. 8: ता आ चरन्ति समना पुरस्तात् समानतः समना पप्रथानाः, they approach together in the east, spreading themselves together from the same place.

वसाना—pres. part. Ā. of 2. वस्, Eng. *wear*. *Cf. ves*-ture. Gk. *hennūmi* (for **wes-nūmi*) put on.

---

* द्योतमानात्मकस्य M.P. † सम्यगानयित्री All. ‡ प्रियतमस्य some Mss.

[1] *Cf.* Mrs. Micawber's declaration: "I never will desert Mr. Micawber." *David Copperfield*, chapter 12.

पुरस्तात्—lit. in or from the front, hence, in the east. पुरः is formed with the adverbial suffix *as* from *pur* (*cf. purā*). To पुरः is added the adverbial suffix *tāt* (originally the Abl. s. of *ta* that) which is added to adverbs of direction (दिक् ending in अस्, अक्, आत्.

पश्चात्—See pp. 256-57.

साधु—"leading straight to a goal, hitting the mark, unerring", adv. straightway (*cf.* साधुया). *Cf.* साधुना पथा x. 114. 10. *cf.* ऋतस्य पन्थामन्वेति साधुया x. 61. 13, *cd.* v. 80. 4 *cd.*

4

उपो अदर्शि शुन्ध्युवो न वक्षो
नोधा इवाविरकृत प्रियाणि ।
अद्मसन्न ससतो बोधयन्ती
शश्वत्तमागात्पुनरेयुषीणाम् ॥४॥

उपो इति । अदर्शि । शुन्ध्युवः । न । वक्षः ।
नोधाःऽइव । आविः । अकृत । प्रियाणि ।
अद्मसत् । न । ससतः । बोधयन्ती ।
शश्वत्ऽतमा । आ । अगात् । पुनः ।
आऽईयुषीणाम् ॥४॥

And (*u*) there has appeared (*úpa adarśi*) her breast (*vákṣaḥ*) like that of a Śundhyū bird (*śundhyúvaḥ ná*). Like Nodhas (*Nodhā'ḥ íva*) she has manifested (*āvíḥ akṛta*) her dear things, *i.e.*, charms (*priyā'ṇi*). Like a fly (*admasát ná*) awakening (*bodháyantī*) sleepers (*sasatáḥ*), she has come (*ā' agāt*) the first of many (*śaśvattamā'*) that return again (*púnaḥ eyúṣīṇām*).

वेङ्कटः । उषा 'उपो अदर्शि' उपदृश्यते 'शुन्ध्युवः' शोधयितुरादित्यस्य 'वक्षः' 'न' इव । सेयम् ऋषिः 'नोधाः इव' स्तुत्या 'प्रियाणि' कामान् 'आविरकृत' आविष्कुरुते 'प्रियाणि' रूपाणि । 'अद्मसत् न' सूदस्त्रीवान्ने सीदन्ती सिद्धेऽन्ने 'ससतः' स्वामिनः स्वपतः 'बोधयन्ती' 'शश्वत्तमा' नित्या 'आगात्' आगता 'पुनः' पुनः पुनः 'एयुषीणाम्' आगच्छन्तीनामुषसां मध्ये ।

[illegible] एव स्पष्टं ॥ नकारो इति निपातकृत्य[illegible] पृको निपातः । सर्वैः समीप एव चदृशि दृश्यते । तत्र दृष्टान्तः । शुन्ध्युवः न वक्षः । अत्र नकार उपमार्थीय उपरिष्टात् प्रयुज्यमानत्वात् । यत्र तु प्रतिषेधो विवक्षितस्तत्र पुरस्तान्नकारः प्रयुज्यते । तथा च यास्कः—पुरस्तादुपाचारस्तस्य यत्प्रतिषेधति [नि० १।४] इति । तस्योदाहरणम्—नेन्द्रं देवममंसत [१०।८६।१] इति । उपरिष्टादुपाचारस्तस्य येनोपमिमीते [नि० १।४] इति । तस्योदाहरणम्—दुर्मदासो न सुरायाम् [ऋ० सं० ८।२।१२] इति । शुन्ध्युः आदित्यः सर्वेषां शोधकत्वात् । तस्य वक्षः वक्षःस्थानीयो रश्मिसमूहः । स यथा प्रकाशमानो दृश्यते तथेत्यर्थः । यद्वा । शुन्ध्युरिति जलचरः श्वेतवर्णः पक्षिविशेषः । स यथा स्वकीयं वक्षः प्रकाशयन् दृश्यते तद्वदित्यर्थः । किञ्च नोधाः इव प्रियाणि आविरकृत । नवनं स्तोत्रं धारयतीति नोधाः । एतन्नामा महर्षिर्देवतास्तुतिव्याजेन नानाविधैर्मन्त्रैः प्रियाणि स्वमनीषिकान्याविष्कृतवान् । तथैषापि स्वकीयानि सर्वलोकप्रियाणि तेजांस्याविरकरोत् । किञ्च सद्मसत् न । अत्राप्युपमार्थीयो नकारः । अयत इत्यत्र अक्षम्, तत्र पाकाय गृहे सीदतीत्यसमसत् पाचिका योषित् ससतः बोधयन्तो । सा यथा स्वपतः पुत्रादीन् भोजनाय बोधयति तद्वत् । यद्वा । अद्मेति गृहनाम । वरूथम् अद्मम् [निघ० ३।५ °] इति तन्नामसु पाठात्* । तत्र सीदत्यसमसत् जननी । सा यथा स्वपतः पुत्रादीनुषःकाले प्रबोधयति तथा भुवनाख्ये गृहे सीदन्ती तत्रत्यान् प्राणिनः प्रबोधयन्तीयमुषाः । एयुषीणाम् आगमनशीलानां स्त्रीणां मध्ये शश्वत्तमा पुनः पुनरागच्छति प्रातर्नियतमागच्छन्तीनां वारयोषितां मध्ये स्वयमेका सती नियतमागच्छतीत्यभिप्रायः । अत्र निरुक्तम् । उपादर्शि शुन्ध्युवः । शुन्ध्युरादित्यो भवति शोधनात् । तस्यैव वक्षो भासोऽध्यूळ्हम् । इदमपीतरद्वक्ष एतस्मादेव, अध्यूळ्हं काये । शकुनिरपि शुन्ध्युरुच्यते शोधनादेव,—उदकचरो भवति । आपोऽपि शुन्ध्युव उच्यन्ते शोधनादेव । नोधा ऋषिर्भवति नवनं दधाति । स यथा स्तुत्या कामानाविष्कुरुत

---

* अद्म is not found in the *Nighaṇṭu*.

एवमुषा रूपाण्याविष्कुरुते। अद्मसद्। अन्नाद्यं भवति। अदनसादिनीति वा, अन्नसानिनीति वा। ससतो बोधयन्ती शश्वत्तमागात्पुनरेयुषीणाम्—स्वपतो बोधयन्ती शाश्वतिकतमागात् पुनरागामिनीनाम् [नि० ४।१६] इति ॥४॥

दुर्गः। कक्षीवत आर्षम्। औषसी। त्रिष्टुप्। प्रातरनुवाकाश्विनयोः शस्यते। 'उपो अदर्शि' उपश्लिष्टा दृश्यत इयमुषाः। कस्य? 'शुन्ध्युवः' शोधयितुरादित्यस्य। आदित्यो हि यदप्यशुचि भवति तदपि रश्मिभिः स्पृष्ट्वा शुचीकरोति। सूर्यः पवित्रमुच्यते [नि० ५।६] इति वक्ष्यति। तमांसि वा शोधयतीति शुन्ध्युः। तस्य शुन्ध्युवः। कथं पुनरुपश्लिष्टा दृश्यते? 'वक्षो न' वक्ष इव। यथा तस्य स्वभासः स्वम् प्रकाशजालं वक्षोभूतम् एतस्मिन् मण्डलेऽध्यूढम् एवमियमुषा एतस्मिन् मण्डल उपश्लिष्टा दृश्यते सन्निकर्षात्। प्रासङ्गिकमुच्यते शब्दसामान्यात्—'इदमपीतरद्वक्षः' पुरुषवक्षः पशुवक्षो वाऽस्म् 'एतस्मादेव' वहतेर्धातोः, इदम् 'अध्यूढम्' अधिप्रवेशितमिव 'काये' शरीरे भवति। 'शकुनिरपि' य एष मद्गुर्नाम। अयमपि 'शुन्ध्युरुच्यते' 'शोधनादेव'। यो हि 'उदकचरो भवति' नित्यशुद्ध एवेति शुन्ध्युः। 'आपोऽपि शुन्ध्युव उच्यन्ते' ता अपि हि शोधयन्ति। एवं तावदियमुषा आदित्यस्य वक्ष इवोपश्लिष्टा दृश्यते। किञ्च, इयमेवोषाः 'नोधा इवाविरकृत प्रियाणि'। नोधा ऋषिर्भवति। स हि 'नवनं' स्तोत्रं देवताः प्रति 'दधाति'। 'स यथा' स्वमुखोद्गीर्णया स्तुत्या प्रियाण्यात्मनः 'कामान्' स्वानि कामाख्यानि 'आविष्कुरुते' आविष्करोति प्रकाशयति देवताः प्रति। 'एवम्' इयम् 'उषाः' स्वात्मन एवोद्गीर्णेन प्रकाशेन 'रूपाणि' जनानाम् 'आविष्कुरुते' प्रकाशीकुरुते। किञ्च, इयमेवोषाः 'अद्मसन्न ससतो बोधयन्ती'। अद्म अन्नम्। तत् प्रतिकर्तव्यतया सीदति, गृह्णा सनोति सम्भजत इत्यद्मसत् गृहाधिकारे नियुक्ताऽन्नसाधिका स्त्री। सा यथा प्रातरेव क्षीराद्युपादानार्थं 'ससतः' 'स्वपतः' जनान् दोहकादीन् 'बोधयन्ती' अन्नं साधयिष्यन्ती, एवमुषा अपि जनान् बोधयन्ती। तत्काले हि ते इतिकर्तव्यार्थं जनाः प्रतिबुध्यन्ते। तेनैतयैव बोधिता भवन्ति। आह—कदा पुनरेतत्करोतीति? उच्यते—यदा 'शश्वत्तमागात्' शाश्वतिकतमा नित्यतमा आगात् आगच्छति, तदैव जनान् बोधयति, एवमुषा रूपाण्याविष्कुरुते।

एवं च बहु कृत्वोपमा आश्रिताविशेषा दृश्यते। आह—का वा सा शश्वत्तमैवमुषा इति? उच्यते—'पुनरेयुषीणाम्' 'पुनरागामिनीनाम्' इत्यर्थः। या एताः काश्चिद् गत्वा पुनरागच्छन्ति ताः पुनरेयुष्यो गावः, अन्या वा। तासां पुनरेयुषीणामिति निर्धारयति। एषैव शश्वत्तमा शाश्वतिकतमा। एवमेतस्मिन्मन्त्रे सामर्थ्यादग्र-सवित्र्यर्थसाधिका स्तूयते, सा हि तत्काले जनान् दोहकादीन् बोधयति, उषा अपि च तत्काल एवागच्छतीति, एवमुपमानमुपपद्यते। अन्ये तु मक्षिकामद्मसदं मन्यन्ते, सापि ह्यन्ने सीदति, सनोति वान्नं तत्काले च प्रतिबुध्यमानान्यान् बोधयतीति ॥४॥

स्कन्दः। कक्षीवत आर्षम्। 'उपो' उकारः पदपूरणः। उपोपसर्गश्रुतेश्च योग्यक्रियाध्याहारः। उपगता उदिता सतीत्यर्थः। 'अदर्शि' वर्तमाने कर्मणि लुङ्। दृश्यत उषाः। किमिव? 'शुन्ध्युवो न वक्षः।' उदकचरो यः पक्षी हंसादिः शुक्लवर्णस्तस्येव वक्ष उरः। भास्वराः शुक्लवर्णा वेत्यर्थः। किञ्च 'आविरकृत' स्वेन ज्योतिषा कृत्स्नं जगदाविष्करोति। 'नोधाः' ऋषिः स यथात्मनः 'प्रियाणि' धनादीनि स्तोमार्थेण सपर्यामि प्रयसा [ऋ० सं० १।५८।७] नू ष्ठिरं मरुतो वीरवन्तम् [ऋ० सं० १।६४।१५] इत्यादिनाविष्कृतवान्, तद्वत्। किञ्च अद्मसत् अदनायान्नं तस्मिन् यक्षिभूत्वेन सीदति सनोति वा या सा अद्मसत्। सा च सामर्थ्यात् सूपकारी। मक्षिका वात्राभिप्रेता। सा यथा प्रातरुत्थाय क्षीरादिसंग्रहार्थं जनान् प्रबोधयति। 'शश्वत्तमागात्पुनरेयुषीणाम्।' शश्वच्छब्दो नित्यवचनः पुनरायान्ति ताः पुनरेयुष्यो यथोषसः। उषसो हि गत्वा प्रत्यहमुदेष्यत आदित्यात् पुनरायान्ति। गवादयो हि गव्यूतिपर्यन्तं गत्वा गत्वा पुनरायान्ति। निर्धारणे चेयं षष्ठी॥ अतिशयेन नित्या पुनरेयुषीणां मध्य आगात् कृत्स्नं जगदभ्येति व्याप्नोतीत्यर्थः ॥४॥

शुन्ध्युवः—gen. s. of शुन्ध्यू which evidently denotes a bird. *Cf.* RV. viii. 24. 24: वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम्। अहरहः शुन्ध्युः परिपदामिव॥ Thou knowest, O thunder-armed, how to avoid the goddesses of destruction day by day, like the Sundhyū bird the noose. Both शुन्ध्यु and शुन्ध्यू occur in RV.

नोधाः—is the name of a seer to whom is ascribed the authorship of certain hymns of RV.

प्रियाणि—may mean trinkets, gems or charms. *Cf.* RV. x. 86. 5: प्रिया तष्टानि मे कपिर्व्यक्ता व्यदूदुषत्. "Kapi hath marred the beauteous things, all deftly wrought, that were my joy."

अद्मसत्—sitting on the food, fly. It may also mean 'great at the feast' (lit. sitting at the meal). *Cf.* RV. vi. 30. 3: नि पर्वता अद्मसदो न सेदुः the mountains settled down like flies. अद्मसद्वन् is used in RV. vi. 4. 4: वद्मा हि सूनो अस्यद्मसद्वा, because thou, O son, art talkative, when thou sittest at the meal.

ससतः—acc. pl. of ससत् pres. part. of सस् to sleep. The root is Vedic. Pres. सस्ति.

शश्वत्तमा—Note the accent. 'उत्तम-शश्वत्तमौ सर्वत्र' फिषुञ्छादिषु [६।१।१६०] पाठादन्तोदात्तत्वम् । S. under i. 118. 11.

5

पूर्वे अर्धे रजसो अप्त्यस्य	पूर्वे । अर्धे । रजसः । अप्त्यस्य ।
गवां जनित्र्यकृत प्र केतुम् ।	गवाम् । जनित्री । अकृत । प्र । केतुम् ।
व्यु प्रथते वितरं वरीय	वि । ऊँ इति । प्रथते । विऽतरम् । वरीयः ।
ओभा पृणन्ती पित्रोरुपस्था ॥५॥	आ । उभा । पृणन्ती । पित्रोः । उपऽस्था ।

In the eastern half (*pū́rve árdhe*) of the watery (*aptyásya*) space (*rájasaḥ*) the mother (*jánitrī*) of the cows (*gávām*) has set up (*prá akṛta*) her banner (*ketúm*). And she spreads herself (*ví u prathate*) wider and wider still (*vitarám váriyaḥ*), filling up (*ā́ pṛṇántī*) both the laps (*ubhā́ upásthā*) of her parents (*pitróḥ*).

वेङ्कटः । 'अप्त्यस्य' अद्भ्यो जातस्य 'पूर्वे अर्धे' पूर्वस्मिन् भागे 'रजसः' अन्तरिक्षस्य उषाः 'गवाम्' तेजसां 'जनित्री' जनयित्री 'केतुम्' आदित्यस्य तेजः 'प्राकृत' प्रकरोति । 'वरीयः' उरुत्वं च 'वितरम्' अतिशयेन तत्र 'विप्रथते' विप्रथयति । 'पित्रोः' द्यावापृथिव्योः 'उभा' उभौ 'उपस्था' उपस्थौ 'आ पृणन्ती' आपूरयन्ती तेजसा ।

सायणः। अप्त्यस्य व्यापनशीलस्य विस्तृतस्य रजसः रञ्जकस्यान्तरिक्ष-लोकस्य। रजःशब्दोऽन्तरिक्षलोकवाची, 'लोका रजांस्युच्यन्ते' इति यास्केनोक्तत्वात् [नि° ४।१९]। तस्य पूर्वे अर्धे पूर्वस्मिन् भागे जनित्री उत्पन्ना सती गवाम् दिवां रश्मीनां वा केतुं प्रज्ञानं प्राक्त प्रकर्षेण करोति। यद्वा। रजसः रञ्जकस्याह्नः। रजःशब्दोऽहर्वाची। असृगहनी रजसी उच्येते [नि° ४।१९] इति यास्केनोक्तत्वात्। तस्य पूर्वे अर्धे पूर्वस्मिन् भागे उषःकाले गवां वाचां जनित्री जनयित्री उत्पादयित्री। उषःकाले सर्वेषां प्राणिनां वाचः स्फुरन्तीति प्रसिद्धम्। यद्वा। अप्त्यस्य कर्मसु स्थितस्य जन्तोः केतुम् गमनागमनादिरूपं कर्म। केतुरिति कर्मनाम, केतः केतुः [निघ° ३।९] इति तन्नामसु पाठात्। प्राक्त प्रकर्षेण करोति। किञ्च पित्रोः पालयित्रोर्द्यावापृथिव्योः उपस्था उपस्थ उत्सङ्गेऽन्तरालप्रदेशे स्थित्वा उभा उभे द्यावापृथिव्यौ पृणन्ती स्वतेजसा पूरयन्ती। यद्वा। उभा उभयोः पित्रोरिति सम्बन्धः। वितरम् विशिष्टतरं वरीयः उरुतरमतिविस्तीर्णं यथा भवति तथा वि उ प्रथते विशेषेणैव प्रख्याता भवति। प्रकाशत इत्यर्थः। उशब्दोऽवधारणार्थः पदपूरणो वा। "मिताक्षरेष्वनर्थकाः कमीमिद्विति" [नि° २।९] इति यास्केनोक्तत्वात्।

अप्त्यस्य—Both *aptyá* and *āptyá* occur in RV. in the sense of watery. Renou thinks *aptyá* is derived from **apta*.

केतुम्—banner, from कित् to appear, to shine. Goth. *haidu-s* (lit. appearance, manner), way. Eng. *-hood*, *-head* (man*hood*, God-*head*), Germ. *-keit*. (*Dankbarkeit*). *Cf.* i. 92. 1. एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमञ्जते These dawns have set up their banner in the eastern half of space, they deck themselves with sheen; i. 6. 3: केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः॥ Thou making light where no light was, and colour, O men, where colour was not, wast born together with the Dawns.

वितरम्—*cf.* अद्रा नक्षुषो वितरं वुच्छ i. 123. 11, सखे विष्णो वितरं वि क्रमस्व iv. 18. 11. "बहुलं छन्दसि [५।३।१२] इति वैदरपि तरप्रत्ययः।

पृणन्ती—शुमागमश्छान्दसः।

6

एवेदेषा पुरुतमा दृशे कं
नाजामिं न परि वृणक्ति जामिम् ।
अरेपसा तन्वा३ शाशदाना
नार्भादीषते न महो विभाती ॥६॥

एव । इत् । एषा । पुरुऽतमा । दृशे । कम् ।
न । अजामिम् । न । परि । वृणक्ति । जामिम् ।
अरेपसा । तन्वा । शाशदाना ।
न । अर्भात् । ईषते । न । महः । विऽभाती ।

Even thus (*evá it*) she (*eṣā'*) is most frequent (*purutámā*) *i.e.*, she appears most frequently in order to see (*dṛśé kám*), she shuns not (*ná pári vṛṇakti*) one who is not kin (*ájāmim*) nor one who is akin (*ná jāmim*). Proud (*śā'śadānā*) with her unblemished form (*arepásā tanvā̂*), she withdraws (*ī'ṣate*) not from small (*ná árbhāt*) nor great (*ná mahaḥ́*), shining forth (*vi-bhātī'*).

वेङ्कटः । 'एव' एवम् 'इत्' एव 'एषा' 'पुरुतमा' 'दृशे' दर्शनाय भवति । 'न' च 'परिवृणक्ति' वर्जयति 'जामिम्' बन्धुम् 'न अजामिम्' अबन्धुं वा । 'अरेपसा' उज्ज्वलया 'तन्वा' 'शाशदाना' सर्वमपबाधमाना सेयम् 'अर्भात्' कुमारात् 'न ईषते' न पलायते 'न महः' न च वृद्धात् 'विभाती' व्युच्छन्ती सर्वं जरयतीति ।

सायणः । एषा उषा एवेत् । इच्छब्द एवकारार्थः । एवमेवेदानीं भासमानप्रकारेणैव पुरुतमा विपुलतमात्यन्तविस्तृता सती अजामिम् विजातीयमनुष्यादिजातिं न परिवृणक्ति परितः सर्वतो न वर्जयति । तथा जामिम् सजातीयदेवजातिं न परिवृणक्ति न परिवर्जयति । मनुष्यादिकं देवादिकं च तदुपलक्षितं लोकद्वयं वा कार्त्स्न्येन प्रकाशयतीत्यर्थः । किमर्थमिति तदुच्यते । दृशे कम् सुखेन सर्वेषां दर्शनाय । सुखं यथा भवति तथा सर्वान् दर्शयितुं वा । किञ्च अरेपसा अपापया निर्मलया तन्वा शरीरेण । शाशदाना

शाशयमाना* । 'शाशदानः शाशयमानः' इति यास्कः [नि० ६।१६] । स्पष्टतां गच्छन्तीत्यर्थः । विभाती विशेषेण प्रकाशयन्ती सा अर्भात् अल्पात् पुत्तिकादेः सकाशात् न ईषते न गच्छति । तमपि प्रकाशयति । तथा महः महतो मेर्वादेः सकाशात् न ईषते न गच्छति तमपि प्रकाशयतीत्यर्थः । पूर्वं लोकद्वयं प्रकाशत इत्युक्तम् । इदानीमस्मिँल्लोके परमाण्वादि पर्वतपर्यन्तं कृत्स्नं प्रकाशयतीत्युच्यते† ।

प्रथतमा—Note the accent. ननु स्मानै इति धातोरमर्भावितण्यर्थात् पचाद्यचि चित्त्वादन्तोदात्तत्वेऽपि ऊदुत्तरप्रकृतिस्वरत्वं बाधित्वा परादिश्छन्दसि बहुलम् [६।२।१९९] इत्युत्तरपदाद्युदात्तत्वम् !!! S. under i. 5. 2.

अजामिं न परि वृणक्ति जामिम्—जामि like (तुवि-)कूर्मि is derived from जन् with the suffix -मि. "*Jāmi*, a word which appears originally to have meant 'related in blood,' is not rarely used as an epithet of 'sister,' and sometimes even denotes 'sister' itself, the emphasis being on the blood relationship. So it appears in a passage of the Atharvaveda where brotherless sisters (abhrātara iva jāmayaḥ i. 17. 1) are referred to. The word is similarly used in the dispute occurring in the Aitareya Brāhmaṇa (iii. 37) as to the precedence of Rākā, or of the wives of the gods, in a certain rite. One party is there described as holding that the sister should be preferred (*jāmyai vai pūrva-peyam*)—apparently at a ceremonial family meal—to the wife, presumably as being of one blood with the husband, while the wife is not (being *anyodaryā*, 'of another womb'). In the neuter the word means 'relationship,' like *jāmi-tva* which also occurs in the Ṛgveda" (*Vedic Index*).

अरेपसा तन्वा—is explained by Yāska as अपेनालिप्यमानया तन्वा (*Nir*.xii. 5). रेपस् derived from रिप् to smear (older form of लिप्) means (like रिप *n*.) defilement, impurity. *Cf*. RV. iv. 6. 6: न अरातयस्तन्वो रेप आ धुः the polluters bring no stain on the body.

---

* शाशयमाना M. P. † इत्यर्थः all.

शाशदाना—pres. part. Ā. of the intensive of शद् to distinguish oneself, to prevail. Gk. *kekasmenos*, Dor. *kekadmenos*, distinguished. See under i. 116. 2. The perfect शाशदुः, the pres. शाशदते and शाशद्रे are also met with. शाशदाना is explained by Yāska as शाशद्यमाना, but we are none the wiser for this explanation. Skanda explains शदलृ शातने इत्यस्य यङि छान्दसत्वाच्च तस्य लुकि रूपम्। शाशद्यमाना इत्यवगमः।

अर्भं—I. E. *orbho-* orphaned, orphan, Skt. *arbha-* small, small child, Gk. *orphanos* destitute, fatherless, orphan, Goth. *arbi* inheritance.

ईषते—accented as occurring in the first of two antithetical clauses.

7

अभ्रातेव पुंस एति प्रतीची	अभ्राताऽइव । पुंसः । एति । प्रतीची ।
गर्तारुगिव सनये धनानाम् ।	गर्तारुक्ऽइव । सनये । धनानाम् ।
जायेव पत्य उशती सुवासा	जायाऽइव । पत्ये । उशती । सुऽवासाः ।
उषा हस्रेव नि रिणीते अप्सः ॥७॥	उषाः । हस्राऽइव । नि । रिणीते । अप्सः ।

Like a brotherless [girl] (*abhrātā' iva*) she goes (*eti*) towards (*pratīcī'*) men (*puṁsáḥ*), like one who mounts a stage (*gartārúk iva*) for the winning (*sanáye*) of riches (*dhánānām*). Like a well-clad (*suvā'sāḥ*) wife (*jāyā' iva*) longing (*uśatī'*) to her husband (*pátye*), Dawn (*Uṣā'ḥ*) exposes (*ní riṇīte*) her breast (*ápsaḥ*) like a courtesan (*hasrā' iva*).

वेङ्कटः । 'अभ्रातेव' यथाभ्रातृका कन्या 'पुंसः' पितॄन् 'प्रति' 'प्रतीची' अभिमुखी सन्तानकर्मणे पिण्डदानाय, न पतीन्, एवमुषा अभिमुख्यागच्छति । 'गर्तारुक् इव' गर्तारोहिणीव सनये धनानां धनकामा याचिकाव । गर्तो द्यूतास्तारः, तमपतिकापुत्रा च स्त्री भर्तुर्धनहरणायारोहति, तां तदंशेन कितवा घ्नन्ति ।

न सा ततोऽन्यमाश्रयते, न च तामन्यः परिगृह्णाति, धनमुपगृह्णाति दाक्षिणात्येषु। जायेव पत्ये उशती कामयमाना सुवासा ऋतुकालेषु 'उषाः' 'हस्रेव' हसनेव स्त्री दन्तान्, 'अप्सः' आत्मीयं रूपं 'नि रिणीते' विवृणुते।

सायणः। अभ्रातेव भ्रातृरहितेव पुंसः पित्रादीन् प्रति प्रतीची स्वकीयस्थानात् प्रतिनिवृत्तमुखी सती एति गच्छति। यथा लोके भ्रातृरहिता योषित् स्वोचितवासोऽलङ्कारादिलाभाय पितृगेहमेति। सति भ्रातरि स एवोचितप्रदानादिना सम्यक् तोषयति, तदभावात् पितरमेव प्राप्नोति। यद्वा। सति स्वभ्रातरि स एव पितुः पिण्डदानादिकं सन्तानकृत्यं करोति। तस्याभावात् स्वयमेव तत्कर्तुं पित्रादीन् गच्छति। तद्वदियमुषा अपि स्वोचितप्रकाशादिलाभाय स्वप्रकाशनाय* वा पितृभूतं सूर्यमाभिमुख्येन गच्छति। अयमेको दृष्टान्तः। तथा धनानां सनये गर्तारुगिवेत्यपरो दृष्टान्तः। गर्त इति गृहनाम, कृदरो गर्तः [निघ॰ ३।४] इति तन्नामसु पाठात्। अतौचित्येन राजपुरुषैर्न्यायनिर्णेतृभिश्चाधिष्ठितं† स्थानमुच्यते तदारोहतीति गर्तारुक्। यथा लोके काचिद्गतभर्तृका योषिद् धनानाम् स्वकीयरिक्थानां सनये लाभाय गर्तमागच्छति। तां तु सभ्या विचार्य यदीयं रिक्थं लभत इति निश्चिनुयात्‡ अथैः सन्तारुच तदीयं धनं वितरन्ति। तथेयमपि धनानां प्रीणनसाधनानां प्रकाशानां सनये लाभाय गर्तमाकाशं सूर्यनिवासस्थानमारोहति। देशविशेषाचारमपेक्ष्यैवं दृष्टान्तितम्। किञ्च पत्ये उशती कामयमाना सुवासाः जायेव अयमपरो दृष्टान्तः। यथा च लोके सुवासा दुकूलादिशोभनवसना स्वलंकृता पूर्वं रजोदर्शनसमये मलिनवस्त्रा सती स्नानानन्तरं शोभनवस्त्राभरणादिना शोभमाना विशेषेण पतिं भोगाय काङ्क्षन्ती तेन सह संक्रीडते तथेयमुषा §अपि नैशेनान्धकारेणावृतत्वान्मलिनवसनापि प्रभाते स्वतेजसावृतत्वात् सुवसना सती पतिस्थानीयेन सूर्येण साकं संक्रीडमाना हस्रेव हसनेव¶ अप्सः दन्तस्थानीयानि रूपाणि नील-

* स्वप्रकाशप्रदानाय M. P.

† धाष्ठितम् v. l.

‡ यदीयं रिक्थं लभते चेत् अर्थैः all.

§ पतिर्नैशेना° M. P.

¶ हसमानेव v. l.

पीतादीनि। यद्वा। निरूप्यमाणानि पदार्थजातानि। नि रिणीते नितरां रिणीते गमयात प्रकाशयतीत्यर्थः।* यथा लोके काचिद्रमणीया योषित् स्मितव्याजेन दन्तान् विवृणुते तथेयमपि सर्वाणि रूपाणि प्रकाशयतीत्यर्थः। अयं मन्त्रो निरुक्ते [३।५] स्पष्टं व्याख्यातः। अभ्रातृकेव पुंसः पितॄनेत्यभिमुखी सन्तानकर्मणे पिण्डदानाय न पतिं गर्तारोहिणीव धनलाभाय दाक्षिणाजी। गर्तः सभास्थाणुः, गृणातेः। सत्यसंगरो भवति। तं तत्र यापुत्रा यापतिका सारोहति तां तत्राक्षैराघ्नन्ति सा रिक्थं लभते। इति। 'जायेव पत्ये कामयमाना सुवासा ऋतुकालेषूषा हसनेव दन्तान् विवृणुते' इति च।

दुर्गः। दीर्घतमःपुत्रस्य कक्षीवत आर्षम्। त्रिष्टुप्। औषसी। प्रातरनुवाकाश्विनयोः शस्यते। अभ्रातेव पुंसः यथाभ्रातृका कन्या दत्तापि सती पित्रा, ऊढा भर्त्रा पुनः प्रतीची पुंसः पितॄनेव पितृवंशमेव अभिमुखी एति सन्तानकर्मणे पिण्डदानाय, न पतिम् पतिवंशमित्यर्थः। सा हि पितृवंशं पुत्रैः पौत्रैश्च वर्धयति न भर्तृवंशमिति, तस्मादभ्रातृका पैतृकं दायाद्यमर्हतीत्युपपद्यते। "गर्तारुगिव सनये धनानाम्।" 'गर्तारोहिणीव' काचित् 'दाक्षिणाजी' दाक्षिणात्या स्त्री। सा यथा 'गर्तः सभास्थाणुः' तमारोहति। अक्षनिवपनपीठं निचितात इत्यर्थः। तत्र गता सत्यपुत्रा रिक्थं लभते, कितवा दापयन्ति रिक्थम् इति दाक्षिणात्येषु देशरीतिः। 'सनये' लब्धये 'धनानाम्'। एवम् 'उषाः' अपरकाले रात्र्या नभ आरोहति। किञ्च "जायेव पत्य उशती सुवासाः।" यथा जाया पत्ये भर्त्रे सुवासा भूत्वा ऋतुकालेष्वात्मानं दर्शयति, एवमुषा आत्मानं दर्शयति जनानाम्। किञ्च "उषा हस्रेव निरिणीते अप्सः।" यथा हसना स्त्री हसनस्वभावा दन्तानात्मनो दर्शयति, एवमुषा अप्यात्मनोऽन्तर्भूतानि सर्वद्रव्याणां रूपाणि विवृणुते, शार्वरेण तमसा दिग्धानि सर्वद्रव्याणि स्वेन प्रकाशोदकेन धौतानीव करोति।

* री गतिरेषणयोः [धा° ९।२९] क्र्यादिकः। व्यत्ययेनात्मनेपदम्। प्वादीनां ह्रस्वः [७।३।८०] इति ह्रस्वत्वम्। अन्तर्भावितण्यर्थोऽयम्। added in some MSS.

चतस्र एता उपमा अस्यामृचि। अभ्रातेव पुंस इत्येका। गर्तारोहिणीवेति द्वितीया। जायेव पत्य इति तृतीया। हस्रेवेति चतुर्थी। अत्र प्रथमयोपमया अभ्रातेव पुंस इत्यनयाभ्रातृकाया अनिर्वाहो लिङ्ग्यते, यथाभ्रातृका पितॄनेव प्रत्येति न पतिम्, एवमुषा आदित्यमेव प्रत्येति। एवमभ्रातृका कन्या यस्मिन्नेव वंश उत्पन्ना भवति, तमेव प्रकाशयति वर्धयति, न भर्तृवंशम्। इत्येवमुपमया नासौ वोढव्येत्येतदुपप्रदर्शितं भवति, पुत्रार्थत्वाद्विवाहस्य। तस्मादवर्धयितृत्वाद् भर्तृवंशस्य वर्धयितृत्वाच्च पितृवंशस्याभ्रातृका पितृदायाद्यमर्हतीत्युपपद्यते।

निगमप्रसक्तस्य तत्त्वमाचष्टे—'गर्तः सभास्थाणुः' इति, अक्षनिर्वपणपीठमित्यर्थः। 'गृणातेः'। स हि 'सत्यसङ्गरो भवति' सङ्गीर्यते हि तत्र सत्यम् इदमस्य पतितम् इदमस्य न पतितमित्येवम्। प्रायेण कितवास्तत्रानृतं ब्रुवते। तमेवंलक्षणं गर्तमारोहति या स्त्री सा गर्तारुगित्युच्यते। तदेतद्गर्तस्य सभास्थाणोरारोहणं रिक्थलाभहेतुरपुत्राया अपतिकायाः स्त्रियाः प्रसिद्धम्। तयैव प्रसिद्ध्या निरुच्यते देशसमाचारव्यवस्थयापि क्वचिन्मन्त्रार्थो निर्वक्तव्य इत्येतदनेन प्रदर्शितं भवति। 'तं तत्र यापुत्रापतिका सारोहति' तं सभास्थाणुम्, तत्र कितवमध्येऽवस्थितं यापुत्रा स्त्री यापतिका सारोहति तस्मिन्नुपविशतीत्यर्थः। ततः 'सा' भर्तृबन्धुभ्यः सकाशाद् 'रिक्थं लभते' यत्तस्या भर्तुः सक्तो धनांशस्तम्। एवमसौ सनये लब्धये धनानां गर्तमारोहति।

स्कन्दस्वामी। 'यथाभ्रातृका' स्त्री येभ्य उत्पन्ना तानेव 'पुंसः' पितॄन् 'एति' गच्छति सन्तानकर्मणे पिण्डदानाय च। एवमुषा यत उत्पन्ना तमेवादित्यं गच्छति, तत्रैव प्रलीयत इत्यर्थः। 'प्रतीची' प्रत्यग्गामिनी 'गर्तारुगिव' यथा दक्षिणापथे क्वापि प्रदेशेऽपुत्रापतिका चात्कारारोहिणी स्त्री 'सनये' लाभाय 'धनानाम्' भर्तुः स्वभूतानां सर्वलोकप्रकाशमात्कारं गच्छति तद्वत्। 'जायेव पत्ये'। द्वितीयार्थे चतुर्थी। पतिम्। 'उशती' कामयमाना 'सुवासाः' निर्विशङ्कं परया प्रीत्या युक्ता गच्छति तद्वत्। किञ्च 'हस्रेव' यथा हसनशीला स्वदन्तान्। 'नि रिणीते'। रिणातिर्गतिकर्मा। निः प्रकर्षे। अन्तर्णीतण्यर्थश्चायम्। प्रकर्षेण गमयति प्रकाशयति ज्ञापयतीत्यर्थः। एवमुषा निरिणीते। किम्? 'अप्सः' रूपं कृत्स्नस्य जगतः।

गर्तारोहिणीति ताच्छील्ये क्विप् अन्येभ्योऽपि* दृश्यते [३।२।१७८] इति। गर्तारोहिणीति भाष्ये ताच्छीलिकेनार्थप्रदर्शनात्। 'दाक्षिणाजी' दक्षिणां दिशं देशं वा अजिता, गता, जाता वा तत्र दक्षिणाजी, तस्यापत्यं स्त्री दाक्षिणाजी। दक्षिणेन वा कितवानां गच्छतीति। गर्तः सभास्थाणुरित्यर्थकथनम्। अक्ष-निवपनपीठः। सभास्थानमिति पाठान्तरम्। सभा च द्यूतसभा कितवस्थानम्। गृणातेरिति निर्वचनम्। सत्यसङ्गर इति धात्वर्थोपपत्तिवचनम्। सत्यं हि तत्र संगीर्यते। कथम्? न पुनर्देविष्यामीति †मातृहस्तग्रहणादिना कृतशपथोऽपि व्यसनेनैवाकृष्यमाणो गीत्या शपथं खादयित्वा दीव्यत्येव कितवः। सङ्गर इत्यन्ये पठन्ति। सङ्गीर्यन्ते हि तत्र सत्यमनृतेनानेकविधेन। तं गर्तं तत्र यापुत्रापतिका सारोहति। दक्षिणापथे किलैष क्वचिद्देशधर्मः। कितवानां दक्षिणत आस्फारे तिष्ठति। 'तामक्षैराघ्नन्ति सा रिक्थं लभते' पतिबन्धुभ्यः। यो वा तां प्रथममा-हन्ति स वैनां गृह्णाति। सा च धनं लभत इति।

अभ्रातेव—The brother used to find a suitable match for the sister. Maidens deprived of their brothers had to find husbands for themselves. Naturally, they were referred to as bold and forward. *Cf.* अभ्रातरो न योषणो व्यन्तः forward like young women without brothers iv. 5. 5. ऋतश्छन्दसि ५।४।१५८ इति समासान्ताभावः।

गर्तारुक्—note that रुह् changes its final to *k*.

जायेव पत्य उशती सुवासाः—RV. iv. 3. 2, x. 71. 4, x. 91. 13.

हस्रा—a laughing woman. Pischel thinks it means a courtesan. In class. Skt. we have स्मेर but not हस्र. Should we say: रविषी हस्रादीनां छन्दस्युपसंख्यानम्?

निरिणीते—नि-री A to unveil, discover.

वक्षः—the stem is वक्षस् *n*. It means 'the front part of the body', the breast. *Cf.* RV. v. 80. 6: एषा प्रतीची दुहिता दिवो नॄन् योषेव

---

* दृश्यते—Svarup who also gives the reference as iii. 2. 75 which is wrong.

† मातृहस्तग्रहणादिना Svarup.

अस्रा नि रिणीते अप्सः । व्यूर्ण्वती दाशुषे वार्याणि पुनर्ज्योतिर्युवतिः पूर्वथाकः ॥ She, the daughter of Heaven, comes towards men, like a radiant maiden, she exposes her breast; disclosing choice gifts to the pious man, the maiden has again made light as of old.

8

स्वसा स्वस्रे ज्यायस्यै योनिमारै-
गपैत्यस्याः प्रतिचक्ष्येव ।
व्युच्छन्ती रश्मिभिः सूर्यस्या-
ञ्ज्यङ्क्ते समनगाइव व्राः ॥८॥

स्वसा । स्वस्रे । ज्यायस्यै । योनिम् । अरैक् ।
अप । एति । अस्याः । प्रतिचक्ष्यऽइव ।
विऽउच्छन्ती । रश्मिऽभिः । सूर्यस्य ।
अञ्जि । अङ्क्ते । समनगाःऽइव । व्राः ।

The sister [*Night*] (*svásā*) has quitted (*āraik*) her place (*yónim*) for her elder sister (*jyā'yasyai svásre*); she departs (*ápaiti*) like one who is to appear again (*praticákṣyā iva*). Shining forth (*vyucchántī*) with sun-beams (*raśmibhiḥ Sū'ryasya*) she decks herself with (*aṅkte*) gems (*añji*), like women trooping to the festival (*samanagā'ḥ iva vrā'ḥ*).

वेङ्कटः । 'स्वसा' रात्रिः 'ज्यायस्यै' ज्येष्ठायै 'स्वस्रे' उषसे 'योनिम्' स्थानम् 'आरैक्' अरिचत् । 'अस्याः' तामुषसं 'प्रतिचक्ष्य इव' दृष्ट्वेव रात्रिः 'अपैति' अपगच्छति । तस्याः सकाशादिति वा । यथा श्वशुरं दृष्ट्वा स्नुषापगच्छति, एवम् । सेयम् 'सूर्यस्य रश्मिभिः व्युच्छन्ती' सूर्यतेजोभिः सह प्रादुर्भवन्ती 'अञ्जि' अञ्जनसाधनं तेजः आत्मनि 'अङ्क्ते' यथा युद्धं गच्छन्तः 'व्राः' वृता आभरणैः ।

सायणः । एकस्मादेवान्तरिक्षादुत्पन्नत्वात् परस्परं स्वसृभावः, *तथाप्यह्नः प्राथम्यात् तेजस्वित्वाच्च ज्यायस्त्वम् । स्वयमेव सरतीति वा स्वसा रात्रिः स्वस्रे ज्यायसे उत्कृष्टायै ज्येष्ठायै योनिम् उत्पत्तिस्थानम् अपररात्ररूपम् अरैक्

* Should we read तथाप्यह्नः ?

अरिचत् प्रादात् प्ररेचयतीत्यर्थः। तथा च पूर्वमाम्नातम्—रात्र्युषसे योनिमारैक् [१।११३।१] इति। दृत्त्वा च अस्याः अल्पकाया उषसः प्रतिचक्ष्येव ज्ञापयित्वेव अपेति स्वयमपसृत्यैव गच्छति। ज्यायस्यामागतायां तस्यै स्वस्थानं दत्त्वा स्वयं तत्सन्निधौ स्थातुमनुचितमिति विज्ञायैवापगच्छतीति भावः। एवमुत्पन्नैषा सूर्यस्य रश्मिभिः व्युच्छन्ती तमो विवासयन्ती। अञ्जि व्यक्तं तेजः। यद्वा। अञ्जि व्यक्तं जगत्। अङ्क्ते अनक्ति प्रकाशयति। किमिव? समनगाः इव। सम्यगननहेतव आपः समनाः। ता गच्छन्तीति समनगा विद्युतः। व्राः व्राताः। विद्युत्सङ्घा इव।* यद्वा सम्यगननाय गच्छन्तीति समनगाः सूर्यरश्मयः। त इव व्राः व्राताः सङ्घीभूताः। ते यथाञ्जते जगत् प्रकाशयन्ति तथेत्यर्थः। व्रात इत्यत्र तकारलोपश्छान्दसः॥८॥

आरैक्—s-aor. 3. s. of रिच् to leave, Skt. *riṇakti*, Lat. *linquit* leaves, Gk. *elipe* (Skt. *aricat*) left. Eng. *lend*. The augment is sometimes lengthened before *n*, *y*, *v* and *r*; *e. g.*, आनट्, आयुनक् (beside अयुनक्), आवृणक्, आवः, आरिणक्, आरैक्.[1] RP. ii. 75ff.

प्रतिचक्ष्येव—Sāyaṇa, following the Pada-text regards the first word as the gerundive प्रतिचक्ष्य (having made known), but प्रतिचक्ष्या occurs in i. 113. 11: अस्माभिरू नु प्रतिचक्ष्याभूत् (S. प्रकर्षेण द्रष्टव्या जाता) she has now become visible to us. So प्रतिचक्ष्येव may mean here 'as if to become visible again' (नात्यन्तायापगच्छति, परं पुनरागमय एव)। प्रतिचक्ष्य occurs in ii. 24. 6-7 and is explained by S. as दृष्ट्वा. प्रतिचक्षण occurs in the well-known stanza: रूपंरूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय। इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश॥ RV. vi. 47. 18, he has fitted himself to every form, this true form of his is to be looked on. Indra by his magic powers moves about in many forms, for ten hundred bay steeds of his are yoked.

---

* अनमनगमनेति [२।२।६७] गमेर्डिट्। विद्युतः° [६।४।४१] इत्यात्वम्। छन्दसर-पदप्रकृतिस्वरत्वम्। added here in some MSS.

[1] For formation see notes on अश्रेत् st. 12.

अञ्जि—neut. ornament. *Cf.* i. 113. 14 अञ्जिभिर्दिव आतास्वद्यौत् "in the sky's framework she has shone forth with gems."

अङ्क्ते—anoints himself, अनक्ति anoints. *Cf.* viii. 29. 1: बभ्रुरेको विषुणः सूनरो युवा । अञ्ज्यङ्क्ते हिरण्ययम् ॥

समनगाः—The exact meaning of the word समन is a subject of controversy. It is best to derive the word from *sam* with the secondary suffix *-ana* or from *sam* and *ana*, where men meet together, festival, fair.

व्राः—*Nir.* (v. 3) explains व्राः (RV. iv. 1. 16) as व्रात्याः प्रैषाः. S. says: तकारलोपश्छान्दसः । यद्वा व्रियन्त इति व्राः ; घञर्थे कविधानम् । Geldner translates 'decoy maidens' (*Lockmädchen*).

9

आसां पूर्वासामहसु स्वसॄणा-
मपरा पूर्वामभ्येति पश्चात् ।
ताः प्रत्नवन्नव्यसीर्नूनमस्मे
रेवदुच्छन्तु सुदिना उषासः ॥८॥

आसाम् । पूर्वासाम् । अहऽसु । स्वसॄणाम् ।
अपरा । पूर्वाम् । अभि । एति । पश्चात् ।
ताः । प्रत्नऽवत् । नव्यसीः । नूनम् । अस्मे इति ।
रेवत् । उच्छन्तु । सुऽदिनाः । उषसः ॥९॥

On the days (*áhasu*) of these earlier sisters (*āsā'm pū'rvāsām svásṛṇām*), the latter (*áparā*) follows (*abhyêti*) after (*paścā't*) the earlier (*pū'rvām*). May these (*tā'ḥ*) newer (*návyasīḥ*) Dawns (*Uṣā'saḥ*) now (*nūnám*) shine (*ucchantu*) riches [treasures] (*revát*) upon us (*asmé*) and brilliant days (*sudinā*).

वेङ्कटः । 'आसाम्' उषसाम् 'पूर्वासाम्' पूर्वकालानाम् 'अपरा' उत्तरोषाः 'पूर्वाम्' पूर्वं गताम् 'अहसु' 'पश्चात्' 'अभ्येति' अनुक्रमेण गतेष्वहस्सु गमनम् । 'ताः' 'प्रत्नवत्' पुराणा इव 'नूनम् नव्यसीः' इदानीं नवतराः 'अस्मे' अस्माकम् 'रेवत्' धनयुक्तम् 'उच्छन्तु' व्युच्छन्तु 'सुदिनाः' शोभनदिवसाः प्रकाशजननात् सहगमनाद्वा स्वसार 'उषसः' ।

सायणः। स्वसॄणां परस्परं स्वसृभावमापन्नानां स्वयं सरन्तीनां वा पूर्वासाम् पुरातनीनाम् आसाम् *उषसाम् मध्ये अहसु अहःसु† प्रतिदिनम् अपरा अन्या अद्यतन्युषाः पूर्वाम् अतीतदिवससम्बन्धिनीम् उषसम् पश्चात् अनुसृत्य[1] अभ्येति अभिमुखं गच्छति, अव्यवधानेन गच्छतीत्यर्थः। सर्वेष्वहःस्वेवमेवाभ्येति। नव्यसीः नवीयस्यो नवतरा आगामिन्यः‡ ताः उषासः उषसोऽपि [2]नूनम् निश्चयम् प्रत्नवत् पुरातन्य इव सुदिनाः शोभनकर्मानुष्ठानसाधनदिवसाः शोभनदिनमुखा वा सत्यः अस्मे अस्माकं रेवत् बहुधनविशिष्टं यथा भवति तथा उच्छन्तु प्रकाशयन्तु। [3]पूर्वतन्यो यथौच्छंस्तथागामिन्योऽप्युच्छन्त्वित्यर्थः।

अहसु—occurs only here in RV. अहभ्यः occurs twice and अहभिः several times. All these are normal forms of the *an*-stem like युवसु, युवभ्यः and युवभिः. अहोभिः is found in RV. x. 14. 9. In class. Skt. the forms will be अहःसु, अहोभ्याम् and अहोभिः acc. to अहन् viii. 2. 68.

स्वसॄणाम्—स्वस्राम् occurs in जामिः सिन्धूनां भ्रातेव स्वस्राम् RV. i. 65. 7. Skt. *svasā'*, Lat. *soror* for **swcsōr*, Gk. *héōr* for *swesōr* 'first cousin, Eng. *sister*. The word goes back probably to *sva* (I. E. **swe*) self, own.

नव्यसीः—class. नवीयसीः. The original superlative suffix was *-yas* (I. E.*-yes*) which was added immediately after the root. "The addition of *yas* (I. E. *yes*) to certain forms ending in ई gave rise to the suffix *-ī-yas* which became highly productive in Sanskrit." With -यस् we have ज्यायस्, प्रेयस्, वस्यस्, श्रेयस्, सन्यस् and

---

*४ इदानीं वर्तमानानां added in some MSS.

† अन्यलोपश्छान्दसः added in some MSS.

[1] In the later language पश्चात् governs the gen., hence अनुसृत्य is supplied by S.

‡ नवशब्दादीयसुनि ईकारलोपश्छान्दसः added in some MSS.

[2] नूनम् never means निश्चयम् in RV.

[3] S. sometimes uses this ungrammatical form.

क्षोदस्. With both -यस् and -ईयस् we have भव्यस्, भवीयस्, नव्यस्, नवीयस्, पन्यस्, पनीयस्, सह्यस्, सहीयस् etc., *e. g.*, प्र तव्यसीं नव्यसीं धीतिमग्नये वाचो मतिं सहसः सूनवे भरे RV. i. 143. 1, नयन्नृतस्य प्रशिषो नवीयसीः पतिर्जनीनामुप याति निष्कृतम् ix. 86. 32, he, guiding to the newest rules of the Holy Law, comes on, husband of his wives, to the meeting place.

उषासः—This is the older form and used for the sake of the metre, because in a Triṣṭubh stanza the 10th syll. is long. अमीतवर्णा उषसश्चरन्ति RV. iv. 51. 9, of unchanged colour, the Dawns move on.

10

प्र बोधयोषः पृणतो मघो-	प्र । बोधय । उषः । पृणतः । मघोनि ।
न्यबुध्यमानाः पणयः ससन्तु ।	अबुध्यमानाः । पणयः । ससन्तु ।
रेवदुच्छ मघवद्भ्यो मघोनि	रेवत् । उच्छ । मघवत्ऽभ्यः । मघोनि ।
रेवत्स्तोत्रे सूनृते जारयन्ती ॥१०॥	रेवत् । स्तोत्रे । सूनृते । जरयन्ती ।

Awaken *(prá bodhaya)*, O beautiful *(maghoni)* Dawn *(Uṣaḥ)* the liberal *(pṛṇatáḥ)*; let the niggards *(paṇáyaḥ)* sleep on *(sasantu)* without awaking *(ábudhyamānāḥ)*. Shine *(uccha)* rich treasure *(revát)* on the bountiful ones *(maghávadbhyaḥ)*, O bountiful one *(maghoni)*, rich treasure *(revát)* on the singer *(stotré)*, O beauteous one *(sūnṛte)*, praising [him] *(jāráyanti)*.

वेङ्कटः । 'प्रबोधय' प्रयच्छत 'उषः' 'पृणतः' उदारान् 'मघोनि' धनवति 'अबुध्यमानाः' 'पणयः' कदर्याः 'ससन्तु' स्वपन्तु । 'रेवत्' धनयुक्तम् 'उच्छ' व्युच्छ 'मघवद्भ्यः' धनवद्भ्यः 'मघोनि' । 'रेवत्' 'स्तोत्रे' मह्यम् 'सूनृते' 'जारयन्ती' स्तोत्रं कारयन्ती । जरतिः स्तुतिकर्मेति ।

सायणः। हे मघोनि मघवति अस्मभ्यं दातव्यैर्बहुभिर्धनैस्तद्वति उषः हे उषोदेवि पृणतः हविष्प्रदानस्मान् यजमानान् प्रबोधय प्रज्ञापय प्रतिबुद्धान् कुरु। किञ्च पणयः व्ययासहिष्णवो वणिजः। 'पणिर्वणिग् भवति' इति यास्कः [नि० २।१७]। पणय इव लुब्धका अबुध्यमानाः यागादीनकुर्वाणा अदानशीला अस्मच्छत्रवः ससन्तु स्वपन्तु दीर्घनिद्रा[1] भवन्तु म्रियन्तामित्यर्थः। तथा च मन्त्रान्तरम्—ससन्तु त्या अरातयो बोधन्तु शूर रातयः [ऋ० सं० १।२९।४] इति। किञ्च, हे मघोनि अस्मद्दत्तहविर्भिस्तद्वति हे उषः मघवद्भ्यः हविर्लक्षणान्नवद्भ्यो यजमानेभ्यस्तेषामर्थं[2] रेवत् धनवत् समृद्धिमत्* उच्छ विभाहि। किञ्च हे सूनृते सुष्ठु मनुष्याणां नेत्रि देवि जरयन्ती सर्वप्राणिनः क्षपयन्ती त्वं स्तोत्रे स्तुतिकर्त्रे यजमानाय तदर्थं रेवत् धनवत् समृद्ध्यर्थम् उच्छेति शेषः† ॥१०॥

जारयन्ती—We find Guṇa as well as Vṛddhi in the case of जॄ to waste away, श्रु to hear and स्रु to flow in RV., but at the time of the Padapāṭha the forms with Guṇa were regarded as the normal forms. *Cf.* जरयन्ती वृजनं पद्वदीयत उत्पातयति पक्षिणः i. 48. 5, "the host of footed things she stirs, awaking them. And birds she causes to fly up" (Macdonell). In class. Skt. the forms are जरयन्ती, श्रावयन्ती and स्रावयन्ती. Acc. to RP. viii. 36, the eighth syllable in Triṣṭubh and Jagatī should be lengthened when a short syllable or नः follows: एकादशिद्वादशिनोर्लघावष्टममक्षरम्। उदयी संहिताकाले नःकारे च गुरावपि ॥ RP. ix. 48 mentions सूनृते जारयन्ती.

सूनृते—The word सूनृता is accented on the syll. preceding the suffix and this shows that *-tal* has been added here to सूनृ (*cf.*

---

[1] Let them sleep the sleep that knows no waking.

[2] We generally say तदर्थम् but तेषामर्थे.

* रयेर्मतौ बहुलम् [६।१।३७।६] इति सम्प्रसारणम्। रेशब्दाच्च [७।१।१।६ का] इति मतुप उदात्तत्वम्। added in some MSS.

† अमीकृवृक्षसुरञ्जोऽमन्ताच [ग. सू.] इति मित्त्वात् मितां ह्रस्वः [६।४।९२] इति ह्रस्वत्वम्। added in some MSS.

सूनर, Av. *hunara*; *hunaretāt*) and means the state or quality of a good man, a man of generosity. As an adj. सूनृत means noble, generous, beautiful. See *Mañjūṣā*, Vol. v., no. i, pp. 19-20.

11

अवेयमश्वैद्युवतिः पुरस्ता-	अव । इयम् । अश्वैत् । युवतिः । पुरस्तात् ।
द्युङ्क्ते गवामरुणानामनीकम् ।	युङ्क्ते । गवाम् । अरुणानाम् । अनीकम् ।
वि नूनमुच्छादसति प्र केतु-	वि । नूनम् । उच्छात् । असति । प्र । केतुः ।
र्गृहंगृहमुप तिष्ठाते अग्निः ॥११॥	गृहम्ऽगृहम् । उप । तिष्ठाते । अग्निः ।

In the East (*purástāt*) this young maiden (*iyám yuvatíḥ*) has shone down (*áva aśvait*); she yokes (*yuṅkté*) the array (*ánīkam*) of ruddy kine (*aruṇā'nām gávām*). May she shine (*ucchāt*) forth (*ví*) now (*nūnám*); may her banner (*ketúḥ*) be (*ásati*) in the front (*prá*). May fire (*Agníḥ*) be present (*úpa tiṣṭhāte*) in every house (*gṛhámgṛham*).

वेङ्कटः । 'इयम्' 'अव' अधः 'अश्वैत्'[1] द्योतते 'युवतिः' 'पुरस्तात्' पूर्वस्यां दिशि, 'युङ्क्ते' च 'गवाम्' अश्वानाम् 'अरुणानाम्' अरुणवर्णानाम् 'अनीकम्' समूहं रथे । 'वि उच्छात्' सैवेयं व्युष्टाभूत् । 'नूनम्' सम्प्रति 'प्र' 'असति' प्रभवति च 'केतुः' प्रज्ञानम् । अथ 'गृहंगृहम्' अनुगृहम् 'अग्निः' 'उपतिष्ठाते' स्वाहाप्रतिग्रहार्थं सङ्गच्छते ।

सायणः । इयम् उषाः युवतिः यौवनोपेतयोषित्स्थानीया । यद्वा । सर्वेषु भावेषु मिश्रयन्ती पुरस्तात् पूर्वस्यां दिशि अव अश्वैत् 'अत्यर्थमागच्छति वर्धते वा * । अत्र 'अव'शब्दो विनिग्रहार्थीयः, 'न्यवेति विनिग्रहार्थीयौ' इति

---

[1] Veṅkaṭa's explanation is to be accepted.

* Here some MSS. add: श्वयतेर्गत्यर्थस्य लुङि सिपि इडाविडभावे रूपम् ।

यास्केनोक्तत्वात्[1] [नि० १।३]। तत् कथमवगम्यत इति तत्राह—यत इयम् अरुणानाम् अरुणवर्णानां गवां प्रसिद्धानाम् एतन्नामकानामश्वानां वा अनीकं समूहं युङ्क्ते रथे योजयति। अरुण्यो गाव उषसां प्रतिनियतत्वात्*। तथा च निरुक्तम्—अरुण्यो गाव उषसाम्†। श्यावाः सवितुः। [निघ० १।१५] इति। यथा लोके वाहनसन्नाहं दृष्ट्वा प्रयाणमनुमीयते तथात्राप्यरुणरश्मीनामश्वानां दर्शनादुषा आगच्छतीत्यध्यवसीयते। यद्वा। अरुणानां रश्मीनां समूहं युङ्क्ते। तथा नूनम् निश्चितमेषा वि उच्छात् तमो विवर्जयिष्यति। यत इयं गा युनक्ति अत एव कारणात् ‡यथा लोके सन्नाहं दृष्ट्वा जयोऽनुमीयते तथात्रापीत्यर्थः। तादृशी सा अस्रति असत्प्राये नीरूपेऽन्तरिक्षे, तिरोधायकत्वादशोभने तमसि वा केतुः केतुस्थानीया ज्ञापयित्री प्रकर्षेण विविधं भासत इति शेषः। उपसर्ग-वशाद्योग्यक्रियाध्याहारः। यद्वा। अस्रति तमोरूपेऽन्धकारे प्रकेतुः प्रकर्षेण ज्ञापयित्री सती नूनं व्युच्छादिति पूर्वत्रान्वयः। तस्मिन् काले अग्निः आहवनीयादिरूपः गृहंगृहम् सर्वयजमानगृहम् अग्निहोत्राद्यर्थम् उप तिष्ठाति उपतिष्ठते दीप्यत इत्यर्थः§ ॥११॥

अश्वैत्—3. s. s-aor. of श्वित् be bright. The root-aor. form अश्वितन् and reduplicated aor. अशिश्वितत् are also met with. टु ओ श्वि गतिवृद्ध्योः। लुङि अङ्चङोर्विकल्पितत्वात् [३।१।५८, ४९] च्लेः सिच् [३।१।४४]। आगमानुशासनस्यानित्यत्वादिडभावः। अनिडादित्वात् ह्म्यन्तक्षणेति [७।२।५] वृद्धिप्रतिषेधा-

---

[1] See *Upasarga and other Technical Terms* by K. C. Chatterjee.

* This is dropped in most MSS. and the reading is vicious, but something like this would appear to be wanting here. Should we read अरुण्यो गाव उषसामश्वा इत्युक्तत्वात् ?

† Printed *Nighaṇṭu* has उषसः, but उषसाम् is found in BD.

‡ यथा लोकेऽश्वसन्नाहं दृष्टोदयोऽनुमीयते is the generally accepted reading.

§ A few MSS. read उपतिष्ठाति उपतिष्ठते संगच्छते। आडागमः [३।४।९४]। उपाद्देवपूजासंगतिकरणेत्यात्मनेपदम् [१।३।२५ भाष्य]।

भाव:। बहुलं छन्दसि [७।३।९७] इतीडागमाभावः। स्कोः संयोगाद्योः° [८।२।२९] इति सलोपः। S. under. i. 92. 12. Under ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा व्यश्वैत् 1. 113. 15 S. says: टु ओ श्वि गतिवृद्ध्योः। लुङि बहुलं छन्दसि [२।४।७३] इति विकरणस्य लुक्। गुणे कृते व्यत्ययेनैत्वम्। We should rather say: श्विता वर्णे [धा° १।७२८]। णुङ्यो लुङि [१।३।९१] इति पाक्षिकं परस्मैपदम्। च्लि लुङि [३।१।४३]। च्लेः सिच् [३।१।४४]। सर्वे विधयश्छन्दसि विकल्प्यन्ते इति पुषादिद्युतादलृदितः परस्मैपदेषु [३।१।५५] इति च्लेरङ् न भवति। अनित्यमागमशासनम् इति आर्धधातुकस्येड्वलादेः [७।२।३५] इतीडभावः। वदव्रजहलन्तस्याचः [७।२।३] इति वृद्धिः। बहुलं छन्दसि [७।३।९७] इति अस्तिसिचोऽपृक्ते [७।३।९६] इति सूत्रेण ईड् न भवति। स्कोः संयोगाद्योरन्ते च [८।२।२९] इति सलोपः। हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् [६।१।६८] इति विभक्तेर्लोपः।

उच्छात्—3. s. subj. of वस् to shine.

असति—3. s. subj. of अस् to be. 'तिङ्ङतिङः' इति निघाताभावः।

उपतिष्ठाते—3. s. subj. A. सङ्गतिकरण आत्मनेपदम्।

12

उत्ते वयश्चिद्वसतेरपप्त-	उत् । ते । वयः । चित् । वसतेः । अपप्तन् ।
न्नरश्च ये पितुभाजो व्युष्टौ।	नरः । च । ये । पितुऽभाजः । विऽउष्टौ ।
अमा सते वहसि भूरि वाम-	अमा । सते । वहसि । भूरि । वामम् ।
मुषो देवि दाशुषे मर्त्याय ॥१२॥	उषः । देवि । दाशुषे । मर्त्याय ॥१२॥

Even the birds (*vàyaḥ cit*) have flown up (*ùt apaptan*) from their nest (*vasatèḥ*), and the men (*nàraḥ ca*) who earn their living (*yè pitubhā'jaḥ*) (have risen) at thy dawning (*te vyùṣṭau*). To him that is at home (*amā' satè*), the pious mortal (*dāśùṣe màrtyāya*), thou carriest (*vahasi*) much wealth (*bhū'ri vāmàm*), O Goddess Dawn (*U'ṣaḥ devi*).

वेङ्कटः। 'ते' तव 'व्युष्टौ' 'वयश्चित्' पक्षिणोऽपि 'वसतेः' उदपप्तन्। 'नरः च' मनुष्याश्च 'ये' 'पितुभाजः' अन्नस्य भाजकाः। 'अमा' गृहे 'सते' वसते 'दाशुषे' आचितृभ्यः प्रयच्छते मनुष्याय त्वम् 'उषो देवि' 'भूरि' बहु 'वामम्' धनं 'वहसि'।

सायणः। ते तव व्युष्टौ सत्यां वयश्चित् गमनवन्तः पक्षिणोऽपि। *चिदित्येषोऽपिशब्दार्थे निपातानामनेकार्थत्वात्। 'उच्चावचेष्वर्थेषु निपतन्ति' [नि० १।४] इति यास्केनोक्तत्वात्। वसतेः निवासस्थानान्नीडादेः उत् ऊर्ध्वम् अपप्तन् पतन्ति। पूर्ववाक्ये 'गृहंगृहमुप तिष्ठाते अग्निः' इत्युक्तत्वात्तदपेक्षयापि-शब्दः†। किञ्च, नरश्च मनुष्याश्च [1]पितुभाजः अन्नवन्तोऽन्नार्थिनः कृषि-वाणिज्यादिकर्तारः स्वस्वव्यापारार्थम् उत् उन्मुखा अपप्तन् गच्छन्ति। तथा च मन्त्रान्तरम्—पद्वदीयत उत्पातयति पक्षिणः [ऋ० सं० १।४८।५] इति। एवं ‡व्युष्टौ सत्यां हे देवि देवनशीले उषः देवते अमा गृहे देवयजनाख्ये सति तिष्ठते यजमानाय। तदर्थम्। अमेति गृहनाम अमा दमे [निघ० ३।४] इति तन्नामसु पठितत्वात्। यद्वा अमा सह, हूयमानेनाग्निना सह, निवसते यजमानाय, अमा वसेताम् इत्यादौ सहार्थे प्रयोगात्। मर्त्याय मनुष्याय दाशुषे हविर्दत्तवते यजमानाय भूरि वामम् बहु शोभनं धनं वहसि प्रापयसि§ ॥१२॥

अपप्तन्—3. pl. reduplicated aorist of पत् (Lat. *peto* I fly). *a-pa-pat-an* > *a-pa-pt-an*. *Cf.* अवोचत्.

नरः—see p. 511. Yāska says: नरा मनुष्या नृत्यन्ति कर्मसु.

पितुभाजः—see under i. 116. 8.

अमा—is read in the *Nigh.* (iii. 5) in the list of गृहनाम, and is explained as गृहे in *Nir.* xi. 46. It is an instrumental adverb with adverbial shifting of accent and means 'at home'. विश्वेषां

* चिदित्येष अपि० M. The mistake is copied by P. and others.

† Some MSS. add पततेश्चाङ्ली लुङि लृदित्त्वादङि परतः पतः पुम् [७।४।१९] इति पुमागमः.

[1] This stanza occurs again as vi. 64. 6. There S. explains पितुभाजः as हविषां सम्भक्तारः, अन्नस्योपार्जका वा, 'पितुः' इत्यन्ननामसु पाठात्, and अमा as समीपे.

‡ व्युष्टौ is dropped in all MSS., but एवं सत्याम् is ungrammatical.

§ भूरि प्रभूतं वामं वननीयं धनकनकादिरूपं वहसि ददासि *v. l.*

वामञ्चरताममाभूत् RV. ii. 38. 6, the love of all wanderers went homewards. *Cf.* अमात्य (originally, living in the same house, relative), अमावस्या (because the moon lives in the house of the sun on that day).

वामम्—वाम is read in the *Nighaṇṭu* in the list of प्रशस्यनामसु and is explained by Yāska as वननीय. The word is derived from वन् desire, love, win, conquer. Av. *vanaiti*, *vanōiti* conquers. वाञ्छ is formed from the root with the vikaraṇa छ (-*sko). As a neut. noun it means 'wealth', as an adj. dear, lovely. Skt. *vanas* desire, Lat. *Venus*.

13

अस्तोढ्वं स्तोम्या ब्रह्मणा मे-	अस्तोढ्वम् । स्तोम्याः । ब्रह्मणा । मे ।
ऽवीवृधध्वमुशतीरुषासः ।	अवीवृधध्वम् । उशतीः । उषसः ।
युष्माकं देवीरवसा सनेम	युष्माकम् । देवीः । अवसा । सनेम ।
सहस्रिणं च शतिनं च वाजम् ॥१२॥	सहस्रिणम् । च । शतिनम् । च । वाजम् ॥

Ye have been lauded (*ástoḍhvaṁ*) by my prayer (*me bráhmaṇā*), ye praiseworthy ones (*stomyāḥ*), ye have been willingly (*uśatīḥ*) exalted (*ávīvṛdhadhvam*), O Dawns (*Uṣāsaḥ*). By your favour (*yuṣmā'kam ávasā*), O Goddesses (*devīḥ*), we would gain (*sanema*) a hundredfold (*śatínam*) and a thousandfold (*sahasriṇam*) rewards (*vā'jam*).

वेङ्कटः । 'स्तोम्याः' हे स्तोमार्हा उषसः यूयं 'मे' मम 'ब्रह्मणा' अनेन स्तोत्रेण 'अस्तोढ्वम्' स्तुता भवत । 'अवीवृधध्वम्' वर्धयतास्मान् । 'उशतीः' कामयमानाः 'उषसः' 'देवीः' देव्यः 'युष्माकम्' 'अवसा' पालनेन 'सनेम' सम्भजेमहि 'सहस्रिणम्' सहस्रसंख्याकम्.'शतिनम्' शतसंख्याकं 'च' 'वाजम्' अन्नम् ।

सायणः। एवं [1]सूक्तद्वयोक्तरीत्या बहुधा स्तुत्वा तां च स्तुतिमनया निवेद्य* स्वाभीष्टं प्रार्थयते—हे स्तोम्याः। स्तोमः स्तोत्रम्। तदर्हन्तीति स्तोम्याः स्तुत्यर्हा उषसः। यतो यूयं तादृश्यः अतः मे मत्स्वभूतेन ब्रह्मणा [1]सूक्तद्वयगत-मन्त्ररूपेण स्तोत्रेण अस्तोढ्वम् स्तुता भवत†। किञ्च, हे उषासः उषसः उशतीः स्तोतॄनस्मानस्मत्समृद्धिं वा कामयमाना यूयम् अवीवृधध्वम् अस्मान् प्रवर्धयत। किञ्च, हे देवीः देव्यो देवनशीलाः युष्माकम् अवसा युष्मत्सम्बन्धिना रक्षणेन वयं सहस्रिणम् सहस्रसंख्याकमभीष्टं धनं सनेम लभेमहि। तथा शतिनम् च वाजम् शतसंख्याकमपरिमितं धनं सनेम। युष्मत्कृतेन शतसहस्रपरिमित-धनादिरूपरक्षणेन वयमप्यर्थिभ्यः शतसहस्रपरिमितस्य धनस्य सनितारो भवेमेत्यर्थः ॥१३॥

अस्तोढ्वम्—2. pl. Ā. (pass.) of the aorist of स्तु.

अवीवृधध्वम्—2. pl. Ā (pass.) of the reduplicated aor. of the caus. of वृध्. Evidently लोडर्थे लुङ् acc. to S.

उशतीः—desiring, willing; willing you will be exalted, *i. e.*, you will be willingly exalted.

सनेम—1. pl. a-aor. opt. of सन् gain.

सहस्रिणं च शतिनं च—*Cf.* सहस्रिणं शतिनं शूशुवांसम् RV. i. 64. 15, a hundred, thousandfold ever increasing.

---

[1] This hymn and the previous one.

* निवेदयित्वा M. P.

† Some MSS. add कर्मणि लुङि 'स्वः सीध्वम्°' [८।३।७८] इति धकारस्य ढत्वम्.

VIṢṆU

Introductory Note

Viṣṇu, one of the two highest divinities of modern Hinduism, has only five entire hymns addressed to him in the *Ṛgveda*, though his name is mentioned about a hundred times there. But the importance of a deity cannot always be measured by the number of hymns bestowed on him, and there is hardly any doubt that even in the *Ṛgveda* Viṣṇu is a great God. And in modern times every Brahman begins his religious rites with the formula: तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ RV. i. 22. 20, 'the wealthy patrons always behold the highest steps of Viṣṇu, like an eye (*i.e.*, the sun) stretched across the heaven'.

The fact that the epithets *urugāya* and *urukrama* are frequently applied to Viṣṇu and that his three steps are mentioned over and over again indicates that Viṣṇu is a manifestation of the Sun-god. Thus the *Bṛhaddevatā* (ii. 64) says:

त्रीण्यधि भान्ति रजांस्यस्य यत्पदानि तु तेजसा ।

तेन मेधातिथिः प्राह विष्णुमेनं त्रिविक्रमम् ॥

'Since the three regions shine with lustre as his footsteps, Medhātithi regards him as Viṣṇu of the three strides.'

Yāska derives Viṣṇu from *viṣ* 'to pervade', *viś* 'to enter' and *vi-aś* 'to pervade'. अथ यद्विषितो भवति तद्विष्णुर्भवति, विष्णुर्विशतेर्वा व्यश्नोतेर्वा । [अथ यत् यदा विषितो व्याप्तोऽयमेव सूर्यो रश्मिभिर्भवति तत् तदा विष्णुर्भवति । व्यश्नोतेर्वा विपूर्वस्य व्याप्नोतेः । यदा रश्मिभिरतिशयेनायं व्याप्तो भवति, व्याप्नोति वा रश्मिभिरयं सर्वम्, तदा विष्णुरादित्यो भवति ।] The *Bṛhaddevatā* (ii. 72) merely echoes Yāska (*Nir*. xii. 19) when it says:

विष्णाते विंशतेर्वा स्याद् वेवेष्टेर्व्याप्तिकर्मणः ।

विष्णुर्निरुच्यते सूर्यः सर्वं सर्वान्तरश्च यः ॥

Bloomfield relying on SV. ii. 1034 यतो विष्णुर्विचक्रमे पृथिव्या अधि सानवि derived Viṣṇu from *vi* and *sānu* (*sun*) in the sense of through the back.

The main characteristic of Viṣṇu is his three steps.

The most well-known stanza containing a reference to the three steps of Viṣṇu runs thus:

इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्।
समूळ्हमस्य पांसुरे ॥ [ऋ० सं० १।२२।१७]

'Viṣṇu has strode over this [universe]. He has planted his foot thrice. The [world] is enveloped in his dusty [foot-step]'.

Yāska explains the stanzas thus in the Nirukta:

यदिदं किंच तद्विक्रमते विष्णुः। त्रिधा निधत्ते पदम्। त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवि इति शाकपूणिः। समारोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः। समूळ्हमस्य पांसुरे। प्यायनेऽन्तरिक्षे पदं न दृश्यते। अपि वोपमार्थे स्यात्। समूढमस्य पांसुल इव पदं न दृश्यते।

Thus acc. to Śākapūṇi, by the three steps of Viṣṇu is meant the triple manifestation of the God in the form of fire on earth, of lightning in the atmosphere and of the solar light in heaven. Acc. to Aurṇavābha, the three steps are the three positions of the sun at his rising (समारोहणे), his culmination (विष्णुपदे) and his setting (गयशिरसि). Thus Aurṇavābha identifies Viṣṇu with the Sun.

The repeated mention of the three steps of Viṣṇu gave rise to the legend of the Dwarf incarnation in later times. Already in the *Śatapatha Brāhmaṇa* we find that when the Asuras divided the earth after having worsted the gods, the latter *approached the former for a share* and the Asuras seeing that *Viṣṇu was a dwarf* gradually offered them *as much of the earth as Viṣṇu cauld lie upon*. (तेऽसुरा असूयन्त इवोचुः यावदेवैष विष्णुरभिशेते तावद्वो दद्म इति)।

The वराहावतार also has its germ in RV. i. 61. 7:

अस्येदु मातुः सवनेषु सद्यो महः पितुं पपिवाञ्चार्वन्ना ।
मुषायद्विष्णुः पचतं सहीयान् विध्यद्वराहं तिरो अद्रिमस्ता ॥

'In the soma libations to his mother he has forthwith drunk the potion of his great(father), his favourite food. Viṣṇu, the mightier, straightway stole the cooked mess. He (Indra) pierced the boar shooting through the mountain.'

विश्वेत्ता विष्णुराभरदुरुक्रमस्त्वेषितः ।
शतं महिषान् क्षीरपाकमोदनं वराहमिन्द्र एमुषम् ॥

'The far-striding Viṣṇu impelled by thee has brought forth all these things—a hundred buffaloes, food cooked with milk, the boar Emuṣa to Indra.' RV. viii. 77. 10.

The *Śatapatha Brāhmaṇa* describes how when Viṣṇu's head was cut off it became the sun (तस्यां छिन्नायां धनुरार्त्नी विष्फुरन्त्यौ विष्णोः शिरः प्रचिच्छिदतुः । तद् घृङ्ङिति पपात । तत् पतित्वासावादित्योऽभवत्) । Again in RV. i. 155. 6 we find: With four times ninety names Viṣṇu has set the pair in motion like a revolving wheel. (चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीँरवीविपत्) । This evidently refers to the solar year of 360 days, divided into four seasons. Viṣṇu's Sudarśana cakra and Kaustubha maṇi in later literature clearly refer to the Sun. Viṣṇu's vehicle Garuḍa is known as Garutmat and Suparṇa, terms which are applied to the sun-bird in RV. "Thus though Viṣṇu is no longer clearly connected with a natural phenomenon, the evidence appears to justify the inference that he was originally conceived as the sun, not in his general character, but as the personified swiftly-moving luminary, which with vast strides, traverses the whole universe" (Macdonell, *Vedic Mythology*, p. 39).

See Macdonell, *Vedic Mythology*, pp. 37-42. J.R.A.S. Vol. xxvii, pp. 165-189, *A Volume of studies on Indology presented to Kane*, pp. 95-111, Macdonell, *Vedic Reader* pp. 30 ff.

VIṢṆU

दीर्घतमा ऋषिः। त्रिष्टुप् छन्दः। विष्णुर्देवता।

i. 154

1

विष्णोर्नु कं वीर्याणि प्र वोचं	विष्णोः। नु। कम्। वीर्याणि। प्र। वोचम्।
यः पार्थिवानि विममे रजांसि।	यः। पार्थिवानि। विऽममे। रजांसि।
यो अस्कभायदुत्तरं सधस्थं	यः। अस्कभायत्। उत्ऽतरम्। सधऽस्थम्।
विचक्रमाणस्त्रेधोरुगायः ॥१॥	विऽचक्रमाणः। त्रेधा। उरुऽगायः ॥१॥

I will now (*nú kam*) proclaim (*prá vocam*) the heroic deeds (*vīryā̆ṇi*) of Viṣṇu (*Viṣṇoḥ*) who (*yáḥ*) has measured out (*vimamé*) the terrestrial (*pā'rthivāni*) regions (*rájāṁsi*), who (*yáḥ*) propped up (*áskabhāyat*) the upper (*úttaram*) gathering place (*sadhástham*), striding (*vicakramāṇáḥ*) triply (*tredhā'*), the wide-going one (*urugāyáḥ*).

सायणः। विष्णोर्नु कमिति षडृचं पञ्चदशं सूक्तं दैर्घतमसं त्रैष्टुभं वैष्णवम्। अत्रानुक्रमणिका—'विष्णोः षड् वैष्णवं हि'[1] इति। [2]अभिप्लवषडहेषूक्थ्येषु तृतीय-

---

[1] हिशब्दोपादानादिदमादिसूक्तत्रयं विष्णुदेवताकं बोध्यम्।

[2] "अभिप्लवषडहस्य मध्यगता उक्थ्ययागाश्च पूर्वम् (पृ: १७-१८) उक्ताः। उक्थ्यस्य सोमसंस्थाविशेषत्वेन तत्र त्रीणि सवनानि भवेयुः। तत्र तृतीयसवने सोमस्यातिरेकाभावेन सोमातिरेचनावसर इदमादिकं सूक्तत्रयमुपयोक्तव्यम्। स्तोमास्त्रिवृत्-पञ्चदश-सप्तदशैकविंश-त्रिणव-त्रयस्त्रिंशादयः साम्नां गानावसरे ऋचमतानामृचामावृत्त्या सम्पादितसंख्यया सम्पद्यन्ते। तत्र यस्मिन् क्रतौ यः स्तोमः साम्नातः प्राप्तस्तदपेक्षयोत्तरस्य स्तोमस्य निमित्तविशेषेण सामगानावसरे सामवेदविदां तत्स्तोत्रोपायाय मैत्रावरुणादिभिरपि ऋत्विग्भिः स्तोत्रे शस्त्रेऽधिका ऋचो वक्तव्या भवन्ति। तदिदमधिकवचनं स्तोमातिशंसनं नाम। तत्र स्तोमविशेषेणाधिकानां वक्तव्यानामृचामपि संख्या आश्वलायनेन श्रौतसूत्रे नियमिता:। यथा—'नित्यादधिकं

सवने स्तोमवृद्धावच्छावाकस्य स्तोमातिशंसनार्थमिदमादिसूक्तद्वयं विनियुक्तम्। स्तोमे वर्धमाने इति खण्डे सूत्रितम्—विष्णोर्नु कमिति सूक्ते परो मात्रयेत्यच्छावाकः [आ° श्रौ° ७।९।४] इति। [1]तथा तृतीयसवने सोमातिरेक उत्तरोत्तरसंस्थोपगन्तव्यातिरात्रात्, ततोऽप्यतिरिक्ते तदर्थमेव शस्त्रमुपजनयितव्यम्। तत्रैतदेव सूक्तम्। सोमातिरेके इति खण्डे सूत्रितम्—महाँ इन्द्रो नृवद् विष्णोर्नु कम् [आ° श्रौ° ६।७।६] इति। [2]आग्निमारुतशस्त्र आद्या विनियुक्ता। अथ यथेतम् इति खण्डे सूत्रितम्—विष्णोर्नु कं वीर्याणि प्र वोचं तन्तुं तन्वन् रजसो भानुमन्विहि [आ° श्रौ° ५।२०।६] इति।

सोमकारणात् पञ्च सप्तदशे नवैकविंशे द्वादश चतुर्विंशे पञ्चदश त्रिणवे • एकविंशतिं त्रयस्त्रिंशे द्वाविंशतं चतुश्चत्वारिंशे षट्त्रिंशतमष्टाचत्वारिंश एकाल्पनीयसीर्वैकाद्देश्वेकभूयसीर्वा इति। तत्राच्छावाकिनोक्तोक्थ्ये तु तृतीयसवने सोमातिशंसन एतत्सूक्तद्वयं वक्तव्यम्।"

[1] "सोमयागे प्रतिसवनं यावतां यागानामनुष्ठानं तावतां पर्याप्त एव सोमरसो निष्पादनीयो न न्यूनो नाप्यधिकः। न्यूनत्वेऽधिकत्वे वा प्रायश्चित्तीयता भवति। तत्र प्रातःसवने सोमाधिक्ये वैष्णवं शस्त्रं शंसनीयम्। तृतीयसवने यदि तत्रापेक्षितादधिको भवेत् तदा या सोमसंस्थानुष्ठातुं प्रारब्धा यस्यास्तृतीयसवनेऽयं सोमोऽधिकस्तदपेक्षयोत्तरा संस्था तेनातिरिक्तेन सोमेनानुष्ठेया। परसंस्थानुष्ठानेऽपि यदि सोमस्याधिक्यमेव स्यात् तदा तत्परवर्तिनी सोमसंस्थानुष्ठेया। एवमतिरात्रपर्यन्तमनुष्ठेयम्। ततोऽपि सोमोऽतिरिक्तश्चेद् भवेत् तदानीं पुनरतिरिक्तशस्त्रं शंसनीयम्। तत्र वैष्णवे शस्त्रे विष्णोर्नु कमिति सूक्तं शंसेदित्यर्थः।"

[2] "सोमयागे होता तृतीयसवने द्वितीयं शस्त्रमाग्निमारुतनामकं शंसति। तत्र स वैश्वानराय पृथुपाजसे इति सूक्तं पठति, ततो यज्ञा यज्ञा व इति देवो वो द्रविणोदा इति प्रगाथद्वयं स्तोत्रियानुरूपसंज्ञकं पठति। तत्र प्रगाथो नाम यदृग्द्वयं पठनविशेषेण ऋक्त्रयतां नीत्वा पठ्यते स प्रग्रथनात् प्रगाथ इत्युच्यते। पठनविशेषस्त्वेवम्—प्रथमतः प्रथमामृचं प्रपठ्य तदीयमन्तिमं पादं पृथग् गृहीत्वा, द्विरावर्त्य, उत्तरस्या ऋचः पूर्वार्धेन योजयति, एषा द्वितीया ऋक् सम्पद्यते। तस्या अप्यृचोऽन्तिमं पादं पृथग् गृहीत्वा द्विरावर्त्य, उत्तरस्या ऋच उत्तरार्धेन योजनात् तृतीया ऋग् भवति। तदिदं प्रग्रथनम्, तद्वत ऋग्द्वयं प्रगाथशब्देनोच्यते। इदं च शस्त्रमग्निष्टोमसाम्नोऽनुरूपमिति तत्स्थं स्तोत्रमत्र स्तोत्रियशब्देनोच्यते। एवं तत्परवर्ति ऋग्द्वयं प्रगाथरूपमनुरूपं भवति। एवं स्तोत्रियानुरूपयोः पठनोत्तरमत्र शस्त्रे जातवेदस्यं सूक्तं शंसते, तत आपो हि ष्ठा मयोभुवः, तत उत नोऽहिर्बुध्न्य इति ऋग्देवानां पत्नीरिति ऋग्द्वयम्, पावीरवी कन्येति ऋग् यामी ऋक् पित्र्याश्च तिस्र ऋचो ययोरोजसा स्कभितेति वैष्णवी ऋक्। एतदृचां तत्पठनोत्तरं विष्णोर्नु कमित्येषा वैष्णवी पठ्यते। ततस्तन्तुं तन्वन्नित्यृचं प्रपठ्य एवा नो चष इत्यनया शस्त्रं समाप्यते। ततोऽग्ने मरुद्भिः शुभयद्भिरृक्वभिरिति शस्त्रयाज्यापाठेन सोमो हूयते। इत्येतस्याग्निमारुतशस्त्रप्रक्रियायां प्रकृतवैष्णवसूक्तगतप्रथमाया विनियोग इत्युच्यते।"

हे नराः विष्णोः व्यापनशीलस्य देवस्य वीर्याणि वीरकर्माणि नु कम् अतिशीघ्रं प्र वोचम् प्रब्रवीमि। अत्र यद्यपि नु कमिति पदद्वयं तथापि यास्केन नवोत्तराणि पदानि [नि° १।१२] इत्युक्तत्वात्, शाखान्तर एकत्वेन पाठाच्च 'नु' इत्येतस्मिन्नेवार्थे 'नु कम्' इति पदद्वयम्[1]। कानि तानीति तत्राह। यः विष्णुः पार्थिवानि पृथिवीसम्बन्धीनि रजांसि रञ्जनात्मकानि क्षित्यादिलोकत्रयाभिमानीन्यग्निवाय्वादित्यरूपाणि तेजांसि* विममे विशेषेण निर्ममे। अत्र त्रयो लोका अपि पृथिवीशब्दवाच्याः। तथा च मन्त्रान्तरम् 'यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः' [ऋ० सं० १।१०८।९] इति। तैत्तिरीयेऽपि 'योऽस्यां पृथिव्यामस्यायुषा' इत्युपक्रम्य 'यो द्वितीयस्यां तृतीयस्यां पृथिव्याम्' [तै° सं° १।२।१२।१] इति। तस्माल्लोकत्रयस्य पृथिवीशब्दवाच्यत्वम्। किञ्च, यः च† विष्णुः उत्तरम् उद्गततरम् अतिविस्तीर्णं सधस्थम् सहस्थानं लोकत्रयाश्रयभूतमन्तरिक्षम् अस्कभायत् तेषामाधारत्वेन स्तम्भितवान् निर्मितवानित्यर्थः। अनेनान्तरिक्षाश्रितं लोकत्रयमपि सृष्टवानित्युक्तं भवति। यद्वा। यः विष्णुः पार्थिवानि पृथिवीसम्बन्धीनि रजांसि पृथिव्या अधस्तनसप्तलोकान् विममे विविधं निर्मितवान्। रजःशब्दो लोकवाची, लोका रजांस्युच्यन्ते [नि° ४।१९] इति यास्केनोक्तत्वात्। किञ्च, यः च† उत्तरम् उद्गततरम् उत्तरभाविनं सधस्थम् सहस्थानं पुण्यकृतां सहनिवासयोग्यं भूरादिलोकसप्तकम् अस्कभायत् स्कम्भितवान् सृष्टवानित्यर्थः। स्कम्भेः स्तम्भुस्तुम्भु° [३।१।८२] इति विहितस्य श्नः छन्दसि शायजपि [३।१।८४] इति व्यत्ययेन शायजादेशः। अथवा। पार्थिवानि पृथिवीनिमित्तकानि रजांसि लोकान् विममे। भूरादिलोकत्रयमित्यर्थः। भूम्यामुपार्जितकर्मभोगार्थत्वादितरलोकानां तत्कारणत्वम्। किञ्च, यः च† उत्तरम् उत्कृष्टतरं सर्वेषां लोकानामुपरिभूतम्। अपुनरावृत्तेस्तस्योत्कृष्टत्वम्। सधस्थम्

---

1 कमिति पूरणः AVS.

* M. P. read with most MSS. रजांसि, AVS. (vii. 26. 1) has ज्योतींषि.

† This च is superfluous.

उपासकानां सहस्थानं सत्यलोकम् अस्कभायत् स्कम्भितवान् ध्रुवं स्थापितवानित्यर्थः। किं कुर्वन्? त्रेधा विचक्रमाणः त्रिप्रकारं समुष्टाल्ँलोकान् विविधं क्रममाणः[1] विष्णोस्त्रेधा क्रमणम् इदं विष्णुर्वि चक्रमे [ऋ० सं० १।२२।१७] इत्यादिश्रुतिषु प्रसिद्धम्। अतएव उरुगायः उरुभिर्महद्भिर्गीयमानः, अतिप्रभूतं गीयमानो वा। य एवं कृतवांस्तादृशस्य विष्णोर्वीर्याणि प्रवोचम् ॥१॥

नु कम्—नु means 'now', and the accentless particle *kam* (Gk. *ken*) is used after नु, सु and हि. The author of the *Nighaṇṭu* regards नुकम्, हिकम् and सुकम् as single words. कम् means willingly, indeed. नुकमिति क्षिप्रनाम। भट्टभास्करः।

वोचम्—1. s. inj. red. aor. of वच् speak. छान्दसो लुङ्। बहुलं छन्दस्यमाङ्योगेऽपि [६।४।७५] इत्यडभावः। लुदित्त्वादङि वच उमित्युमागमः। See V. G. S. p. 350 *a*. *Cf*. इन्द्रस्य नु वीर्याणि प्र वोचम् i. 32. 1.

पार्थिवानि—पृथिव्या आञौ [४।१।८५।२] इत्यञ्प्रत्ययः। *Cf*. यो रजांसि विममे पार्थिवानि त्रिश्चिद्विष्णुर्मनवे बाधिताय "He who for man's behoof in his affliction thrice measured out the earthly regions." RV. vi. 49. 13. मानेनेव तस्थिवाँ अन्तरिक्षे वि यो ममे पृथिवीं सूर्येण who (Varuṇa) standing in the atmospheric region has measured out the earth with the sun as with a measure. RV. v. 85. 5.

यो अस्कभायत्—note the absence of the loss of अ.

अस्कभायत्—imperf. of the denom. of स्कभ् pivot. *Cf*. स्कभायत् v. 29. 4, vi. 44. 24.

उत्तरम्—comp. of उद्. द्युलोकाख्यम् Uv.

सधस्थम्—सध is the earlier form of सह and is found as the first member of the two compounds सधस्थ (gathering place) and सधमाद (co-revelry, *Gk. sumposion*).

विचक्रमाणः—perf. part. Atm. of वि-क्रम् to step. वेः पादविहरणे [१।३।४१] इत्यात्मनेपदम्। Pres. part. विक्रममाणः.

---

[1] We may defend the form by regarding the Ātmanepada as used in the sense of वृत्ति acc. to P. i. 3. 38. Yāska's paraphrase in *Nir*. vi. 12 of अतिक्रामन्तः by अतिक्रममाणाः has often landed later commentators in disaster. See p. 602.

उरुगायः—उरु जिगातीति कर्मण्यण्। आतो युक् चिण्कृतोः [७।३।३३] इति युक्। गतिकारकोपपदात् कृत् [६।२।१३९] इति कृदुत्तरपदप्रकृतिस्वरत्वम्। Corresponds to उरुक्रम in st. 5. In the *Nirkuta* (ii. 7) उरुगायस्य is explained as महागतेः. Durga says उरुगमनस्य. Evidently, it is regarded as a Bah. with गाय formed from गा with घञ् as the second member.

2

प्र तद्विष्णुः स्तवते वीर्येण	प्र । तत् । विष्णुः । स्तवते । वीर्येण ।
मृगो न भीमः कुचरो गिरिष्ठाः ।	मृगः । न । भीमः । कुचरः । गिरिऽस्थाः ।
यस्योरुषु त्रिषु विक्रमणे-	यस्य । उरुषु । त्रिषु । विऽक्रमणेषु ।
ष्वधिक्षियन्ति भुवनानि विश्वा ॥२॥	अधिऽक्षियन्ति । भुवनानि । विश्वा ॥२॥

Therefore (*tát*), Viṣṇu (*Víṣṇuḥ*) is praised aloud (*prá stavate*) for his heroic deeds (*vīryêṇa*), like a dread beast (*mṛgáḥ ná bhīmáḥ*) wandering at will (*kucaráḥ*), haunting the mountains (*giriṣṭhā'ḥ*) in whose (*yásya*) three (*triṣú*) wide (*urúṣu*) steps (*vikrámaṇesu*) reside (*adhikṣiyánti*) all beings (*viśvā bhúvanāni*).

सायणः। तृतीयसवने सोमातिरेक एव शस्त्रमुपजनयितव्यम्। तत्र 'प्र तत्' इत्ययमनुरूपस्तृचः[1]। 'सोमातिरेके' इति खण्डे सूत्रितम्—प्र तद्विष्णुः स्तवते वीर्येणेति स्तोत्रियानुरूपौ [आ० श्रौ० ६।७।८] इति। [2]'वाजपेयेनाधिपत्यकामः' इति खण्डे सूत्रितम्—'प्र तत्ते अद्य शिपिविष्ट नाम प्र तद्विष्णुः स्तवते वीर्येण' [आ० श्रौ० ९।९।११] इति।

---

1 "तृतीयसवने सोमातिरेके उत्तरोत्तरा अतिरात्रपर्यन्तां संस्था अनुष्ठाय ततोऽप्यतिरेके सोमस्य वैष्णवं शस्त्रं शंसनीयं भवतीति पूर्वमुक्तम्। तस्मिञ्छस्त्रे प्र तद्विष्णुरित्यनुरूपस्तृचः।"

2 आधिपत्यकामेन वाजपेययागोऽनुष्ठेयः। तत्र सप्तदश दीक्षा भवन्ति। होतुः शस्त्राणि प्रकृतिवत्। वैश्वमाज्यं शस्त्रं विश्वजिद्यागवद् भवति। माध्यन्दिनसवने मरुत्वतीयशस्त्रं शस्त्वा बार्हस्पत्येष्टिरनुष्ठीयते। यजमानस्याजिप्रापणं पार्थिवम्। अभिप्लवषडहस्य तृतीयदिनवत् तृतीयसवनमत्रानुष्ठीयते। तत्र सामगैरूर्ध्वं दिव्यवतीष्वृक्षु स्तुतिः क्रियेत. तर्हि प्राकृतगर्भेषया-

तत् विष्णुः* यस्येति वक्ष्यमाणत्वात्† स इत्यवगम्यते। स महानुभावः वीर्येण स्वकीयेन वीरकर्मणा [प्र] प्रकृष्टरूपेण‡ स्तवते स्तूयते सर्वैः। कर्मणि व्यत्ययेन शप्। वीर्येण स्तूयमानत्वे दृष्टान्तः। मृगः न सिंहादिरिव। यथा स्वविरोधिनो मृगयिता सिंहः भीमः भीतिजनकः कुचरः कुत्सितहिंसादिकर्ता दुर्गमप्रदेशगन्ता वा गिरिष्ठाः। पर्वताद्युन्नतप्रदेशस्थायी सर्वैः स्तूयते। अस्मिन्नर्थे निरुक्तम् [१।२०]। 'मृगो न भीमः कुचरो गिरिष्ठाः। मृग इव भीमः कुचरो गिरिष्ठाः। मृगो मार्ष्टेर्गतिकर्मणः। भीमो बिभ्यत्यस्मात्, भीष्मोऽप्येतस्मादेव। कुचर इति चरति कर्म कुत्सितम्, अथ चेद्देवताभिधानं क्वायं न चरतीति वा। गिरिष्ठा गिरिस्थायी। गिरिः पर्वतः, समुद्गीर्णो भवति। पर्ववान् पर्वतः। पर्व पुनः पृणातेः प्रीणातेर्वा।' तद्वदयमपि मृगः अन्वेष्टा शत्रूणां भीमः भयानकः सर्वेषां भीत्यपादानभूतः। परमेश्वराद्भीतिः भीषास्माद्वातः पवते [तै॰ आ॰ ८।८।१] इत्यादिश्रुतिषु प्रसिद्धा। किञ्च कुचरः शत्रुवधादिकुत्सितकर्मकर्ता, कुषु सर्वासु भूमिषु लोकत्रये सञ्चारी वा, तथा गिरिष्ठाः गिरिवदुच्छ्रितद्युलोकस्थायी। यद्वा। गिरि मन्त्रादिरूपायां वाचि सर्वदा वर्तमानः। ईदृशोऽयं स्वमहिम्ना स्तूयते। किञ्च, यस्य विष्णोः उरुषु विस्तीर्णेषु त्रिषु त्रिसंख्याकेषु विक्रमणेषु पादप्रक्षेपेषु विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि अधिक्षियन्ति आश्रित्य निवसन्ति। स विष्णुः स्तूयते।

तिरिक्तौ त्वं नश्चित्र इत्यादिकौ स्तोत्रियानुरूपावग्निष्टोमसाम्नो भवतः। अत्र षोडशिनोऽनुष्ठानात् तदीया प्रक्रिया सर्वानुष्ठेया। तदनुष्ठानोत्तरमतिरिक्तोक्थं शंसनीयम्। तत्र प्र तत्ते अद्येति स्तोत्रियस्तृचः प्र तद्विष्णुरित्यनुरूपो भवति।

* Omitted in M. and P. and most MSS., but absolutely essential.

† Should we read here लिङ्व्यत्ययेन ?

‡ पूर्वोक्तरूपेण M. P. and most MSS. AVS. प्रकर्षेण, पूर्वोक्तमहत्स्वरूपेण which is better in a few MSS., but then प्र and its meaning would be missing.

अथर्ववेदभाष्यम्। प्रथमे विक्रमे भौमानि द्वितीयेऽन्तरिक्ष्याणि तृतीये दिव्यानि भूतानि वसन्तीत्यर्थः।

प्र स्तवते—The भ्वादि root is generally used in the Ātmanepada in a passive sense.

तत्—best regarded as an indeclinable in the sense of 'therefore'.

मृगः—originally a wild beast (as opp. to पशु cattle), then a deer. In Bengali it became मुर्गी and means cock or hen. In English 'deer' also meant originally animal in general. *Cf.* Germ. *Tier.* "But mice and rats, and such small deer, Have been Tom's food for seven long year." *King Lear*, iii. 4. 129-130. In x. 180. 2 Indra is described as मृगो न भीमः कुचरो गिरिष्ठाः. *Cf.* RV. iv. 16. 14 मृगो न हस्ती तविषी मुषाणः सिंहो न भीम आयुधानि बिभ्रत् guiding thyself with strength like an elephant, like a dread lion when thou (*i.e.* Indra) bearest arms.

कुचरः—from कु where (*cf.* कुत्र, कुह), *i.e.* anywhere and चर. *Cf.* TB. iii. 8. 2. 3 बहु वा एष कुचरोऽमेध्यमुपगच्छति यदश्वः (कुचरः स्वेच्छया सञ्चरमाणोऽयमश्वः बहु वै प्रभूतमेवामेध्यमशुचिमुपगच्छति, उच्छिष्टाद्युपहतेषु देशेषु सञ्चरणात्)।

गिरिष्ठाः—Note that the stem is masc. declined like विश्वपा.

अधिक्षियन्ति—For root क्षि see p. 195.

3

प्र विष्णवे शूषमेतु मन्म
गिरिक्षित उरुगायाय वृष्णे।
य इदं दीर्घं प्रयतं सधस्थ-
मेको विममे त्रिभिरित्पदेभिः ॥३॥

प्र। विष्णवे। शूषम्। एतु। मन्म।
गिरिऽक्षिते। उरुऽगायाय। वृष्णे।
यः। इदम्। दीर्घम्। प्रऽयतम्। सधऽस्थम्।
एकः। विऽममे। त्रिऽभिः। इत्। पदेभिः।

Let this inspiring hymn (*śūṣám mánma*) go forth (*prá etu*) to Viṣṇu (*Víṣṇave*), the dweller on the mountain (*girikṣíte*), the wide-strider (*urugāyā'ya*), the Bull (*vṛ'ṣṇe*), who (*yáḥ*)

alone (*ékaḥ*) has measured out (*vimamé*) this (*idám*) long (*dīrghám*) far-extended (*práyatam*) gathering-place (*sadhástham*) with but three steps (*tribhiḥ it padébhiḥ*).

सायणः। विष्णवे सर्वव्यापकाय शूषम् अस्मत्कृत्यादिजन्यं बलम् महत्त्वं मन्म मननं स्तोत्रम् मननीयं शूषं बलं वा विष्णुम् [प्र] एतु प्राप्नोतु। कर्मणः सम्प्रदानत्वाच्चतुर्थी। कीदृशाय? गिरिक्षिते वाचि गिरिवदुन्नतप्रदेशे वा तिष्ठते उरुगायाय बहुभिर्गीयमानाय वृष्णे वर्षित्रे कामानाम्। एवं महानुभावं शूषं प्राप्नोतु। कोऽस्य विशेष इत्युच्यते। यः विष्णुः इदम् प्रसिद्धं दृश्यमानं दीर्घम् अतिविस्तृतं प्रयतम् नियतं सधस्थम् सहस्थानं लोकत्रयम् एकः इत् एक एवाद्वितीयः सन् त्रिभिः पदेभिः पादैः विममे विशेषेण निर्मितवान्।

विष्णवे—The root इ is used with the Dat. in the Vedas. क्रियाग्रहणमपि कर्तव्यम् इति सम्प्रदानत्वाच्चतुर्थी।

शूषम् मन्म—शूष is found in the *Nigh.* among the synonyms of बल (ii. 9) and सुख (iii. 6). मन्मन् स्तोत्र By hendiadys शूषं मन्म means strong hymn or inspiring hymn. *Cf.* RV. x. 54. 6 अध प्रियं शूषमिन्द्राय मन्म ब्रह्मकृतो बृहदुक्थादवाचि. In viii. 74. 1 the two are used in different vibhaktis. स्तुषे शूषस्य मन्मभिः I pray with thoughts of fervour.

एकः...त्रिभिः—The figure of speech is विरोध acc. to Daṇḍin.

4

यस्य त्री पूर्णा मधुना पदा-	यस्य । त्री । पूर्णा । मधुना । पदानि ।
न्यक्षीयमाणा स्वधया मदन्ति ।	अक्षीयमाणा । स्वधया । मदन्ति ।
य उ त्रिधातु पृथिवीमुत द्या-	यः । ऊँ इति । त्रिऽधातु । पृथिवीम् । उत । द्याम् ।
मेको दाधार भुवनानि विश्वा ॥४॥	एकः । दाधार । भुवनानि । विश्वा ॥४॥

Whose (*yásya*) three (*trī́*) steps (*padā́ni*) filled (*pūrṇā́*) with mead (*mádhunā*), undecaying (*ákṣīyamāṇā*) rejoice (*mádanti*) in bliss (*svadháyā*), and who alone (*yáḥ u ékaḥ*) in three-fold manner (*tridhā́tu*) has supported (*dādhā́ra*) earth and heaven (*pṛthivī́m utá dyā́m*) and all beings (*víśvā bhúvanāni*).

सायणः । यस्य विष्णोः मधुना मधुरेण दिव्येनामृतेन पूर्णा पूर्णानि त्री त्रीणि पदानि पादप्रक्षेपणानि अक्षीयमाणा अक्षीयमाणानि* स्वधया अन्नेन मदन्ति मादयन्ति तदाश्रितजनान् । यः उ य एव पृथिवीम् प्रख्यातां भूमिम् द्याम् उत† द्योतनात्मकम् अन्तरिक्षं च विश्वा भुवनानि सर्वाणि भूतजातानि चतुर्दश लोकांश्च । यद्वा पृथिवीशब्देनाधोवर्तीन्यतलवितलादिसप्तभुवनान्युपात्तानि । द्युशब्देन तदवान्तररूपाणि भूरादिसप्तभुवनानि । एवं चतुर्दश लोकान् विश्वा भुवनानि सर्वाण्यपि तत्रत्यानि भूतजातानि । त्रिधातु । त्रयाणां धातूनां समाहारस्त्रिधातु । पृथिव्यप्तेजोरूपधातुत्रयविशिष्टं यथा भवति तथा दाधार धृतवान् । तुजादित्वादभ्यासस्य दीर्घत्वम् । उत्पादितवानित्यर्थः । छन्दोगारण्यके "तत्तेजोऽसृजत तदन्नमसृजत ता आप ऐक्षन्त" इति भूतत्रयसृष्टिमुक्त्वा "हन्ताहमिमास्तिस्रो देवतास्तासां त्रिवृतं त्रिवृतमेकैकां करवाणि" [छा० उ० ६।३।२-३] इत्यादिना त्रिवृत्करणसृष्टिरुपपादिता । यद्वा । त्रिधातु कालत्रयं गुणत्रयं वा दाधारेत्यन्वयः ॥४॥

त्री पूर्णा—class. त्रीणि पूर्णानि.

मधुना—both the instrumental ('filled *with*') and genitive ('full *of*') are used with पूर्ण. मध्वा also occurs in RV.

What has been here said of the three steps of Viṣṇu really applies only to the third or highest step.

त्रिधातु—in a three-fold way, *i.e.*, by means of his steps, or the three-fold world—earth, heaven, etc.

---

* Some read अक्षीणानि.

† One expected उत द्याम्. S. was thinking of च.

दाधार—Perfect of धृ with lengthened reduplicative vowel. तुजादीनां दीर्घोऽभ्यासस्य vi. 1. 7.

5

तदस्य प्रियमभि पाथो अश्यां
नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था
विष्णोः पदे परमे मध्व उत्सः ॥५॥

तत् । अस्य । प्रियम् । अभि । पाथः । अश्याम् ।
नरः । यत्र । देवऽयवः । मदन्ति ।
उरुऽक्रमस्य । सः । हि । बन्धुः । इत्था ।
विष्णोः । पदे । परमे । मध्वः । उत्सः ॥५॥

I would attain (*aśyām*) that dear abode of his (*asya tát priyám pā'thaḥ*), where (*yátra*) men (*nárah*) devoted to the gods (*devayávaḥ*) rejoice (*mádanti*), for (*hí*) there (*itthā'*) [is] this association or society of friends (*sáḥ bándhuḥ*) of the far-strider (*urukramásya*). In his highest step (*paramé padé*) of Viṣṇu (*Víṣṇoḥ*) is a well of meád (*mádhvaḥ útsaḥ*).[1]

वेङ्कटमाधवः । तदस्य विष्णोः प्रियं स्थानम् अभिप्राप्नुयाम्, नरो यत्र देवकामा मदन्ति । विस्तीर्णं क्रममाणस्य स हि [बन्धुः] स्तोतैर्बन्धनकृत् इत्थं तत् स्थानमभिप्राप्नोति । विष्णोः पदे परमे दिवि उदकस्योत्पत्तिस्थानम् ।

सायणः । आतिथ्यायां 'तदस्य' इत्येषा प्रधानस्य याज्या ।* 'अथातिथ्या' इति खण्डे सूत्रितम्—इदं विष्णुर्वि चक्रमे तदस्य प्रियमभि पाथो अश्याम् [आ॰ श्रौ॰ ४।५।७] इति ।

---

[1] Schröder compares the Lettish song: Der Uhsing beareitet Bier In der Fussspur des Rössleins. The [Sungod] Uhsing keeps beer ready in the pathway of the little horse.

* क्रीतं सोमं शकटे संस्थाप्य प्राचीनवंशं प्रत्यानीयमानेऽभिमुखे यामिष्टिं निर्वपति सैवमातिथ्येष्टिरिति मन्त्रार्थाः । तथा च ब्राह्मण—हविरातिथ्यं निरुप्यते सोमे राजन्यागते

अस्य महतः विष्णोः प्रियम् प्रियभूतं तत् सर्वैः सेव्यत्वेन प्रसिद्धं पाथः अन्तरिक्षनामैतत्, पाथोऽन्तरिक्षं पथा व्याख्यातम् [नि° ६।७] इति यास्केनोक्तत्वात्। अविनश्वरं ब्रह्मलोकमित्यर्थः। अश्याम् व्याप्नुयाम्। तदेव विशेष्यते। यत्र स्थाने देवयवः देवं द्योतनस्वभावं विष्णुमात्मन इच्छन्तो यज्ञदानादिभिः प्राप्तुमिच्छन्तः नरः मदन्ति तृप्तिमनुभवन्ति। तदश्यामित्यन्वयः। पुनरपि तदेव विशेष्यते। उरुक्रमस्य अत्यधिकं सर्वंजगदाक्रममाणस्य* तत्तदात्मना, अत एव विष्णोः व्यापकस्य परमेश्वरस्य परमे उत्कृष्टे निरतिशये केवलसुखात्मके पदे स्थाने मध्वः मधुरस्य परमानन्दरसस्य सुधारूपस्य† उत्सः निष्यन्दो वर्तते। तदश्याम्। यत्र क्षुत्तृष्णाजरामरणपुनरावृत्त्यादिभयं नास्ति, सङ्कल्पमात्रेणामृतकुल्यादिभोगाः प्राप्यन्ते तादृशमित्यर्थः। ततोऽधिकं नास्तीत्याह। इत्था इत्थम् उक्तप्रकारेण सः हि बन्धुः स खलु सर्वेषां सुकृतिनां बन्धुभूतो ‡हितकरो बन्धकः, तस्य पदं प्राप्तवतामपुनरावृत्तेः। न च पुनरावर्तते [छा° उ° ८।१५।१] इति श्रुतेस्तस्य बन्धुत्वम्। हिशब्दः सर्वश्रुतिस्मृतिपुराणादिप्रसिद्धिद्योतनार्थः।

तैत्तिरीयब्राह्मणभाष्यम् [२।४।६।२]। उरुक्रमस्य विस्तीर्णपादस्य विष्णोः परमे पदे तृतीये पादे बन्धुः सम्बद्धो मध्वः मधुर उत्सो भागीरथीप्रवाह इत्था हि एवंविधः। हिशब्दः सर्वलोकप्रसिद्धिद्योतनार्थः।

पाथः—स्थानम् VM. It is derived from पा to protect and is probably the nom. sing. पाथः used as neut. substantive. *Cf.* RV. iii. 55. 10 विष्णुर्गोपाः परमं पाति पाथः Viṣṇu, the guardian, protects the loftiest place of refuge.

[ऐ° ब्रा° ३।४] इति। सोमस्यातिथिरूपस्योपचाराय क्रियमाणत्वादातिथ्यमिति कर्मनाम। अत्र च प्रधानदेवता विष्णुः, तदीययागे हविष्प्रदानावसरे तदस्येत्येषा वक्तव्या।

* आक्रममाणस्य should be आक्रामतः. See p. 595.

† परमानन्दरसस्य सुधारूपस्य is omitted in most MSS. We should omit सुधारूपस्य but retain परमानन्दरसस्य.

‡ Most MSS. read हितकरो वा.

नरः—The stem is नृ, Gk. stem *aner*, Lat. *Nero*. In RV. *nara* occurs only at the end of compounds.

देवयवः—The primary suffix- *u* is added to the denominative root *devay*. *Cf.* मृगय of class. Sanskrit.

सः—विधेयप्राधान्यात्पुंलिङ्गेन निर्देशः. It refers to the neut. पाथः.

इत्था—formed from इद् of इदम् with था.

मध्वः—of mead, *i.e.*, of nectar. For form see pp. 173, 177. *Cf.* RV. x. 1. 3: विष्णुरित्था परममस्य विद्वाञ्जातो बृहन्नभि पाति तृतीयम्। आसा यदस्य पयो अक्रत स्वं सचेतसो अभ्यर्चन्त्यत्र ॥

6

ता वां वास्तून्युश्मसि गमध्यै
यत्र गावो भूरिशृङ्गा अयासः ।
अत्राह तदुरुगायस्य वृष्णः
परमं पदमव भाति भूरि ॥६॥

ता । वाम् । वास्तूनि । उश्मसि । गमध्यै
यत्र । गावः । भूरिऽशृङ्गाः । अयासः ।
अत्र । अह । तत् । उरुऽगायस्य । वृष्णः ।
परमम् । पदम् । अव । भाति । भूरि ॥६॥

We long (*uśmasi*) to go (*gámadhyai*) to those abodes of you two (*tā' vām vā'stūni*), where are (*yátra*) the many-horned (*bhū'riśṛṅgāḥ*) unwearied (*ayā'saḥ*) kine (*gā'vaḥ*). There (*átra*) verily (*áha*) that (*tát*) highest (*paramám*) step (*padám*) of the wide-pacing (*urugāyásya*) Bull (*vṛ'ṣṇaḥ*) shines down (*áva bhāti*) brightly (*bhū'ri*).

सायणः। हे पत्नीयजमानौ ता तानि गन्तव्यत्वेन प्रसिद्धानि वास्तूनि सुखनिवासयोग्यानि स्थानानि वां युवयोः गमध्यै गमनाय उश्मसि कामयामहे। तदर्थं विष्णुं प्रार्थयाम[1] इत्यर्थः। तानीत्युक्तं कानीत्याह। यत्र येषु वास्तुषु

[1] प्रार्थयामहे is the correct form, but commentators often use the root in the Parasmaipada.

गावः रश्मयः भूरिशृङ्गाः अत्यन्तोन्नत्युपेताः बहुभिराश्रयणीया वा,। अयासः अयना गन्तारोऽतिविस्तृताः। यद्वा। यासो गन्तारोऽतादृशाः। अत्यन्तप्रकाशयुक्ता इत्यर्थः। अत्र अह अत्र खलु वास्त्वाधारभूते द्युलोके उरुगायस्य बहुभिर्महात्मभिर्गातव्यस्य स्तुत्यस्य वृष्णः कामानां वर्षितुर्विष्णोः तत् तादृशं सर्वत्रेतिहासपुराणादिषु गन्तव्यत्वेन प्रसिद्धं परमम् निरतिशयं पदम् स्थानं भूरि अतिप्रभूतम् अव भाति स्वमहिम्ना स्फुरति। अयं मन्त्रो यास्केन गोशब्दो रश्मिवाचक इति व्याचक्षाणेन व्याख्यातः [नि° २।७]। तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो भूरिशृङ्गा बहुशृङ्गाः। भूरीति बहुनो नामधेयं प्रभवतीति सतः। शृङ्गं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वा।[1] अयासोऽयनाः। तत्र तद् उरुगायस्य विष्णोर्महागतेः परमं पदं पराध्यंस्थम् अव भाति भूरि। पदः पद्यतेः। इति।

वेङ्कटमाधवः। [ता] तानि [वाम्] इन्द्राविष्णोः [वास्तूनि] स्थानानि [उश्मसि] कामयामहे [गमध्यै] गमनाय यत्र [गावः] रश्मयः [भूरिशृङ्गाः] बहुशिरस्काः [अयासः] गच्छन्तः। अत्र [अह] एव तत् [उरुगायस्य] महागतेः [वृष्णः] वर्षितुर्विष्णोः [परमम्] परार्धस्थम् पदम् [अवभाति भूरि] भासते।

वाम्—As VM. explains Indra and Viṣṇu are meant. *Cf.* also i. 155. 1-2.

वास्तु—Gk. *wástu*. वसेस्तुन्। अगारे णिच्च। Uṇ. i. 76-77.

उश्मसि—*Cf.* जयाय सेनान्यमुशन्ति देवाः *Kumāra* iii. 15. *Cf.* Gk. (*w*)*ekōn*, stem (*w*)*ekont*, willing.

गमध्यै—Dat. infin. The suffix is अध्यैन्. See V. G. S. p. 193.

---

[1] These are all popular etymologies. Acc. to philologists the root is शृ (I. E. **ker*) with *n*- extension. शिरस् comes from the same root. *Cf.* Gk. *kraggōn* (क्राङ्गोन्) crab, Eng. *horn*.

गावः भूरिशृङ्गाः—the myriad-rayed stars, acc. to some scholars. Geldner compares RV. i. 87. 1 where उस्रा, a synonym of गो, is used with स्तृ (star)—केचिदुस्रा इव स्तृभिः. Macdonell supports Yāska and Sāyaṇa: "This is a probable sense, as the rays of dawn are compared with cattle, and something connected with sunlight is appropriate to the third step of Viṣṇu, the realm of light. *Many-horned* would allude to the diffusion of light in many directions."

अयासः—Under i. 64. 1 S. says: अय पय गतौ। अयन्त इत्ययाः। आज्जसेरसुक्। The acc. s. अयासम् (ix. 89. 3-4), acc. pl. अयासः (v. 42. 15) and the gen. pl. अयासाम् (i. 168. 9, i. 169. 7) also occur in RV. The stem would, therefore, appear to be अयास् and not अय. And as the word is an epithet of गो, अश्व, सिंह, अर्चिः and frequently of the Maruts the meaning seems to be active, swift, unwearied. Roth derives अयास from यास् from यस् (not wearying oneself). Geldner thinks perhaps it is from यस् in इयसति which Sāyaṇa correctly explains as अवसद् under ŚB i. 9. 2. 14. It may also, acc. to him, be regarded as an adjective corresponding to अयस् ore in the sense of hard as iron. In Gk. *sidēros* means iron and the adj *sidēreos* is found in Homer in the senses of 'as if of iron' (unwearying, ceaseless, incessant), hard as iron (relentless) etc.

अह—is found generally after pronouns and particles and emphasizes the preceding word. See V. G. S. p. 216.

RUDRA

Rudra is a very powerful God in RV., though only a few hymns addressed to him have come down to us. He is one of the two highest divinities of the modern Hindu pantheon and he has devotees in every creek and corner of India. He is a God of the atmospheric region and is the father of the Maruts. Acc. to BD. (ii. 34), since he roared in the air giving rain along with lightning to men, he is highly praised as Rudra by four seers (Kaṇva i. 43, Kutsa i. 114, Gṛtsamada ii. 33, Vasiṣṭha vii. 46). (अरोदीदन्तरिक्षे यद् विद्युद्वृष्टिं ददन्नृणाम्। चतुर्भिर्ऋषिभिस्तेन रुद्र इत्यभिसंस्तुतः॥)

As a deity of the air, as connected with raging storms and tempests, he has a terrible aspect. He is fierce (उग्रः), destructive like a dread beast (मृगं न भीममुपहत्नुमुग्रम्). He is the strongest of the strong (तवसां तवस्तमः). The worshipper prays to him fervently to avert his wrath and not to slay or injure in his anger his worshippers, their parents, children, men, cattle and horses. (मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्। मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः॥ मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान् मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित् त्वा हवामहे॥ i. 114. 7-8., He is earnestly implored to keep far from the worshipper his cow-slaying and man-slaying weapon (आरे ते गोघ्नमुत पूरुषघ्नम् i. 114. 10).

But he is beneficent also. He is implored to be gracious and to intercede for the worshipper (मृळा च नो अधि च ब्रूहि i. 114. 10). The worshippers implore with obeisance the ruddy boar of heaven with spirally braided hair and brilliant form. Holding in his hand choice remedies he is besought to grant to his devotees protection and defence and shelter. (दिवो वराहमरुषं

कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे। हस्ते बिभ्रद् भेषजा वार्याणि शर्म वर्मच्छर्दिरस्मभ्यं यंसत् ॥ i. 114. 5).

Rudra is the great physician as the Aśvins are the great surgeons. He rules over all remedies (यो विश्वस्य क्षयति भेषजस्य v. 42. 11) and the God who is easy of access has a thousand (सहस्रं ते स्वपिवात भेषजा vii. 46. 3) of them. The epithets जलाष (cooling) and भेषज (healing) are exclusively applied to Rudra.

The best-known ṛk to Rudra is vii. 59. 12:

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

'We worship Tryambaka, the fragrant, the furtherer of welfare. May he set me free from death and not from immortality, like the pumpkin from the stalk.' *Tryambaka* appears to mean 'he who has three mothers' in allusion to the threefold division of the universe.

"Rudra is generally regarded as a storm-god. But his missile is maleficent, unlike that of Indra, which is directed only against the enemies of his worshippers. Rudra appears, therefore, to have originally represented not the storm, pure and simple but rather its baleful side in the destructive agency of lightning. This would account for his deadly shafts, and for his being the father or chief of the Maruts or Storm-gods, who are armed with lightning and who are said to have been born 'from the laughter of lightning' (i. 23. 12). His beneficent and healing powers would be based partly on the fertilizing and purifying action of the thunderstorm and partly on the indirect action of sparing those whom he might slay" (MACDONELL).

From the very beginning Rudra had a beneficent aspect along with the terrible aspect, a शिवा तनू along with a घोरा तनू, so the epithet Śiva generally applied to him in later times can hardly be regarded as euphemistic.

RUDRA

ii. 33

गृत्समद ऋषिः। त्रिष्टुप् छन्दः। रुद्रो देवता।

1

आ ते पितर्मरुतां सुम्नमेतु	आ | ते | पितः | मरुताम् | सुम्नम् | एतु।
मा नः सूर्यस्य सन्दृशो युयोथाः।	मा | नः | सूर्यस्य | सम्ऽदृशः | युयोथाः।
अभि नो वीरो अर्वति क्षमेत	अभि | नः | वीरः | अर्वति | क्षमेत।
प्र जायेमहि रुद्र प्रजाभिः ॥१॥	प्र | जायेमहि | रुद्र | प्रऽजाभिः ॥१॥

O let thy favour (*sumnám*), O father of the Maruts (*Marutām pitaḥ*), come (*ā etu*) to us (*naḥ*). Do not (*mā'*) separate (*yuyothāḥ*) us (*naḥ*) from the sight (*sandr̥'śaḥ*) of the sun (*sū'ryasya*). May the hero (*vīráḥ*) be merciful to (*abhi kṣameta*) us (*naḥ*) in the matter of our steeds (*árvati*). May we, O Rudra (*Rudra*), be prolific (*prá jāyemahi*) with offspring (*prajā'bhiḥ*)

वेङ्कटः। हे मरुतां पितः, ते तव सुम्नम् सुखम् अस्मान् आ एतु आयातु। मा नः अस्मान् सूर्यस्य सन्दृशो सन्दर्शनात् युयोथाः पृथक् कुरु। तथा नः अस्माकं वीरः पुत्रः अर्वति अश्वे अभिक्षमेत शक्तो भवतु। हे रुद्र तव प्रसादात् प्रजाभिश्च वयं प्रजायेमहि ॥१॥

हरदत्तः। आ ते पितः। गार्त्समदम्। हे मरुतां पितः, ते सुम्नं त्वत्कर्तृकं सुखम् अस्मान् आ एतु। नः अस्मान् सूर्यस्य सन्दृशः सन्दर्शनाद् मा युयोथाः। यौतिः पृथग्भावकर्मा। मा पृथक् कार्षीः। यावज्जीवं चक्षुष्मन्तो भूयास्म। नः वीरः पुत्रः अर्वति अश्वे अश्वपृष्ठे अभिक्षमेत सर्वप्रकारं समर्थोऽस्तु। प्रजाभिश्च वयं प्रजायेमहि पुत्रपौत्रादयश्च बहवो नः सन्तु ॥१॥

सायणः । [1]चतुर्थेऽनुवाक एकादश सूक्तानि । तत्र 'आ ते पितः' इति पञ्चदशर्चं प्रथमं सूक्तं गृत्समदस्यार्षं त्रैष्टुभं रौद्रम् । अनुक्रान्तं च—'आ ते [2]पञ्चोना रौद्रम्' इति । [3]शूलगवादिरुद्रयज्ञेष्वनेन सूक्तेन प्रतीची दिगुपस्थेया । सूत्रितं च—कद्रुद्रायेमा रुद्राया ते पितरिमा रुद्राय स्थिरधन्वन इति सर्वरुद्रयज्ञेषु दिशामुपस्थानम् [आ० गृ० सू० ४।१०।१९] । रुद्रदेवत्ये पशौ 'आ ते पितः' इति [4]हविषोऽनुवाक्या । सूत्रितं च—आ ते पितर्मरुतां सुम्नमेतु प्र बभ्रवे वृषभाय श्वितीच इति तिस्रः [आ० श्रौ० सू० ३।८।१] इति । अत्र शौनकः—

चतुर्दशीमुपोष्यैकां कृष्णस्य जुहुयाच्चरुम् ।
आ ते सूक्तेन रौद्रेण प्रत्यृचं वाग्यतः शुचिः ॥
पूर्वमाज्याहुतीर्हुत्वाथोपस्थाय च शङ्करम् ।
हविःशेषेण वर्तेत एकान्तरमतन्द्रितः ॥
पूर्णमासे जयेन्मृत्युं रोगेभ्यश्च प्रमुच्यते । [ऋग्वि० १।१६७-६९] इति ।

हे मरुतां पितः मरुत्संज्ञकानां देवानामुत्पादक रुद्र । परमपि छन्दसि [२।१।२।६] इति षष्ठ्यन्तस्य पूर्वामन्त्रिताङ्गवद्भावात् सर्वानुदात्तत्वम् । ते त्वदीयम् अस्मभ्यं दातव्यं सुम्नम् सुखम् [नः अस्मान्] आ एतु आगच्छतु । रुद्रस्य च मरुतां पितृत्वम् इदं पित्रे मरुताम् [१।११४।६] इत्यत्राख्यायिकामुखना-

[1] गार्त्समदे द्वितीये मण्डले चत्वारोऽनुवाकाः । तत्रान्तिमेऽनुवाके एकादश सूक्तानि [३३-४३] । तेषु च प्राथम्यं भजते—आ ते पितरिति ।

[2] अनिरुक्ता संख्या विंशतिरिति परिभाषया पञ्चोना-शब्देनात्र पञ्चदशर्चां सद्भावो बोध्यते । छन्दसोऽनुक्तत्वात् 'त्रिष्टुप् छन्दः' इति परिभाषया अत्र पञ्चदशस्वेव ऋक्षु छन्दस्त्रिष्टुबित्यवगन्तव्यम् ।

[3] शरदि वसन्ते वा शूलगवो नाम रुद्रयज्ञोऽनुष्ठीयते । तत्र शूलाङ्कितो गौर्गृह्यत इति तस्य नाम शूलगव इति । तस्मिन् यज्ञे इतरेष्वपि रुद्रयज्ञेषु दिशामुपस्थानं भवति । तत्र कद्रुद्राय [१।४३] इमा रुद्राय [१।११४] आ ते पितः [२।३३] इमा रुद्राय स्थिरधन्वने [७।४६] इति चतुर्भिः सूक्तैश्चतस्रो दिश उपतिष्ठेत । इति केचित् । चतुर्भिः सूक्तैः प्रतिदिश-मुपस्थानं कर्तव्यमित्यपरे ।

[4] पशुयागे वपा-पुरोडाश-हवीरूपास्त्रिविधा यागा भवन्ति । तत्र आ ते पितरिति हविषो ऽवसरे पठनीयं सूक्तम् ।

वादिष्म[1]। तथा त्वं नः अस्मान् सूर्यस्य सन्दृशः सन्दर्शनात् मा युयोथाः मा पृथक्कार्षीः। यु मिश्रणामिश्रणयोः [धा० २।२३]। लङि छान्दसः शपः श्लुः। छन्दस्युभयथा [३।४।११७] इत्यार्धधातुकत्वेन ङित्त्वाभावाद् गुणः। अर्वति शत्रौ। भ्रातृव्यो वा अर्वा [तै० स० ६।३।८।४] इति श्रुतेः। नः अस्माकं वीरः वीर्यवान् पुत्रादिः अभि क्षमेत अभिभवतु। यद्वा वीरः त्वं नः अस्मान् अभिक्षमेथाः अस्मान् कृतापराधान् अभिक्षमस्व*। हे रुद्र, प्रजाभिः पुत्रपौत्रादिभिः प्र जायेमहि प्रभूताः स्याम।

सायणः [तै० ब्रा० २।८।९]। हे मरुतां पितः पालक रुद्र ते सुम्नम् त्वया सम्पादितत्वेन त्वदीयं सुखम् आ समन्ताद् एतु अस्मान् प्राप्नोतु। किं च त्वम् अस्मान् सूर्यस्य सन्दृशः सूर्यसम्बन्धिनो दर्शनात् मा युयोथाः मा वियोजय। सूर्यानुगृहीतं चक्षुष्पाटवमस्माकं सर्वदास्त्वित्यर्थः। नः अस्माकं वीरः पुत्रः अर्वति अश्वस्य पृष्ठे अभिक्षमेत सर्वप्रकारेण समर्थोऽस्तु। हे रुद्र, त्वत्प्रसादाद् वयं प्रजाभिः प्रजायेमहि बह्वीः प्रजा उत्पादयामः।

षड्गुरुशिष्यः। हे पितर्मरुतां सुम्नं सुखं तावकमद्वयम्।
संविदेकरसं तन्मामाप्नुयान्मुक्तिलक्षणम्॥
अपि च त्वं प्रसन्नः स्या मा नः सूर्यस्य सन्दृशः।
सन्दृक् सन्दर्शनं तस्माद्यौतिरत्र पृथक्कृतौ॥

---

[1] "पुरा कदाचिदिन्द्रोऽसुराञ्जिगाय। तदानीं दितिरसुरमातेन्द्रहननसमर्थं पुत्रं कामयमाना तपसा पत्युः सकाशाद् गर्भं लेभे। इमं वृत्तान्तमवगच्छन्निन्द्रो वज्रहस्तः सन् सूक्ष्मरूपो भूत्वा तस्या उदरं प्रविश्य तं गर्भं सप्तधा बिभेद। पुनरप्येकैकं सप्तखण्डमकरोत्, ते सर्वे गर्भैकदेशा योनेर्निर्गत्य भृशमरुदन्। एतस्मिन्नन्तरे लीलार्थं गच्छन्तौ पार्वतीपरमेश्वराविमान् ददृशतुः। महेशं प्रति पार्वत्येवमवोचत्। इमे मांसखण्डा यथा प्रत्येकं पुत्राः सम्पद्येरंस्तथा त्वया कार्यं मयि चेत् प्रीतिरस्तीति। स च परमेश्वरस्तान् समानरूपान् समानवयसः समानालङ्कारान् पुत्रान् कृत्वा गौर्यै प्रददौ—तवेमे पुत्राः सन्त्विति। अतः सर्वेषु मारुतेषु सूक्तेषु मरुतो रुद्रपुत्रा इति सूयन्ते।"

* यद्वा वीरो भवान् नोऽस्मान् अभिक्षमेत अस्मान् कृतापराधान् अभिक्षमताम् would be better.

माङि लुङ् लुङ्सिचो द्वित्वं गुणो निर्वचनं त्विदम् ।
युयोथा मा पृथक्कार्षीर्जीवेमाविकलेन्द्रियाः ॥
अपि चार्वति युद्धादौ वीरोऽस्माकं सुतो रिपून् ।
अभिक्षमेताभिभवेज्जायेमहि च सन्ततौ ।
नन्वस्य सर्वतातस्य मरुतां पितृता कथम् ॥
अत्रेतिहासं कथयन्ति विप्रा यथा रुद्रो मरुतां वै पितासीत् ।
इन्द्रस्य शूरस्य वधाय युक्ता दितिस्तु गर्भं लभते स्म भर्तुः ॥
शुश्रूषमाणः किल तामथेन्द्रो मायाविदामग्रणी रन्ध्रदर्शी ।
प्रकीर्णकेशीं तु दितिं प्रसुप्तामालक्ष्य वज्री ह्यणुमात्ररूपः ॥
प्रविश्य कुक्षिं प्रबिभेद गर्भं मा रोद रोदेति वदन्नभीक्ष्णम्* ।
भित्त्वा गर्भं निर्गते वै महेन्द्रे प्रबुद्धा सा प्ररुरोदार्तरूपा ।
अत्रान्तरे त्वन्तरिक्षे तदाभूज्जगज्जनित्री ह्यखिलेशपत्नी ॥
वृषेन्द्रमारुह्य गिरीन्द्रपुत्री सुरेन्द्रवृन्दैरभिवन्द्यमाना ।
नन्द्याहृतैः पङ्कजकुण्डलाद्यैर्हारेण सम्भूषितसर्वदेहा ॥
संसारवृक्षस्य कुठारकेण शशाङ्कचूडामणिमण्डितेन ।
देवेन सार्धं सुरसिद्धसङ्घैः सस्त्रीगणैश्चाप्यभिसेव्यमाना ॥
आर्तध्वनिं साथ दितेर्निशम्य सुराङ्गनानामवलोक्य वृन्दम् ।
दयानिधिः सा च हरं ययाचे मदर्थमेतत् क्रियतां महेश ॥
गर्भं भित्त्वा सप्तधैकैकशस्तु पुनः सप्तभेदतः खण्डराशौ ।
बहूनि खण्डानि तनूनि सन्ति ह्येकैकमेषां भवतां शरीरम् ॥
स्वलङ्कृतास्तव पुत्रा भवन्तु स्युश्चैव सर्वे तरुणाः सदैव ।
मारोदवादान्मृतियोगतो वा समाख्याता मरुतश्चेति शुभ्राः ॥
सख्यं च तैरस्तु सुरेश्वरस्य सुरैरतुल्यं नियतं महेश ।
न ज्येष्ठता नापि कनिष्ठतैषां वेषो वयश्चैव समानमेषाम् ॥

---

* Ṣaḍguruśiṣya has followed the Vedic model in his Trṣṭubh stanzas. We only wish he had not used the expression मा रोद.

स्थानं चैषामन्तरिक्षे सदा स्याद्वर्षस्यैते दायका रक्षकाश्च ।
घृणाङ्घित्वं व्यक्तमेवं ततः स्यान्मयि प्रीतिश्चातुला वै घृणाङ्घे ॥
तथेति देवः प्रतिपन्नवाक्यो देव्या यथोक्तं प्रचकार सर्वम् ।
अथापरे वर्णयन्तीतिहासं यथा रुद्रो मरुतां वै पितासीत् ॥
इमां हि गोरूपधरां तु पृश्निं वृषोऽथ भूत्वारमयन्महेशः ।
अजीजनन्मरुतः पृश्निपुत्रा रुद्रस्य पुत्रा अपि ते बभूवुः ॥
रौद्रेषु मन्त्रेष्वथ मारुतेषु कथाद्वयं श्रूयते तत्र तत्र ।
इत्थं तु सिद्धं मरुतां पितृत्वं जगद्गुरोर्देवदेवस्य शम्भोः ॥

पितर्मरुताम्—A compound vocative expression is unaccented except at the beginning of a sentence or pāda. *Cf.* RV. ii. 34. 2: रुद्रो यद्वो मरुतो रुक्मवक्षसो वृषाजनि पृश्न्याः शुक्र ऊधनि.

सुम्नम्—see notes on नृम्ण p. 161.

सन्दृशः—सम्पदादित्वाद् भावे क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वम्।

युयोथाः—2 s. inj. A. of यु to separate. See pp. 130-31.

वीरः—See p. 36.

अर्वति—विषये सप्तमी. *arvant* steed from *ṛ* to go, (Av. *aurvant*- quick) forms its Nom. sing. in class. Sanskrit as also almost always in the *Veda* from the n-stem *i.e.*, *arvā*; in other numbers and cases the forms are found from *arvat*.

क्षमेत—The root *kṣam* is exclusively bhvādi A in RV. In class. it is divādi P. also. *Cf.* मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी। क्रियासमभिहारेण विराध्यन्तं क्षमेत कः ॥ *Śiś*. II. अभिक्षम् means to be soft-hearted towards, to spare.

प्र जायेमहि—जन् 1 P. A means to generate, प्र-जन् IV. A to multiply oneself.

Acc. to the *Aitareya Brāhmaṇa* (xiii. 10) one should recite त्वं नो वीरो अर्वति क्षमेथाः for अभि नो वीरो अर्वति क्षमेत. Evidently, the author while avoiding the use of अभि changes the परोक्षकृत third verse into प्रत्यक्षकृत also. It would thus appear that acc. to AB,

वीरः refers to Rudra. It is, therefore, not necessary to accept the view of Geldner who translates: May our warrior on horseback be spared. त्वं नो वीरो अर्वति क्षमेथा इति ब्रूयात्राभि न इति। (हे रुद्र, वीरस्त्वं नोऽस्माकम् अर्वति पश्वादिवस्तुनि क्षमेथाः सहिष्णुर्भव। अस्मद्दोयानि पश्वादिवस्तूनि मा विनाशयेत्यर्थः। S.) अनभिमानुको हैव देव प्रजा भवति।

2

त्वाद॑त्तेभी रुद्र॒ शंत॑मेभिः
श॒तं हि॑मा अशीय भेष॒जेभि॑ः।
व्य१॒स्मद्द्वेषो॑ वित॒रं व्यंहो॒
व्यमी॑वाश्चातयस्वा॒ विषू॑चीः ॥२॥

त्वाऽदत्तेभिः। रुद्र। शम्ऽतमेभिः।
शतम्। हिमाः। अशीय। भेषजेभिः।
वि। अस्मत्। द्वेषः। विऽतरम्। वि। अंहः।
वि। अमीवाः। चातयस्व। विषूचीः ॥२॥

With the most salutary (*śáṁtamebhiḥ*) medicines (*bheṣajébhiḥ*) given by you (*tvā'dattebhiḥ*), O Rudra (*Rudra*), I would attain (*aśīya*) a hundred (*śatám*) winters (*himāḥ*). Drive (*cātayasva*) far (*vi*) from us (*asmát*) malice (*dvéṣaḥ*), farther (*vi vitarám*) distress (*áṁhaḥ*), far (*vi*) diseases (*ámīvāḥ*) in all directions (*víṣūcīḥ*).

वेङ्कटः। त्वादत्तेभिः त्वया दत्तैः, हे रुद्र, शन्तमेभिः सुखतमैः भेषजेभिः भेषजैः शतं हिमाः संवत्सरान् अशीय व्याप्नुयाम्। अस्मत् अस्मत्तः शत्रून् वि चातयस्व विचातय पृथक्कुरु, अंहः पापं च वितरं दूरतरम्, एवम् अमीवा राक्षसांश्च विषूचीः नानादिक्कान् इति ॥२॥

हरदत्तः। हे रुद्र, त्वादत्तेभिः त्वया दत्तैः शन्तमेभिः सुखतमैः भेषजेभिः भेषजैः शतं हिमाः शतं संवत्सरान् अशीय जीव्यासम्। द्वेषः द्वितीयान्तमेतद्वहुवचनम्। तथार्थोऽच्छसम्बन्धि। तत् अस्मत् अस्मत्तः। वीत्युपसर्गश्रुतेः सापेक्षत्वात् चातयस्वेति वक्ष्यमाणम् अपेक्ष्यते। विचातयस्व विगमय। न केवलं विचातयस्व। किं तर्हि? वितरं चातयस्व। व्यंहः। अंहः पापम्।

तथापि विचातयस्व। व्यमीवाः रोगजातीश्च। कीदृशीः? विषूचीः। विष्वग् नाना *अश्नन्तीः सर्वशरीरव्यापिनीः ॥२॥

सायणः। हे रुद्र त्वादत्तेभिः त्वया दत्तैः शन्तमेभिः अतिशयेन सुखकरैः भेषजेभिः भेषजैरौषधैः शतं हिमाः शतं हेमन्तान् शतं संवत्सरान् अशीय व्याप्नुयाम्। अश्नोतेर्लिङि छान्दसो विकरणस्य लुक्। अपि च अस्मत् अस्मत्तो द्वेषः द्वेष्टॄन् †वि चातयस्व विनाशय। तथा अंहः पापं वितरम् अत्यन्तं विचातयस्व। अमीवाः रोगान् विषूचीः विषु नाना अश्नन्तीः* कृत्स्नशरीरव्यापकान् रोगान् वि चातयस्व अस्मत्तः पृथक्कृत्य विनाशय ॥२॥

त्वादत्तेभिः—is an aluk compound of *tvā* old instr. sing. of युष्मद् and दत्त, like शुनेषित driven by dogs. *Cf*. iii. 59. 2 न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात्, aided by thee, he is neither killed nor conquered, distress cannot reach him from far or near.

शतं हिमाः—A hundred winters, शतं शरदः a hundred autumns, शतं समाः a hundred summers. *Cf*. i. 111. 4 शतं जीव शरदो वर्धमानः शतं हेमन्ताञ्छतमु वसन्तान्।

अशीय—1. sing. opt. of अश् to attain. See p. 481.

व्य१स्मत्—see p. 131. ví + asmát = vyâsmát; but ví + ámīvāḥ = vyámīvāḥ, because both *i* and *a* are udātta. एकादेश उदात्तेनोदात्तः। स्वरितो वानुदात्ते पदादौ। viii. 2. 5-6.

व्यस्मद् द्वेषो युयवद् व्यंहः May he drive away from us enmity and affliction. RV. vi. 44. 16. सोमारुद्रा वि वृहतं विषूचीममीवा या नो गयमाविवेश। आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा सौश्रवसानि सन्तु॥ Soma and Rudra, expel the widespread sickness that has entered into our dwellings; chase away Nirṛti in the distance, may good reputation be ours. RV. vi. 74. 2.

---

* अश्नतीः—all.

† P. points out that one MS. reads: विचातयस्व पृथक्कुरु। अंहः पापं च वितरं दूरतरं कुरु। अमीवा राक्षसान् विषूचीः नानादिग्गतान्।

वि—see p. 117.

वितरम्—comparative of वि used as an adverb. किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे। अमु च च्छन्दसि। In its origin it is the neut. acc. sing. See under i. 124. 5.

वि—This is for the repetition of the finite verb, whereas वितरम् is used in the sense of class. वितराम्, वि and वितरम् are often used in the same sentence. *Cf.* vi. 1. 11 रेवद्भिरग्ने वितरं वि भाहि, viii. 100. 12 सखे विष्णो वितरं वि क्रमस्व.

अंहः:—Strait, distress.

अमीवाः:—The suffix वन् is added to अम् to injure with the joining vowel ī. The neut. form अमीव is also used. अमीवचातन means 'driving away disease'.

चातयस्वा—metrical lengthening, because in a triṣṭubh stanza the eighth syllable is, as a rule, long. चतति hides. It is read in the list of गत्यर्थक roots in the *Nighaṇṭu*. The caus. चातयति means 'drives out'. चातयतिर्नाशने *Nir.* vi. 30. The causal root is ubhayapadin in RV., though in class. Skt. we expect it to be exclusively Atm. acc. to निगरणचलनार्थेभ्यश्च.

विषूचीः—Acc. pl. fem. of विष्वच् (वि सु and अञ्च् to turn).

3

श्रेष्ठो जातस्य रुद्र श्रियासि	श्रेष्ठः। जातस्य। रुद्र। श्रिया। असि।
तवस्तमस्तवसां वज्रबाहो।	तवःऽतमः। तवसाम्। वज्रबाहो इति वज्रऽबाहो।
पर्षि णः पारमंहसः स्वस्ति	पर्षि। नः। पारम्। अंहसः। स्वस्ति।
विश्वा अभीती रपसो युयोधि ॥३॥	विश्वाः। अभिऽइतीः। रपसः। युयोधि ॥३॥

Thou art (*asi*) in glory (*śriyā'*) the most glorious (*śréṣṭhaḥ*) of what is born (*jātásya*), the strongest (*tavástamaḥ*) of the strong (*tavásām*), O Rudra (*Rudra*), the thunder-armed one

(*vajra-bāho*). Ferry (*párṣi*) us (*naḥ*) across to the further shore (*pārám*) of distress (*áṁhasaḥ*) in safety (*svasti*), drive off (*yuyodhi*) all (*viśvāḥ*) attacks (*abhī'tīḥ*) of mischief (*rápasaḥ*).

वेङ्कटः। श्रेष्ठः जातस्य सर्वस्य भूतजातस्य त्वमेव श्रेष्ठः असि भवसि श्रिया। तवस्तमः वेगवत्तमः तवसाम् वेगवताम् अपि। वज्रबाहो आयुधयुक्तबाहो। स त्वं नः अस्मान् पर्षि पारय अंहसः पापस्य पारम् स्वस्ति अविनाशेन। रपसः पापस्य विश्वाः सर्वाः अभीतीः अभिगतीः युयोधि पृथक्कुरु ॥३॥

हरदत्तः। हे रुद्र, त्वं जातस्य सर्वभूतजातस्य श्रिया श्रेष्ठोऽसि। तवसाम्। तवो वृद्धिः। मतुपो लुग् द्रष्टव्यः। तवस्वताम् तवस्तमः। अत्रापि मतुपो लुक्। तवस्वत्तमः। वृद्धिमतां मध्येऽतिशयेन वृद्धिमान्। हे वज्रबाहो। वज्रम् आयुधम्। पिनाकाद्यायुधहस्त। एवम्भूतस्त्वं नः अस्मान् अंहसः पारं पर्यन्तं पर्षि प्रापय स्वस्ति अविनाशं यथा तथा। रपः पापं तज्जन्योऽनर्थो वा। तस्य या अभीतीः अभिगमनानि ताश्च विश्वा अस्मत्तो युयोधि पृथक्कुरु ॥३॥

सायणः। हे रुद्र, जातस्य उत्पन्नस्य सर्वस्य जगतो मध्ये श्रिया ऐश्वर्येण श्रेष्ठः प्रशस्यतमः असि भवसि। तथा हे वज्रबाहो आयुधहस्त रुद्र तवसाम् प्रवृद्धानां मध्ये तवस्तमः अतिशयेन प्रवृद्धोऽसि। स त्वं नः अस्मान् अंहसः पापस्य पारम् तीरं स्वस्ति क्षेमेण पर्षि पारय*। तथा रपसः पापस्य विश्वाः सर्वाः अभीतीः अभिगमनानि युयोधि पृथक्कुरु। यौतेश्छान्दसः शपः श्लुः। वा छन्दसि [३।४।८८] इत्यपित्त्वस्य विकल्पनान् ङित्त्वाभावे अङितश्च [६।४।१०३] इति हेर्धिः ॥३॥

जातस्य—Since it is a case of निर्धारणे षष्ठी, it must be regarded as plural in sense—among all beings that are born. Skt. *jāta-*, Av. *zāta-*, Lat. *nātu-s*, Gk. *gnōto-s*.

तवस्तमस्तवसाम्—*Cf.* अपसामपस्तमः RV. i. 160. 4.

तवस्तमः—superl. of *tavás* mighty, strong, from *tu* to be strong. *Cf.* Eng. *tumour*. See p. 36.

---

* Did Sāyaṇa, by any chance, write प्रापय ?

वज्रबाहो—The author of the Padapāṭha regards vocatives ending in *o* as pragṛhyas, hence we have इति in the Padapāṭha after the compound and the analysis of the word after इति. But final *o* of vocatives is not regarded as a pragṛhya in the *Saṃhitās*. Thus in the very second hymn of RV. we have वायवायाहि, वायव उक्थेभिः, वायविन्द्रश्च. The epithet वज्रबाहु belongs exclusively to Indra except in this stanza. Skt. *bāhu-ḥ*, Av. *bazu-š* Gk. *pēkhu-s*.

पर्षि—2 sing. pres. ind. of पॄ to ferry across. In RV. there are several present indicative forms with सि added directly to the root which have the sense of the imperative. The root पॄ belongs to the जुहोत्यादिगण but is here conjugated like an भ्वादि root. Similarly, we have आ देवान् वक्षि यक्षि च v. 26. 1, etc. See p. 118.

अंहसः—See p. 117.

स्वस्ति—had not yet crystallized into an indeclinable at the time of the *Vedas*, but contracted instrumental singulars with the final vowel shortened paved the way. See under i. 116. 6.

अभीतीः—Similarly, we have उपेति, प्रतीति, एति, उदिति, समिति etc. As Pp. points out *abhītīḥ*=*abhi itīḥ* acc. to स्वरितो वानुदात्ते पदादौ viii. 2. 6. अभि is आद्युदात्त acc. to उपसर्गाश्चाभिवर्जम् and retains its accent in the compound acc. to तादौ च निति कृत्यतौ vi. 2. 50.

रपसः—रपो रिप्रमिति पापनामनी भवतः *Nir.* iv. 21. पापं व्याधिलक्षणम् S. on x. 97. 10, रोगनिदानभूतं पापम् S. on AV. vi. 91. 1. European scholars generally take it in the sense of bodily injury. प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा। Increase our span of life, rub off all bodily injuries (or sins), avert all enmity and be (our constant) helpers. RV. i. 34. 11.

युयोधि—2. sing imper. of *yu* to separate. See pp. 130-31. The strong radical vowel is irregular. Similarly, we have युयोत, युयोतन, जुहोत, जुहोतन etc. V.G.S. p. 144.

4

मा त्वा रुद्र चुक्रुधामा नमोभि-	मा । त्वा । रुद्र । चुक्रुधाम । नमःऽभिः ।
र्मा दुष्टुती वृषभ मा सहूती ।	मा । दुःऽस्तुती । वृषभ । मा । सऽहूती ।
उन्नो वीराँ अर्पय भेषजेभि-	उत् । नः । वीरान् । अर्पय । भेषजेभिः ।
र्भिषक्तमं त्वा भिषजां शृणोमि ॥४॥	भिषक्ऽतमम् । त्वा । भिषजाम् । शृणोमि ।

May we not (*mā'*), O Rudra (*Rudra*), make thee angry (*cukrudhāma*) with our obeisances (*námobhiḥ*) nor (*mā'*) with bad hymn of praise (*dúṣṭutī*), O bull (*vṛṣabha*), nor (*mā'*) with joint invocation (*sáhūtī*). Raise (*arpaya*) up (*út*) our (*naḥ*) heroes (*vīrā'n*) with medicines (*bheṣajébhiḥ*); I hear (*śṛṇomi*) of thee (*tvā*) as the best physician (*bhiṣáktamam*) of physicians (*bhiṣájām*).

वेङ्कटः । हे रुद्र, नमोभिः नमस्कारैः मा त्वा त्वां चुक्रुधाम क्रोधयाम । मा च दुष्टुती दुःस्तोत्रेण, हे वृषभ, मा च सहूती अन्यैर्देवैः सहूत्या सोमारुद्रा वि वृहतम् [ऋ० सं० ६।७४।२] इत्यादिकया । नः अस्माकम् वीरान् उदर्पय उत्थापय भेषजेभिः भेषजैः । भिषक्तमं त्वा भिषजां शृणोमि वृद्धेभ्य इति ।

हरदत्तः । हे रुद्र, त्वा त्वां वयं नमोभिर्मा चुक्रुधाम । यथा राज्ञो वा राजामात्यस्य वा पृथग्जनेन कृतो नमस्कारः प्रत्युत क्रोधाय भवति तद्वत् सर्वदेवं प्रतीति मन्यमानो गृत्समद एवमाह । क्षुद्रस्यापि मे नमस्तव महेश्वरस्य क्रोधाय मा भूदिति । मा दुष्टुती । तृतीयैकवचनस्य पूर्वसवर्णः । मा च दुष्टया स्तुत्या त्वां चुक्रुधाम । हे वृषभ वर्षितः वृषभवत् प्रसह्यकारिन्, मा सहूती मा देवतान्तरैरग्नीन्द्रादिभिः सहाह्वानेन चुक्रुधाम । नः अस्माकं वीरान् भेषजैः उदर्पय सम्बन्धय । त्वामहं भिषजां मध्ये भिषक्तमं शृणोमि ॥४॥

सायणः। हे रुद्र, त्वा त्वां नमोभिः अयथाक्रियमाणैर्नमस्कारैः, हविर्भिर्वा मा चुक्रुधाम मा क्रोधयाम, क्रुद्धं मा कार्ष्म। क्रुध कोपे [धा० ४।८१]। अस्माण्ण्यन्ताल्लुङि चङि रूपम्। हे वृषभ कामानां वर्षितः दुष्टुती दुःस्तुत्या अशोभनया स्तुत्या मा चुक्रुधामेत्येव। तथा सहूती सहूत्या विसदृशैरन्यैर्देवैः सहाह्वानेन मा क्रोधयाम। श्रेष्ठो हि स्वस्मान्न्यूनेन सहाह्वाने क्रुद्धो भवति। स त्वम् नः अस्माकं वीरान् पुत्रान् भेषजेभिः त्वदीयैर्भेषजैः औषधैः उत् अर्पय उत्कृष्टं संयोजय। हे रुद्र, त्वां त्वां भिषजाम् चिकित्साभिज्ञानां मध्ये भिषक्तमम् अतिशयेन भैषज्यस्य कर्तारं शृणोमि। प्रथमो दैव्यो भिषक् [तै० सं० ४।५।१।२, वा० स० १६।५] इति च मन्त्रान्तरेऽप्युक्तम्॥४॥

मा—The prohibitive particle मा is used with the injunctive in RV. and aorist in class. Skt. Sāyaṇa's मा क्रोधयाम, therefore, is open to objection. Grammarians get over the difficulty by regarding the particle here as मा and not माङ्.

चुक्रुधाम—1. pl. redupl. aor. of क्रोधि. Metrical lengthening as in चातयस्वा 2*d*.

नमोभिः—चङ्क्रैकाल्ययुक्तैः पूजनैः।

दुष्टुती—contracted instr. s. of दुष्टुति. When a sibilant after a final visarga is followed by a hard mute the visarga is dropped in RV., VS., TS., etc. ऊष्मघोषोदये लुप्यते परे नतेऽपि। ऋ० प्रा० ४.३६। The school of Pāṇini makes the rule optional. खर्परे शरि वा विसर्गलोपो वक्तव्यः. *Cf.* चनिष्टृतः for चनिःस्तृतः. दुष्टुति is 'damning with faint praise' etc., injudicious praise.

सहूती—contracted ins. s. of सहूति. "इतिराकरणाह्वानम्" In i. 93. 9 सहूती is a dual and so we find in the pada-text सहूती इति सहूती.

वीरां अर्पय—See p. 27. भेषजेभिः—See p. 30.

भिषक्तमम्—In Sanskrit any part of speech may admit of degrees of comparison.

5

हवीमभिर्हवते यो हविर्भि-	हवीमऽभिः | हवते | यः | हविःऽभिः ।
रव स्तोमेभी रुद्रं दिषीय ।	अव | स्तोमेभिः | रुद्रम् | दिषीय ।
ऋदूदरः सुहवो मा नो अस्यै	ऋदूदरः | सुऽहवः | मा | नः | अस्यै ।
बभ्रुः सुशिप्रो रीरधन्मनायै ॥५॥	बभ्रुः | सुऽशिप्रः | रीरधत् | मनायै ॥५॥

With songs of praise (*stómebhiḥ*) I would buy off (*áva diṣīya*) Rudra (*Rudrám*) who (*yáḥ*) is called on (*hávate*) with invocations (*hávīmabhiḥ*) and oblations (*havirbhiḥ*). May the soft-hearted (*ṛdūdáraḥ*), easy to invoke (*suhávaḥ*), ruddy brown (*babhrúḥ*) fair-lipped (*suśipraḥ*) [Rudra] not (*mā*) subject (*rīradhat*) us (*naḥ*) to that wrath of his (*asyái manā'yai*).

वेङ्कटः । हवीमभिः होमयोग्यैः हविर्भिः सह यः हवते आहूयते तं रुद्रं स्तोमैः अवदिषीय । पृथक्करोम्यस्मत् । "ऋदूदरः सोमः, मृदूदरः" इति यास्कः । सुहवः स्वाह्वानः मा नः अस्मान् अस्यै मनायै पुरुषान्मन्यमानायै रीरधत् वशं नयतु । अस्य बुद्धिः सर्वानमन्यत इति । बभ्रुः बभ्रुवर्णः । सुशिप्रः सुहनुः ॥५॥

हरदत्तः । हवीमभिः हवनयोग्यैः हविर्भिः हवते । व्यत्ययेनायं *कर्मणि कर्तृप्रत्ययः । हूयते यः । चतुर्थ्यर्थे प्रथमा । यस्मै हवीमभिर्हविर्भिर्हूयते । तं रुद्रम् । स्तोमेभिः स्तोत्रैः अवदिषीय । दैप् शोधने [धा० १।९०७] इत्यस्याशिषि लिङ् । छान्दसमात्मनेपदमित्त्वं च । अवदातं कृषीय । स च रुद्र ऋदूदरः मृदूदरः, ऋजूदरो वा । मलोपो जकारो वा छान्दसः । तथावग्रहाभावः । सुहवः स्वाह्वानः । बभ्रुः बभ्रुवर्णो भर्ता वा जगताम् । सुशिप्रः शिप्रे हनू नासिके वा [नि० ६।११], उत्तरोष्ठस्योपरि श्मश्रुश्रेणिर्वा । पीत्वी शिप्रे अवेपयः

* The printed book reads भावे

[ऋ० सं० ८।७६।१०] इत्यादौ दर्शनात्। मृगयादिव्यापारे हिरण्मयी केशनियमनरज्जुर्वा शिप्रा। दृश्यते च शिप्राः शीर्षसु वितता हिरण्ययीः [ऋ० सं० ५।५४।११] इति। ताः शोभना अस्येति सुशिप्रः। एवम्भूतो रुद्रः नः अस्मान् अस्यै प्रसिद्धायै मनायै। अनभिमानुको हैष देवः प्रजा भवति [ऐ० ब्रा १३।११] "यस्य रुद्रः प्रजां पशून् वाभिमन्यते" इत्यादावभिपूर्वको मन्यतिः कोपहृष्टौ दृष्टः। स एवायमभिरहितः। भिदादिषु दर्शनात् स्त्रियां भावेऽङ्। मा रीरधत्। रन्धयतिर्वशीकरणकर्मा। दृश्यते हि द्विषन्तं मह्यं रन्धयन् [ऋ० सं० १।५०।१३] इति। स्वस्यै शत्रूणां वा कोपहृष्ट्यै मास्मान् वश्यान् कार्षीदिति।

सायणः। यः रुद्रः हविर्भिः चरुपुरोडाशादिसहितैः हवीमभिः आह्वानैः स्तुतिलक्षणैः हवते आहूयते स्तूयते। व्यत्ययेन कर्मणि कर्तृप्रत्ययः। बहुलं छन्दसि [६।१।३४] इति ह्वयतेः सम्प्रसारणम्। तं रुद्रम् स्तोमेभिः स्तोत्रैः अवदिषीय अवखण्डयामि पृथक्करोमि। अपगतक्रोधं करोमीति यावत्। दो अवखण्डने [धा० ४।४०]। व्यत्ययेनात्मनेपदम्। बहुलं छन्दसि [७।४।७८] इतीत्वम्। ऋदूदरः। ऋदूदरो मृदूदरः [नि० ६।४] इति यास्कः। सुहवः शोभनाह्वानः बभ्रुः भर्ता सर्वस्य बभ्रुवर्णो वा। सुशिप्रः। शिप्रे हनू नासिके वा [नि० ६।१७]। शोभनशिप्रः। एवंगुणविशिष्टः स रुद्रः अस्यै मनायै। हन्मीति मन्यमाना बुद्धिर्मना। तस्यै नः अस्मान् मा रीरधत् मा वशं नैषीत्। रध हिंसासंराद्ध्योः [धा० ४।८५][1]। अस्माण्ण्यन्ताल्लुङि चङि रूपम्। रध्यतिर्वशगमने [नि० ६।३२] इति यास्कः ॥५॥

हवीमभिः—हवीमन् from *hū* to call with *-man* with connecting *-ī-*. Similar other words are भरीमन् maintenance, वरीमन् expanse, etc. ह्वेञ् स्पर्धायां शब्दे च इत्यस्मादौणादिक ईमनिन्प्रत्ययः। बहुलं छन्दसि [६।१।३४] इति धातोः सम्प्रसारणं परपूर्वत्वं गुणावादेशौ।

हवते—There is hardly any doubt that हवते is used in the sense of हूयते, still Geldner takes it in the active sense and translates:

---

1 S. adds संराद्धिः पाक इति तद्वृत्तिः under x. 128. 5.

"He who calls on (him) with invocations and oblations (thinks) I would buy off Rudra with songs of prayer." It may be mentioned in this connexion that Geldner is inclined to assign a passive sense to *kṣameta* in stanza 1.

दिषीय—1. s. s-aor. opt. A. of दा. Pāṇini makes provision for धिषीय in his rule सुधित-वसुधित-नेमधित-धिष्व-धिषीय च vii. 4. 45, but not for दिषीय. दिषीय occurs only once in RV., but धिषीय does not occur either in RV. or in AV., but only in the *Brāhmaṇas* and *Sūtras*.

ऋदूदरः—may be regarded as a compound of ऋदु and उदर or ऋदु and दर. In the first case it will be a Bah. compound and the accent will be like that of *kṛdhukarṇáḥ* in x. 27. 5; in the second it will be an Upapada compound and accented like पुरन्दर on the final syllable. Now *ṛdu* is evidently formed with *-u* from the root *ṛd* 'to stir', 'dissolve' which later became *ard*. So *ṛdu* may mean either 'soft' 'pleasant' (cf. *ārdra*) or 'troublesome, inimical'. So *ṛdūdara* (Bah.) will mean 'soft-bellied, mild-hearted, compassionate' and *ṛdūdara* (Upapada) will mean 'tearing up the troublesome enemy'. Probably it is not analysed in the pada-text owing to a doubt as to whether it is a Bah. or an Upapada. Haradatta thinks that the absence of avagraha is due to the change of मृदु or ऋजु into ऋदु. ऋदूवृधा, ऋदूपा, पुरन्दर and वपोदर are all analysed in Pp. Yāska explains ऋदूदर as मृदूदर in *Nir.* The word occurs in two other passages of RV:

इमं स्तोमं रोदसी प्र ब्रवीम्यृदूदराः शृण्वन्नग्निजिह्वाः ।

मित्रः सम्राजो वरुणो युवान आदित्यासः कवयः पप्रथानाः ॥ iii. 54. 10

and ऋदूदरेण सख्या सचेम viii. 48. 10. ऋदूपा and ऋदूवृध् occur in viii. 77. 11 तुविक्षं ते सुकृतं सूमयं धनुः साधुर्बुन्दो हिरण्ययः । उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिदृदूवृधा ॥

रीरधत्—3. s. inj. redupl. aor. of रध् to make subject.

मनायै—*manā* suspicion, anger. Gk. *mēnis* from the same root means 'wrath'.

6

उन्मा ममन्द वृषभो मरुत्वा-	उत् । मा । ममन्द । वृषभः । मरुत्वान् ।
न्त्वक्षीयसा वयसा नाधमानम् ।	त्वक्षीयसा । वयसा । नाधमानम् ।
घृणीव च्छायामरपा अशी-	घृणिऽइव । छायाम् । अरपाः । अशीय ।
या विवासेयं रुद्रस्य सुम्नम् ॥६॥	आ । विवासेयम् । रुद्रस्य । सुम्नम् ॥६॥

The bull (*vṛṣabháḥ*) with the hosts of Maruts (*marútvān*) has inspired (*út mamanda*) me (*mā*), the suppliant (*nā'dhamānam*) with his most vigorous (*tvákṣīyasā*) strength (*váyasā*). Free from disease (*arapā'ḥ*) I would attain (*aśīya*) [his favour] like shade in heat (*chāyā'm ghṛ'ṇīva*). I would win (*ā' vivāseyam*) the favour (*sumnám*) of Rudra (*Rudrásya*).

वेङ्कटः । उत् ममन्द उन्मन्दितवान् वृषभः कामानां वर्षिता मरुत्वान् मरुद्भिः सहितः त्वक्षीयसा दीप्तेन वयसा हविषा नाधमानम् याचमानम् । घृणीव यथा घर्मगृहीतं भूतं छायाम् अश्नुते एवम् अरपा अहमपि सुम्नं सुखम् अशीय प्राप्नुयाम् । आविवासेयम् अस्य रुद्रस्य सुम्नम् सुखम् अधिष्ठानमाविवासः ।

हरदत्तः । वृषभो मरुत्वांश्च रुद्रः त्वक्षीयसा । तक्षू त्वक्षू तनूकरणे [१।६४५-६] । तृजन्तादीयसुन् । अत्यन्तं तनूभूतेन वयसोपलक्षितम् । नाधमानं याचमानम्, वय[1] इति गम्यते । एवम्भूतं माम् उन्ममन्द । मदि स्तुतिमोदस्वप्नगतिषु* [धा० १।१३] । अन्तर्भावितण्यर्थः, ण्यन्त एव वा । लोडर्थे लिट् । उन्मादयतु उत्कृष्टमोदं करोतु । उन्मोदितश्चाहम् अरपाः अपापः अनर्थरहितो वा भूत्वा अशीय अश्नुवीय । किम्? तमेव रुद्रम् । घृणीव छायाम् यथा घर्माभितप्तश्छायामश्नुते तद्वत् । प्राप्य च रुद्रस्य यत् सुम्नं स यद् भक्तेभ्यः करोति तद् आविवासेयम् तेनात्मानमाच्छादयेयम्, तदनुभवेयम् ॥६॥

---

1 चयम्

* *Mādhavīya Dhātuvṛtti* reads मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु.

सायणः। वृषभः कामानां वर्षिता मरुत्वान् मरुद्भिः पुत्रैर्युक्तो रुद्रः नाधमानम् याचमानं मा मां त्वक्षीयसा दीप्तेन वयसा अन्नेन उत् ममन्द उत्कर्षेण तर्पयतु। अपि चाहं घृणीव छायाम् यथा सूर्यकिरणसन्तप्तश्छायां प्रविशति, एवं रुद्रस्य सुम्नम् सुखम् अरपाः अपापः सन् अशीय व्याप्नुयाम्। तदर्थं तं रुद्रम् आ विवासेयम् परिचरेयम्। विवासतिः परिचरणकर्मा ॥६॥

ममन्द—मन्द is a nasalized form of मद् to bubble, to glow, to gladden. Gk. *mad-aō* be moist, Lat. *mad-ēre* be soaked, full, drunk. मन्द्र pleasant, agreeable, charming.

मरुत्वान्—generally refers to Indra who has the Maruts for his allies; sometimes it is applied to Rudra, as here, for Rudra is the father of the Maruts. This final *n* is not changed into anusvāra and *s*, because it was not originally *ns*.

त्वक्षीयसा—VM. and S. paraphrase it with दीप्तेन, we should rather say दीप्ततरेण or सुदीप्तेन or अतिदीप्तेन, as the comparative suffix *-īyasun* has been added direct to the root त्वक्ष् acc. to modern scholars or to त्वष्टृ acc. to Indian grammarians. Acc. to *Nir.* viii. 14 त्वक्ष् means to make (त्वक्षतेर्वा स्यात् करोतिकर्मणः). In the *Nighaṇṭu* त्वक्षस् is read in the list of बलनाम.

वयसा—See p. 34. *Váyas* force, strength, cognate with *vī-rá*; then the time of strength, *i.e.*, youth, marriageable age, then by generalisation, age.

नाधमानम्—See p. 304.

घृणीव—The exact meaning of this expression is doubtful. Indian commentators are unanimous in taking घृणी in the sense of घर्मार्तः, but that goes against the Padapāṭha and is an outrage on grammar, for if the possessive suffix *-in* be added to घृणा or घृणि the nom sing. will be अन्तोदात्त, so in घृणीव the second syll. will be an independent svarita and the first syll. will lose its accent. Pp. analyses घृणीव as घृणिऽइव. अक्षीव iii. 45. 4 is, however, analysed अक्षीऽइव. Some scholar are inclined to take घृणि as a contracted

instr. sing., but घृणि is not fem. in RV. A comparison of our passage with RV. vi. 16. 38 उप च्छायामिव घृणेरगन्म शर्म ते वयम् 'we have come to your shelter like shade from heat' appears to show that घृणि is used here for घृणेः.

आ विवासेयम्—विवास is the desiderative of वन् to win and means literally 'seek to win'. In the *Nighaṇṭu* विवासति is read in the list of roots meaning परिचरण or worship. विवासति: परिचर्यायाम् *Nir*. xi. 23.

7

क्वा१ स्य ते रुद्र मृळयाकु-	क्व | स्यः | ते | रुद्र | मृळयाकुः ।
र्हस्तो यो अस्ति भेषजो जलाषः ।	हस्तः | यः | अस्ति | भेषजः | जलाषः ।
अपभर्ता रपसो दैव्य-	अपऽभर्ता | रपसः | दैव्यस्य ।
स्याभी नु मा वृषभ चक्षमीथाः ॥७॥	अभि | नु | मा | वृषभ | चक्षमीथाः ।

Where (*kvá*), O Rudra (*Rudra*), is that (*syáḥ*) gracious (*mṛḷayā́kuḥ*) hand (*hástaḥ*) of thine (*te*), which (*yáḥ*) is (*ásti*) healing (*bheṣajáḥ*) and cooling (*jálāṣaḥ*). Remover (*apabhartā́*) of maladies (*rápasaḥ*) coming from the gods (*dáivyasya*), now (*nú*) be merciful towards (*abhí cakṣamīthāḥ*) me (*mā*), O bull (*vṛṣabha*).

वेङ्कटः । क्व स्यः सः ते रुद्र मृळयाकुः सुखयिता हस्तः यः अस्ति विद्यते भेषजः भैषज्यकृत् जलाषः सुखकरः । अपभर्ता अपहर्ता रपसः पापस्य दैव्यस्य देवकृतस्य । वृषभ ! ताद्दश ! त्वं मा माम् नु अत्यन्तम् अभिचक्षमीथाः अभिक्षमस्व ।

हरदत्तः । हे रुद्र, क्व ते स्यः स हस्तः । कीदृशः ? मृळयाकुः सुखयिता । यो वर्तते जलाषः भेषजः । तद्धस्ययं तदुपचारः । सुखरूपेण भेषजेन तद्वान् । दैव्यस्य देवसम्बन्धिनस्तैः क्रियमाणस्य तेषां वासुरैः क्रियमाणस्य रपसः अनर्थ-

स्यापहर्ता। एवम्भूतस्ते स हस्तः क्व। नाहं तेन स्पृश्ये। तेन मां स्पृश येन स्पृष्टोऽहमपापः स्याम्। यथोक्तं महाभारते [३।४०।२५]—

स्पृष्टस्य त्र्यम्बकेणाथ फल्गुनस्यामितौजसः।
यत्किञ्चिदशुभं देहे तत्सर्वं नाशमीयिवत्* ॥

इति। स्पृष्ट्वा च नु क्षिप्रं मां हे वृषभ अभिचक्षमीथाः। अभिः सर्वतोभावे। सर्वत्र समर्थं कुरु। सर्वपुरुषार्थक्षमं कुरु।

सायणः। हे रुद्र, ते तव मृळयाकुः सुखयिता स्यः सः हस्तः क्व कुत्र वर्तते। यः हस्तः भेषजः भैषज्यकृत् जलाषः सर्वेषां सुखकरः अस्ति भवति। स हस्तो विद्यत एव। तेन हस्तेन मां रक्षेति भावः। अपि च हे वृषभ कामानां वर्षितः दैव्यस्य देवकृतस्य रपसः पापस्य अपभर्ता अपहर्ता विनाशयिता भूत्वा कृतापराधं मा मां नु क्षिप्रम् अभिचक्षमीथाः अभिक्षमस्व। क्षमूष् सहने [धा° १।४३८]। लिटि छान्दसः शपः श्लुः। बहुलं छन्दसि [७।३।९७] इतीडागमः ॥७॥

क्व स्यः:—See p. 131. स्यः:—p. 63.

मृळयाकुः:—The agent suffix *-āku* is added to मृळय the caus. of मृड् to be gracious. *Cf.* पृदाकु and इक्ष्वाकु.

भेषजः:—is an adj. meaning 'healing' (fem. *bheṣajī*) as also a neuter noun meaning 'medicine'. Pāṇini mentions the adj. in his rule केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च iv. 1. 30. *Cf.* RV. x. 137. 6: आप इद्वा उ भेषजीरापो अमीवचातनीः। आपः सर्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम् ॥ The waters are healing, they drive away disease, the waters are healing for all, let them make medicines for thee.

जलाषः:—is read in *Nigh*. i. 12 in the list of उदकनाम's and in iii. 6 in the list of सुखनाम's. The compd. जलाषभेषज occurs in RV.

* Printed Har. has एयिवत् for ईयिवत्.

i. 43. 4 where S. says: जनो प्रादुर्भावे। जायत इति जाः। अन्येष्वपि दृश्यते [३।२।१०१] इति इग्रियहणात् केवलादपि ड-प्रत्ययः। लष कान्तौ। कान्तिरभिलाषः। भावे घञ्। जानां लाषो यस्मिन् तत् जलाषं सुखम्। Why not say जललाष became जलाष by Haplology? *Cf*. RV. viii. 29. 5. तिग्ममेको बिभर्ति हस्त आयुधम्। शुचिरुग्रो जलाषभेषजः॥ He bears in his hand a sharp weapon, (he is) bright, fierce and possessed of cooling medicines.

अपभर्ता—ग्रहोर्भश्छन्दसि हस्य viii. 2. 32. 1.

दैव्यस्य—वाच्यो देव्यः पाञ्चजन्यो गाम्भीर्यं च ञ्य इष्यते। iv. 3. 60. 3.

8

प्र बभ्रवे वृषभाय श्वितीचे	प्र | बभ्रवे | वृषभाय | श्वितीचे।
महो महीं सुष्टुतिमीरयामि।	महः | महीम् | सुऽस्तुतिम् | ईरयामि।
नमस्या कल्मलीकिनं नमोभि-	नमस्य | कल्मलीकिनम् | नमःऽभिः।
र्गृणीमसि त्वेषं रुद्रस्य नाम ॥८॥	गृणीमसि | त्वेषम् | रुद्रस्य | नाम ॥८॥

To the ruddy brown (*babhrávé*) whitish (*śvitīcé*) bull (*vṛṣabhā'ya*) I send forth (*prá īrayāmi*) a nice hymn of praise (*suṣṭutím*) which is mightier than the mighty (*maháḥ mahī'm*). Worship (*namasyā'*) the brilliant one (*kalmalīkinam*) with prostrations (*námobhiḥ*); we glorify (*gṛṇīmási*) the terrible (*tveṣám*) name (*nā'ma*) of Rudra (*Rudrásya*).

वेङ्कटः। प्रेरयामि बभ्रवे वृषभाय वर्षित्रे श्वितीचे श्वेतिमानमञ्चते महो महीम् महतोऽपि महतीम् सुष्टुतिम् सुस्तुतिम्। नमस्य नमस्यत नमोभिः नमस्कारैः कल्मलीकिनम् दीप्तम्। ज्वलन्नामसु पठितं कल्मलीकिनम् इति [निघ॰ १।१७]। उज्ज्वलम्। गृणीमसि उच्चारयामः त्वेषं दीप्तं रुद्रस्य नाम नामधेयम्।

हरदत्तः। बभ्रवे। बभ्रुः कपिलपिङ्गलः, स्वभावतस्तद्वर्णाय। वृषभाय वर्षित्रे, वृषभवत् प्रसह्यकारिणे वा। श्वितीचे। श्वेतो वर्णः श्वितिः। ताम् अञ्चति

गच्छतीति श्वित्यङ्। दृश्यते चान्यत्रापि—श्वित्यञ्चो मा दक्षिणतस्कपर्दाः [ऋ० सं० ७।३३।१], शुक्रा कृष्णादजनिष्ट श्वितीची [ऋ० सं० १।१२३।९] इति। तस्मै भस्मोद्धूलनेन श्वेतवर्णभाजे। एवम्भूताय रुद्राय। महो महीं महतोऽप्याकाशादेर्महतीं सुष्टुतिं शोभनां स्तुतिं प्रेरयामि उच्चारयामि। नमस्य नमस्कुरु हे मदीयान्तरात्मन्! कल्मलीकिनम्। ज्वलतो नामधेयमिदम्। तेजसा ज्वलन्तं रुद्रस्य त्वेषं दीप्तम् अतिप्रसिद्धं नाम शिवो रुद्र इत्यादि। नमोभिः नमस्कारैः सह गृणीमसि गृणीमः उच्चारयामः—नमो रुद्राय नमः शिवायेति ॥८॥

सायणः। [1]रुद्रदेवत्ये पशौ वपा-पुरोडाश-हविषां क्रमेण प्र बभ्रवे इत्याद्यास्तिस्रो याज्याः। प्र बभ्रवे वृषभाय श्वितीच इति तिस्र आ पश्चातान्नासत्या पुरस्तात् [आ० श्रौ० ३।८।१] इति।

बभ्रवे विश्वस्य भर्त्रे बभ्रुवर्णाय वा वृषभाय कामानां वर्षित्रे तद्वत्प्रसह्यकारिणे वा श्वितीचे श्वैत्यमञ्चते। श्विता वर्णे [धा० १।७२९]। औणादिक इन्प्रत्ययः। श्वितिमञ्चतीत्यञ्चतेः ऋत्विग्° [३।२।५९] इत्यादिना क्विन्। चतुर्थ्येकवचने अचः [६।४।१३८] इत्यकारलोपे चौ [६।३।१३८] इति दीर्घत्वम्। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्। एवंगुणविशिष्टाय रुद्राय महः महीम् महतोऽपि महतीम् सुष्टुतिम् शोभनस्तुतिं प्र ईरयामि प्रकर्षेणोच्चारयामि। हे स्तोतः कल्मलीकिनम्। ज्वलतो नामधेयम् [नि० १।१७]। ज्वलन्तम्। कलयति अपगमयति मलमिति कल्मलीकं तेजः। तद्वन्तं रुद्रं नमोभिः नमस्कारैः हविर्भिर्वा नमस्य पूजय। वयं च रुद्रस्य महादेवस्य त्वेषं दीप्तं नाम गृणीमसि गृणीमः संकीर्तयामः। गॄ शब्दे [धा° ९।२७]। क्रैयादिकः। इदन्तो मसि [७।१।४६]। प्वादीनां ह्रस्वः [७।३।८०] ॥८॥

---

[1] प्र बभ्रवे वृषभाय श्वितीच इति तिस्रः [आ० श्रौ० सू० ३।८।१] इत्यत्र तिस्र इति कथनेन वपा-पुरोडाश-हविषामेता याज्या इति प्रतीयते, पशुयागे हि वपापुरोडाशहवीरूपास्त्रिविधा यागा भवन्ति। तत्र त्रिषु यागेषु तिस्रोऽनुवाक्याः "मळा ते रुद्रेत नो मयस्कृधीति द्वे आ ते पितर्मरुतां सुम्नमेतु" इति पूर्वमुक्ता तिस्रो याज्या उच्यन्ते। आ पश्चातान्नासत्या पुरस्तात् [७।१२।५] इत्याश्विने पशोर्वपाया अनुवाक्या।

श्वितीचे—dat. s. m. of श्वित्यच् (fem. श्वितीची) from श्विति (akin to Eng. *white*, *cf.* श्वेत, श्वित्र) and अच् to go which serves the purpose of a suffix like *-ward* in such cases. Siva, the later representative of Rudra, is also रजतगिरिनिभ.

महो महीम्—'a mighty eulogy of the mighty one' (MACDONELL).

नमस्या—I follow Pp. in taking नमस्या as the Imper. 2. s. and regarding the lengthening as metrical. *Cf.* viii. 42. 2: एवा वन्दस्व वरुणं बृहन्तं नमस्या धीरममृतस्य गोपाम्. So praise the great Varuṇa and make obeisance to the wise protector of immortality. In view of the fact that the third syll. in a Triṣṭup stanza may be either long or short as also of the fact that the verbs in both the preceding and following Pādas are used in the 1st pers., Prof. Macdonell prefers to regard the word as 1st. sing. subj. and translates: I will adore, etc.

जलाषीतिमत्म्—is mentioned among the synonyms of ज्वलत् in *Nigh.* i. 17. It appears to be an onomatopoetic word like झल्मल्, झक्मक्, etc. in Bengali.

त्वेष—is formed, as the accent on the final syll. shows, with the agent suffix अच् from त्विष् to be stirred and means impetuous, vehement, terrible, glittering, dazzling. Gk. *seismo-s* (Skt. *त्वेष्मः) earthquake is from the same root which is found without the s-extension in Av. *upā-thwayeiti* is frightened. त्वेषसन्दृक् of fierce aspect, त्वेषप्रतीक of glittering appearance, त्वेषद्युम्न of fiery spirit, त्वेषनृम्ण of dazzling manliness.

गृणीमसि—accented as beginning the pāda. In i. 42. 10 न पूषणं मेथामसि सूक्तैरभि गृणीमसि etc. it is unaccented. The root is read in the list of अर्चतिकर्म roots in the *Nighaṇṭu*. *Nir.* iii. 5 says गृणाति: स्तुतिकर्मणः. The *Dhātupāṭha* has गॄ शब्दे as Par. Av. *gar-*, Eng. *call*. For the ending *-masi* see p. 249. In Av. *-mahi* alone is used as the Par. primary ending.

9

स्थिरेभिरङ्गैः पुरुरूप उग्रो	स्थिरेभिः । अङ्गैः । पुरुऽरूपः । उग्रः ।
बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।	बभ्रुः । शुक्रेभिः । पिपिशे । हिरण्यैः
ईशानादस्य भुवनस्य भूरे-	ईशानात् । अस्य । भुवनस्य । भूरेः ।
र्न वा उ योषद्रुद्रादसुर्यम् ॥९॥	न । वै । ऊँ इति । योषत् । रुद्रात् । असुर्यम् ॥

With firm (*sthirébhiḥ*) limbs (*áṅgaiḥ*), of many forms (*pururū'paḥ*), the mighty (*ugráḥ*) ruddy brown (*babhrúḥ*) [Rudra] has adorned himself (*pipiśe*) with golden ornaments (*hiraṇyaiḥ*). From the ruler (*ī'śānāt*) of this (*asyá*) great (*bhū'reḥ*) world (*bhúvanasya*), from Rudra (*Rudrā't*) may his divine dignity (*asuryâm*) verily never (*ná vái u*) depart (*yoṣat*).

वेङ्कटः । स्थिरेभिः दृढैः अङ्गैर्युक्तः पुरुरूपः बहुरूपः उग्र उद्गूर्णः बभ्रुः बभ्रुवर्णः । शुक्र' शोचतेर्ज्वलतिकर्मणः [नि° ८।११] । दीप्तैः आभरणैः पिपिशे अङ्गानि संयोजयति । हिरण्यैः हिरण्मयैः । अस्य सर्वस्य भूरेः बहोः भुवनस्य ईशानात् ईश्वरात् अस्मात् न योषत् पृथग्भवतु असुर्यम् असुराणां हन्तृ रूपमिति ।

हरदत्तः । पुरुरूपो रुद्र उग्रोऽनभिभवनीयः बभ्रुर्बभ्रुवर्णः शुक्रेभिः शुक्लैः दीप्तैः स्थिरेभिरङ्गैः हिरण्यैः हिरण्यवदुज्ज्वलैर्हिरण्मयैर्वा पिपिशे दीप्यते । नक्षत्रेभिः पितरो द्यामपिंशन् [ऋ० सं० १०।६८।११] इति दृश्यते । अत्रैकवाक्यताप्रसिद्ध्यर्थं यत्तदावध्याहार्यौ । य एवं पिपिशे तस्मादस्य भुवनस्येशानाद् भूरेः सर्वप्रकारं प्रभूताद्रुद्रात् असुर्यं बलं न वा उ योषत् । वै प्रसिद्धौ । उः पदपूरणः । यौतिः पृथग्भावे । न खलु कदाचिदपि तस्माद् बलं वियुतं भवति, सर्वदैवासौ बलवानिति ॥९॥

सायणः । स्थिरेभिः स्थिरैर्दृढैः अङ्गैः अवयवैर्युक्तः पुरुरूपः अहमूर्त्यात्मकैर्बहुभी रूपैरुपेतः उग्रः उद्गूर्णस्तेजस्वी बभ्रुः भर्ता बभ्रुवर्णो वा रुद्रः शुक्रेभिः

दीप्तैः हिरण्यैः हिरण्मयैर्हितरमणीयैर्वालङ्कारैः पिपिशे दीप्यते। पिश अवयवे [धा० ६।१५३]। कर्मणि लिट्। ईशानात् ईश्वरात् अस्य भुवनस्य भूतजातस्य भूरेः भर्तुः रुद्रात् असुर्यम्। असु क्षेपणे [धा० ४।१०१]। असेरुरन् [उ० १।४१]। असुरः क्षेप्ता। तत्र साधुः [४।४।९८] इति यत्। असुर्यं बलम् न वै उ योषत् नैव पृथग्भवति। यौतेर्लेट्यडागमः। सिब्बहुलं लेटि [३।१।३४] इति सिप्।

। अर्कैः—उपलक्षणे तृतीया।

पिपिशे—The root पिश् means to adorn, Ātm. to adorn oneself. It is found in the *pic* of *picture*. Gk. *poikilos* variegated. पेशस् form, colour. Av. *paēsa* m., *paesah* n. ornament. पुरुपेशस् multi-form (Goth. *filu-fáihs*). Skt. *peśala* ornamented.

योषत्—3. s. s-aor. injunc. of यु to separate.

असुर्यम्—Acc. to commentators, Pāṇini's rule असुरस्य स्वम् iv. 4. 123 makes provision for the adj. असुर्य as in असुर्यं पात्रम्, but an adjective can be easily used as a noun. *Cf.* ii. 1. 6: त्वमग्ने रुद्रो असुरो महो दिवः thou, Agni, art Rudra, the great spirit of the sky; RV. v. 42. 11 तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य। यक्ष्वा मह्ये सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य॥ And praise him who has good arrows and a good bow, who rules over all remedies. Worship Rudra for his great goodwill, worship the spirit divine with obeisances.

10

अर्हन्बिभर्षि सायकानि ध-	अर्हन् । बिभर्षि । सायकानि । धन्व ।
न्वार्हन्निष्कं यजतं विश्वरूपम्।	अर्हन् । निष्कम् । यजतम् । विश्वऽरूपम् ।
अर्हन्निदं दयसे विश्वमभ्वं	अर्हन् । इदम् । दयसे । विश्वम् । अभ्वम् ।
न वा ओजीयो रुद्र त्वदस्ति ॥१०॥	न । वै । ओजीयः । रुद्र । त्वत् । अस्ति ॥१०॥

Worthy (*árhan*), thou bearest (*bibharṣi*) arrows (*sā́'yakāni*) and a bow (*dhánva*), worthy (*árhan*) thou wearest an adorable (*yajatám*) and omniform (*viśvárūpam*) necklace (*niṣkám*), worthy (*árhan*) thou protectest (*dayase*) all (*viśvam*) this (*idám*) very extensive world (*ábhvam*); there is (*asti*) indeed (*vái*) nothing (*ná*) more powerful (*ójīyaḥ*) than thee (*tvát*), Oh Rudra (*Rudra*).

वेङ्कटः। तदर्हं स्त्वं सायकानि धन्व धनुश्च बिभर्षि। निष्कम् आभरणं यजतं शोभनं विश्वरूपं नानारूपम्। तथार्हं स्त्वं विश्वं सर्वम् इदम् अभ्वम् महत् भुवनं दयसे अनुगृह्णासि। न त्वत् त्वत्तः ओजीयः बलवत्तरम् इह किञ्चित् अस्ति ॥१०॥

हरदत्तः। अर्हन् बिभर्षि हे रुद्र त्वमेव सायकानि धन्व च बिभर्षि। अर्हन् त्वमेव च यजतं यागादिकर्मसाधनं विश्वरूपं कुण्डलाद्यनेकरूपं निष्कं हिरण्यमपि बिभर्षि। शरवणे निषिक्तं यद्देवस्य वीर्यं तत्स्पर्शात् स प्रदेशो हिरण्मयोऽभवदिति ह्यैतिहासिकाः स्मरन्ति। हिरण्मयाभरणधारणाभिप्रायं वेदम्। अभ्वमित्यन्तरिक्षनाम्ना जगल्लक्ष्यते। इदं विश्वम् अभ्वं त्वमेवार्हन् दयसे। सर्वविषयां दयां त्वमेव कर्तुमर्हसि। न वै। वै प्रसिद्धौ। त्वत् त्वत्तः। ओजीयः ओजस्वितरं किञ्चिदपि वस्तु न वै अस्ति। यदि स्यात् तेन जिघांसितमसौ न रक्षितुं शक्नुयात्। ततश्च तद्विषयास्य दयानर्हिता स्यात् ॥१०॥

सायणः। हे रुद्र, त्वम् अर्हन् अर्हो योग्य एव सन् सायकानि शरान् धन्व धनुश्च बिभर्षि धारयसि। तथा अर्हन् एव यजतम् यजनीयं पूजनीयं विश्वरूपम् बहुविधरूपयुक्तं निष्कम् हारं बिभर्षि। तथा अर्हन् एव इदम् विश्वम् सर्वम् अभ्वम्। महन्नामैतत्। अतिविस्तृतं जगत्। दयसे रक्षसि। देङ् रक्षणे [धा० १।९४३]। हे रुद्र, त्वत् त्वत्तोऽन्यत् किञ्चित् ओजीयः ओजस्वितरं बलवत्तरं न वै अस्ति न खलु विद्यते। अतस्त्वमेवोक्तव्यापारेषु योग्य* इत्यर्थः। ओजःशब्दान्मत्वर्थीयो विनिः। तत आतिशायनिक इष्ठन्। विन्मतोर्लुक् [५।३।६४]। टेः [६।४।१५५] इति टिलोपः ॥१०॥

---

* योग्य—all.

अर्हन्—Note that it is the nom. sing. and not the voc. sing. In the latter case the verb following it would be accented. The part. अर्हत् means worthy acc. to अर्हः प्रशंसायाम् iii. 2. 133. The repetition of the word *arhan* at the beginning of each verse constitutes the figure of speech "anaphora". *Cf. Praise* ye the Lord. *Praise* God in His sanctuary; *praise Him* in the firmament of his power. *Praise Him* for His mighty acts: *praise Him* according to his excellent greatness. Psalm CL.

बिभर्षि—The भ्वादि root is much more frequent in RV. than the जुहोत्यादि.

सायकानि—सायक is masc. in the class. lang. शरे खड्गे च सायकः। अमरः।

धन्व—Though found in Amara धन्वन् is not much used in class. Skt. but preserved only at the end of Bah. compounds.

निष्कम्—Note that निष्क is not analysed in Pp. निष्कग्रीव 'with a golden ornament round the neck' is also found in RV.

यजतम्—यज्ञियम् Yāska. Skt. *yaj-atá*, Av. *yazata*, from *yaj* to worship with the suffix *-atá* (in the sense of *-tavya*). दर्शत worthy to be seen (दर्शनीय *Nir*. x. 1), हर्यत desirable. (भृमृदृशियजिपर्विपच्यमितमिनमिहर्यिभ्योऽतच्। उ° ३।११०).

विश्वरूपम्—Note that विश्वम् in *c* is accented on the first syll. (being formed with क्वन् with an indicatory न्), but विश्व cf विश्वरूपम् is accented on the second syll. (acc. to बहुव्रीहौ विश्वं संज्ञायाम् vi. 2. 106).

दयसे—दयतिरनेककर्मा। 'नवेन पूर्वं दयमानाः स्याम' इत्युपदयाकर्मा। 'य एक इद्विदयते वसु' इति दानकर्मा वा विभागकर्मा वा। 'दुर्वर्तुर्भीमो दयते वनानि' इति दहतिकर्मा। दुर्वर्तुर्दुर्वारः। 'विदद्वसुर्दयमानो वि शत्रून्' इति हिंसाकर्मा।...*Nir*. iv. 17 (Wieldest—GELDNER, MACDONELL). Gk. *daiomai*.

अभ्वम्—is read in the list of जलनाम's and अभ्वः in the list of महन्नाम in the *Nighaṇṭu*. Derived from अ-भू the word literally means 'not existing', thence monster, monstrous (Force—GELD, MACDONELL).

ओजीयः—comp. of उग्र, superl ओजिष्ठ. Av. *ugra-*, *aojyah,-aojišta-*.

11

स्तुहि श्रुतं गर्तसदं युवानं	स्तुहि। श्रुतम्। गर्तऽसदम्। युवानम्।
मृगं न भीममुपहत्नुमुग्रम्।	मृगम्। न। भीमम्। उपऽहत्नुम्। उग्रम्।
मृळा जरित्रे रुद्र स्तवा-	मृळ। जरित्रे। रुद्र। स्तवानः।
नोऽन्यं ते अस्मन्नि वपन्तु सेनाः॥११	अन्यम्। ते। अस्मत्। नि। वपन्तु। सेनाः॥

Praise (*stuhi*) the far-famed (*śrutám*), the cave-dwelling (*gartasádam*) the youth (*yúvānam*), running through (*upahatnúm*) like a dread beast (*mṛgám ná bhīmám*), the mighty (*ugrám*). Being praised (*stávānaḥ*), O Rudra (*Rudra*), have pity on (*mṛḷā'*) the praiser (*jaritré*). Let your (*te*) hosts (*sénāḥ*) lay low (*ni vapantu*) another (*anyám*) than us (*asmát*).

वेङ्कटः। हे स्तोतः, स्तुहि श्रुतं विश्रुतम् गर्तसदं रथस्थं युवानं मृगम् इव भीमम् उपहन्तारं शत्रूणाम् उग्रम् उद्गूर्णम्। त्वं च रुद्र स्तवानः स्तूयमानः जरित्रे स्तोत्रे मृळ सुखं कुरु। अस्मत् मत्तः अन्यम् ते तव सेना निवपन्तु छिन्दन्तु।

हरदत्तः। श्रुतं विख्यातम्, आबालगोपालं प्रसिद्धम्। गर्तसदम्। गर्तं इति रथनाम। आ रोहथो वरुण मित्र गर्तम् [५।६२।८] इत्यादौ दर्शनात्। युवानं नित्यतरुणं मृगं न भीमं मृगमिव भयानकम् उपहत्नुम् उपहन्तारं ब्रह्मद्विषाम् उग्रम् अनभिभवनीयम् एवंविधं रुद्रं स्तुहि हे मदीयान्तरात्मन्। त्वं च हे रुद्र स्तवानः स्तूयमानोऽस्माभिः मृळ मृळय जरित्रे। विभक्तिव्यत्ययः[1]। जरितारं स्तोतारम्। ते तव सेनाश्चास्मत् अस्मत्तोऽन्यं निवपन्तु निघ्नन्तु।

सायणः। प्रयाणे मृगस्यामनोज्ञवचः श्रुत्वा स्तुहि श्रुतम् इत्येतां जपेत्। सूत्रितं च—स्तुहि श्रुतं गर्तसदं युवानमिति मृगस्य [आ० गृ० सू० ३।१०।१०] इति। हे स्तोतः श्रुतम् विश्रुतं प्रख्यातं रुद्रं स्तुहि। कीदृशम्? गर्तसदम्।

---

1 मृड् governs the dative.

गर्तो रथः। तत्र सीदन्तं युवानम् नित्यतरुणं मृगम् न भीमम् सिंहमिव भयङ्करम्। उपहत्नुम् उपहन्तारं शत्रूणाम् उग्रम् उग्रं हे रुद्र त्वं स्तवानः अस्माभिः स्तूयमानः सन् जरित्रे स्तोत्रे मह्यं मृळ सुखय। ते त्वदीयाः सेनाः अस्मत् अन्यम् अस्मद्व्यतिरिक्तं पुरुषं नि वपन्तु निघ्नन्तु ॥११॥

जरित्रे—Yāska says: जरिता गरिता *Nir.* i. 7. In *Nigh.* iii. 16 जरिता is read in the list of स्तोतृनाम. Durga says: जरिता जरतेः स्तुत्यर्थस्येव. As Yāska points out it is the palatal form of the root गॄ to praise. Skt. *jaritar-*, Av. *(aibi-)jarətar-*.

गर्तसदम्—seated on the seat of the car or on the seat of the shelter. *Gárta* has practically the sense of Eng. 'scaffold' (GELDNER). गर्त is read in the list of गृहनाम's in the *Nigh.*

मृगं न भीमम्—see under i. 154. 2. The animal may be the wild buffalo, the elephant or the lion (वृषभो न भीमः vi. 21. 4, मृगं न व्रा मृगयन्ते viii. 2. 6, सिंहो न भीमः v. 16. 14).

उपहत्नुम्—The suffix is *-nu* with *-t-* enlargement. कृहनिभ्यां क्त्नुः: uṇādi iii. 30. कृत्नु active, हत्नु deadly, स्तनय-इ-त्नु thunder. V. G. S. p. 257.

नि-वपन्तु—नि (down) वप् (strew, scatter, throw). *Cf.* न्युप्ताः x. 34. 5.

अन्यं ते अस्मन्नि वपन्तु सेनाः—*Cf.* अन्यो बभ्रूणां प्रसितौ न्वस्तु x. 14. 15. See p. 335.

12

कुमारश्चित्पितरं वन्दमानं	कुमारः । चित् । पितरम् । वन्दमानम् ।
प्रति नानाम रुद्रोपयन्तम् ।	प्रति । ननाम । रुद्र । उपऽयन्तम् ।
भूरेर्दातारं सत्पतिं गृणीषे	भूरेः । दातारम् । सत्ऽपतिम् । गृणीषे ।
स्तुतस्त्वं भेषजा रास्यस्मे ॥१२॥	स्तुतः । त्वम् । भेषजा । रासि । अस्मे इति ॥

As a boy (*kumāráḥ cit*) to the praising (*vándamānam*) father (*pitáram*) so have I, Rudra (*Rudra*) made obeisance [to thee]

(*prā́ti nānā́ma*) when thou approachest (*upayā́ntam*). The giver (*dātā́'ram*) of much (*bhū́'reḥ*), the true lord (*sā́tpatim*) I extol (*gṛṇīṣe*); being praised (*stutā́ḥ*) grant (*rāsi*) thou (*tvā́m*) remedies (*bheṣajā́'*) to us (*asmé*).

वेङ्कटः। कुमारः बालः चित् इव पितरं वन्दमानं प्रह्वीभवन्तम् उपगच्छन्तमहं त्वां प्रतिननाम प्रणतोऽस्मि, तथा गृणीषे स्तौमि च भूरेः बहुनः दातारं सत्पतिं सतां पतिम्, स्तुतश्च त्वम् अस्मे अस्मभ्यं भेषजा भेषजानि रासि प्रयच्छसि ॥१२॥

हरदत्तः। हे रुद्र, मां प्रत्युपयन्तम् उपगच्छन्तं त्वामहं प्रतिनानाम। लोडर्थे लिट्। छान्दसोऽभ्यासस्य दीर्घः। प्रतिः प्रशब्दस्यार्थे। प्रणमानि प्रगमनं क्षमेय। अत्र दृष्टान्तः। कुमारश्चित् कुमार इव पितरं वन्दमानं लालयन्तम्। किञ्च भूरेर्दातारं प्रभूतस्य दातारं सत्पतिं सतां पालयितारं त्वामहं गृणीषे। व्यत्ययेनात्मनेपदं मध्यमपुरुषश्च[1]। गृणामि स्तौमि। स्तुतश्च त्वं भेषजानि रासि देहि अस्मे अस्मभ्यम् ॥१२॥

सायणः। वन्दमानम् 'आयुष्मान् भव सौम्य' इति स्तुवन्तं पितरम् कुमारः चित् यथा कुमारः। चिदित्युपमार्थे [नि० १।४।१३]। हे रुद्र, उपयन्तम् अस्मत्समीपे गच्छन्तं त्वां प्रति ननाम प्रतिनतोऽस्मि। अपि च भूरेः बहुनो धनस्य दातारम् सत्पतिम् सतां पालयितारम्। पत्यावैश्वर्ये [६।२।१८] इति पूर्वपदप्रकृतिस्वरत्वम्। हे रुद्र, एवम्भूतं त्वां गृणीषे स्तौमि। मिपः 'तिङां तिङो भवन्ति' इति से आदेशः[1]। स्तुतः च त्वम् अस्मे अस्मभ्यं भेषजा भेषजानि रासि देहि ॥१२॥

वन्दमानम्—*Cf.* देवीमहं निरृतिं वन्दमानः पितेव पुत्रं दसये वचोभिः। T. S. iv 2. 5. 4 देवीं निरृतिं वन्दमानोऽहं वचोभिः स्तुतिरूपैर्वाक्यैर्दसये उपक्षीणां स्वाधीनां करोमि। तत्र दृष्टान्तः—यथा लोके पिता पुत्रं दुःशीलं बालं हे तात हे वत्स इत्यादिभिरुपलालनवचनैः स्वाधीनं करोति तद्वत्।

---

[1] As regards person, there is no anomaly. (See p. 643.) It is the aor. stem *gṛṇī-ṣ-* that is anomalous.

ननाम—ननम is the 1st pers. sing. and ननाम the 3rd pers. sing. in RV. and AV. The 3rd pers. sing. has been used here for the 1st pers. because of the word कुमारः at the beginning of the stanza. The third syllable in a Tristup may be either short or long, so the lengthening here is like that of तूतुजान, मामहान, दाधार etc.

गृणीषे—a Ved. irregularity for the normal *gṛṇe*, both the *nā* of the present and the *s* of the aorist being used here. The word occurs ten times in RV. and everywhere it is the 1st pers. sing.

रासि—imperative in sense. *Cf*. RV. 1. 114. 6:

इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम्।
रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ॥

"This exhilarating hymn, sweeter than the sweetest, is uttered to Rudra, the father of the Maruts. Bestow on us, O Immortal, the food of the mortals; be gracious to ourselves, our children and descendants." i. 114. 9: रास्वा पितर्मरुतां सुम्नमस्मे.

13

या वो भेषजा मरुतः शुचीनि
या शंतमा वृषणो या मयोभु।
यानि मनुरवृणीता पिता न-
स्ता शं च योश्च रुद्रस्य वश्मि॥१३॥

या। वः। भेषजा। मरुतः। शुचीनि।
या। शम्ऽतमा। वृषणः। या। मयःऽभु।
यानि। मनुः। अवृणीत। पिता। नः।
ता। शम्। च। योः। च। रुद्रस्य। वश्मि।

Those medicines (*bheṣajā'*) of yours (*vaḥ*) which (*yā'*) are pure (*śúcīni*), which (*yā'*) are most wholesome (*śántamā*), O bulls (*vṛṣaṇaḥ*), which are beneficent (*mayobhú*), which (*yā'ni*), Manu (*Mánuḥ*), our (*naḥ*) father (*pitā'*), chose (*ávṛṇīta*); these (*tā'*) and the healing (*śám ca*) and blessing (*yóḥ ca*) of Rudra (*Rudrásya*) I desire (*vaśmi*).

वेङ्कटः। हे मरुतः, या यानि वः भेषजा भेषजानि शुचीनि या यानि शन्तमा सुखतमानि या मयोभु यानि मयोभूनि यानि च सर्वेषामस्माकमर्थाय भवन्तो मनुः अवृणीत ता तानि रुद्रस्य शं च योः च वश्मि कामये ॥१३॥

हरदत्तः। हे मरुतः वृषणः वर्षितारः यानि वो भेषजानि रुद्रात् पितुर्लब्धानि। शुचीनि, न लशुनादिवदशुचीनि। यानि च शन्तमानि सुखतमानि। यानि च मयोभु। वचनव्यत्ययः। मयोभूनि सुखस्य भावयितॄणि। नः अस्माकं मनुष्याणां पिता मनुः अवृणीत प्रार्थयत। तानि रुद्रस्य भेषजानि शं च शमनाय च रोगाणां योश्च यावनाय च भयानां वश्मि कामये ॥१३॥

सायणः। हे मरुतः रुद्रपुत्रा वः युष्माकं या यानि भेषजा भेषजानि अस्मदारोग्यहेतुभूतान्यौषधानि शुचीनि शुद्धानि निर्मलानि सन्ति। हे वृषणः कामानां वर्षितारो मरुतः या यानि च युष्मदीयानि भेषजानि शन्तमा अतिशयेन सुखकराणि। या यानि च भेषजानि मयोभु मयोभूनि मयसः सुखस्य भावयितॄणि। नः अस्माकं पिता मनुः यानि भेषजानि युष्मदीयानि अवृणीत वृतवान्। ता तानि भेषजानि रुद्रस्य महादेवस्य सम्बन्धि शं च योश्च यच्छमनीयानां रोगाणामुपशमनं यावनीयानां भयानां यद्यावनम् अस्मत्तः पृथक्करणं तदुभयं च वश्मि कामये। वश कान्तौ [धा° २।७०]। आदादिकः ॥१३॥

मयोभु—See under i. 89. 4.

मनुः—Manu, the first man, is the ancestor of the human race. His father is Vivasvat.

अवृणीता—Metrical lengthening.

ता—तानि।

शम्—well-being, health (opp. to *rápas*). A root noun.

योः—Evidently from a noun यु meaning prosperity. Av. *yaoš-*, Lat. *iūs*. शम् and योः are used both as adverbs and as nouns.

शं च योश्च—*Cf*. RV. i. 114. 2: मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते। यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु॥ Be gracious to us, O Rudra, and make happiness for us; we would offer thee

worship, O ruler of men, with homage. What healing and blessing Father Manu had desired through offerings, we would attain that, O Rudra, under thy guidance.

14

परि णो हेती रुद्रस्य वृज्याः	परि । नः । हेतिः । रुद्रस्य । वृज्याः ।
परि त्वेषस्य दुर्मतिर्मही गात् ।	परि । त्वेषस्य । दुःऽमतिः । मही । गात् ।
अव स्थिरा मघवद्भ्यस्तनुष्व	अव । स्थिरा । मघवत्ऽभ्यः । तनुष्व ।
मीढ्वस्तोकाय तनयाय मृळ ॥१४॥	मीढ्वः । तोकाय । तनयाय । मृळ ॥१४॥

May the missile (*hetiḥ*) of Rudra (*Rudrásya*) spare (*pári vṛjyāḥ*) us (*naḥ*), may the great (*mahī'*) ill will (*durmatiḥ*) of the frightful one (*tveṣásya*) pass us by (*pári gāt*). Unspan (*áva tanuṣva*) the stretched (*sthirā'*) [bows] for (our) rich (*maghávadbhyaḥ*) [patrons]. Be gracious (*mṛḷa*) to [our] children (*tokā'ya*) and descendants (*tánayāya*), O rewarder (*mī'ḍhvaḥ*).

वेङ्कटः । रुद्रस्य हेतिः आयुधम् नः अस्मान् परिवृज्याः वर्जयतु । तथा त्वेषस्य दीप्तस्य दुर्मतिश्च अस्मान् अपहाय गात् गच्छतु मही महती । किञ्च स्थिरा आततज्यानि स्थिराणि धनूंषि अवतनुष्व हविष्मद्भ्यः अवततज्यानि कुरु । मीढ्वः हे वर्षितः तोकाय पुत्राय तनयाय तत्पुत्राय च मृळ न क्रुद्धो भव ।

हरदत्तः । नः अस्मान् रुद्रस्य हेतिः त्रिशूलाद्यायुधं परिवृज्याः । पुरुषव्यत्ययः । परिवृज्यात् सर्वतो वर्जयतु । त्वेषस्य दीप्तस्य घोररूपस्य देवस्य या दुर्मतिः हिंसा बुद्धिः सा च मही महती नः परिगात् । बहुलं छन्दस्यमाङ्योगेऽपि [६।४।७५] इत्यडभावः । परिवर्जने । अस्मान् वर्जयित्वान्यत्रैतु । परोऽर्थो देवं प्रति । हे मीढ्वः वर्षणेन सेक्तः ! मघवद्भ्यः । तादर्थ्ये एषा चतुर्थी । हविर्लक्षणेन धनेन तद्वतामस्मदादीनामर्थाय अस्मदादीन् प्रति स्थिरा । द्वितीयैक-

वचनस्याकारः। स्थिरं धनुः अवतनुष्व अवततज्यं कुरु। किञ्च तोकाय तनयाय तोकं तनयं च मृळ मृडय ॥१४॥

सायणः। रुद्रस्य महादेवस्य हेतिः आयुधं नः अस्मान् परि वृज्याः परिवर्जयतु। तथा त्वेषस्य दीप्तस्य रुद्रस्य मही महती दुर्मतिः दुःखकारिणी बुद्धिश्च परि गात् अस्मान् वर्जयित्वान्यत्र गच्छतु। अपपरी वर्जने [१।४।८८]। हे मीढ्वः सेचनसमर्थ रुद्र स्थिरा स्थिराणि त्वदीयानि धनूंषि मघवद्भ्यः हविर्लक्षणधनयुक्तेभ्यो यजमानेभ्यः अवतनुष्व अवततज्यानि कुरु। तथा तोकाय अस्मत्पुत्राय तनयाय तत्पुत्राय च मृळ सुखं कुरु ॥१४॥

वृज्याः—(वृज्-यास्-त्,—3. sing. root -aor. precative of वृज् to twist. See under भाशाः i. 115. 4. It is not a case of पुरुष-व्यत्यय. *Cf.* RV. vi. 28. 7: प्रजावतीः सूयवसं रिशन्तीः शुद्धा अपः सुप्रपाणे पिबन्तीः। मा वः स्तेन ईशत माघशंसः परि वो हेती रुद्रस्य वृज्याः॥ Rich in offering, grazing on good grass, drinking pure water in good drinking-places, may no thief, no one that speaks wicked words prevail over ye. May the missile of Rudra pass ye by. vii. 84. 2: परि नो हेळो वरुणस्य वृज्याः May the wrath of Varuṇa pass us by. vii. 46. 3: या ते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः। May that shaft of thine which is discharged from the sky, and traverses the earth pass us by. Similar 3rd sing. precative forms are भूयाः, गम्याः, पेयाः, भूयाः etc.

त्वेषस्य—*tveṣa* from *tviṣ* to be stirred means burning, frightful, striking terror into the heart, त्वेषसंदृक् of fierce aspect.

गात्—3. s. root-aor. injunc. of गा to go.

तोकाय तनयाय are often used together. पुत्रेषु च पौत्रेषु च। तोकं तुद्यतेः। तनयस्तनोतेः। *Nir.* x. 8.

मीढ्वः—Voc. s. of मीढ्वस् perf. part. act. without reduplication of मिह् to shed water. मिह सेचने। दाश्वान् साह्वान् मीढ्वांश्च [६।१।१२] इति क्वसुप्रत्ययान्तो निपातितः, सकृद्वो 'मतुवसो रु संबुद्धौ छन्दसि' [८।३।१] इति रुत्वम्। The *Mahābhāṣya* on दाश्वान् साह्वान् मीढ्वांश्च is interesting: मीढ्वानिति किं निपात्यते? मिहेर्ढत्वं च। मिहेर्ढत्वं च निपात्यते।...द्विर्वचनप्रतिषेधो दीर्घत्वं च। नखार्थो हि गम्यते। कः पुनर्नखार्थः। मन्दिर्दानकर्मा। So acc. to Patañjali

मीढ्वः means bountiful, liberal, munificent. The comp. and superl. of मीढ्वस् are मीळ्हुष्टर and मीळ्हुष्टम. "In the later Vedas, they have been only found in connexion with Rudra" (MACDONELL, *Vedic Mythology*).

15

एवा बभ्रो वृषभ चेकितान	एव । बभ्रो इति । वृषभ । चेकितान ।
यथा देव न हृणीषे न हंसि ।	यथा । देव । न । हृणीषे । न । हंसि ।
हवनश्रुन्नो रुद्रेह बोधि	हवनऽश्रुत् । नः । रुद्र । इह । बोधि ।
बृहद्वदेम विदथे सुवीराः ॥१५॥	बृहत् । वदेम । विदथे । सुऽवीराः ॥१५॥

So (*evá*), O ruddy-brown (*babhro*) distinguished (*cekitāna*) bull (*vṛṣabha*), be (*bodhi*) here (*ihá*) listening to the invocation (*havanaśrút*) for us (*naḥ*), O Rudra (*Rudra*), since (*yáthā*) thou, O God (*deva*), art not wroth (*ná hṛṇīṣé*) nor killest (*ná háṁsi*). We would speak (*vadema*) aloud (*bṛhát*) with strong sons (*suvī'rāḥ*).

वेङ्कटः । एवा एवमेव बभ्रो बभ्रुवर्ण वृषभ चेकितान विद्वन् देव यथा न हृणीषे न क्रुध्यसि न हंसि च तथा हवनश्रुत् स्तोत्रस्य श्रोता नः अस्मान् इह अनुकम्प्यान् बोधि बुध्यस्व विदथे यज्ञे दीयतां भुज्यतामिति बृहद्वचनं वदेम सुवीराः सुपुत्राः ।

हरदत्तः । हे बभ्रो बभ्रुवर्ण वृषभ चेकितान अतिशयेन ज्ञातः । ज्ञानस्या-तिशयः सविषयत्वात् । देव रुद्र यथा त्वं न हृणीषे न कुप्यसि यथा च न हंसि एव एवम् । साकाङ्क्षत्वात् त्वामाह्वयामीति शेषः । आहूतश्च त्वं हवनश्रुत् नः अस्मत्सम्बन्धिनः तस्याह्वानस्य श्रोता असकृदिह यज्ञे बोधि । कर्मणि व्यत्ययः । पुरुषव्यत्ययः । बुध्येथाः ज्ञायेथाः सन्निधत्स्व । सन्निहिते च त्वयि

वयं सुवीराः शोभनैः पुत्रैरुपेताः विदथेऽस्मिन् यज्ञे बृहत् महार्थं वचो वदेम वक्तुं शक्नुयाम ।

सायणः । हे बभ्रो, जगतो भर्तर्बभ्रुवर्ण वा वृषभ कामानां वर्षितः चेकितान सर्वं जानन् हे देव द्योतमान रुद्र यथा येन प्रकारेण न हृणीषे न क्रुध्यसि न च हंसि । हृणीङ् लज्जायाम् [धा०कण्ड्वादि ३३]* । अयं क्रुध्यतिकर्मा च । एवं हवनश्रुत् अस्मदीयाह्वानं शृण्वन् नः अस्मान् हे रुद्र इह अस्मिन् देशे बोधि बुध्यस्व । विदथे यज्ञे गृहे वा सुवीराः शोभनपुत्राः सन्तः बृहत् प्रौढं त्वदीयं स्तोत्रं वदेम उच्चारयाम ॥१५॥

सायणः । [तै० ब्रा० २।८।६।९] हे देव, यथा न हृणीषे न कुप्यसि न हंसि च न च मारयस्यपि, एवा एवमेव 'त्वामाह्वयामि' इति शेषः । रुद्रस्य विशेषणानि बभ्रो पिङ्गलवर्ण वृषभ कामानां वर्षक चेकितान सर्वज्ञ हे रुद्र हवनश्रुत् आह्वानस्य श्रोता सन् इह कर्मणि नः अस्मान् बोधि बुध्यस्व अस्मदीयां हुतिं जानीहीत्यर्थः । वयं सुवीराः शोभनापत्ययुक्ताः सन्तो विदथे यज्ञे बृहद् वदेम प्रौढं स्तोत्रं पठामः ।

एवा—"एवादीनामन्तः" [फि० सू० ४।१४] इत्यन्तोदात्तः, संहितायां "निपातस्य च" [६।३।१३६] इति दीर्घं । The particle is here used as the correlative of यथा which here follows. As the second syll. in a Trṣṭubh stanza is long, एव has been changed into एवा.

चेकितान—Voc. s. of the inten. pr. part. Ā of *cit* note. *Cekit* Ātm. means to distinguish oneself, to become famous. Hence, चेकितान means distinguished, exciting wonder. P. चिकित्वस् means 'knowing'.

हृणीषे—2. sing. A. pr. of *hṛ* IX. A. to be angry.

बोधि—2. sing. root-aor. imper. of भू to become. भूधि>बोधि through the influence of Prakrit forms like भोदि etc. The

* Mādhava reads: हृणीङ् रोषणे लज्जायां च ।

deaspiration of the root as well as its guṇa is irregular. In Sanskrit and Greek roots two aspirates cannot exist in two consecutive syllables, but we can have an aspirate in the root followed by an aspirate in the vibhakti. We can have बोधि from बुध् also and the particular root is to be determined from the context. See p. 129.

AITAREYA BRĀHMAṆA

The *Aitareya Brāhmaṇa* is the well-known Brāhmaṇa belonging to RV. It contains 40 chapters divided into eight pentads. The well-known passage regarding the unfailing help rendered by the Maruts to Indra is from Chapter XII of the book.

The Maruts thrice sixty (त्रिः षष्टिः viii. 96. 8) or thrice seven (त्रिसप्तैः शूर सत्वभिः i. 133. 6) are the chief friends and helpers of Indra. The close association of Indra with the Maruts has already been mentioned on pp. 58-59.

Even the Maruts, however, are said to have left Indra in the lurch. In viii. 7. 31 the Maruts are asked what they were seeking when they deserted Indra and who would then trust in their friendship. कद्ध नूनं कधप्रियो यदिन्द्रमजहातन। को वः सखित्व ओहते॥ In i. 170. 2 the Maruts say to Indra, Why dost thou, O Indra, seek to slay us? The Maruts are your brothers. With them behave well. Do not kill us in the fray (किं न इन्द्र जिघांससि भ्रातरो मरुतस्तव। तेभिः कल्पस्व साधुया मा नः समरणे वधीः॥).

In AB xii. 5 also we find that the Maruts did not desert Indra. इन्द्रं वै वृत्रं जघ्निवांसं नास्तृतेति मन्यमानाः सर्वा देवता अजहुः। तं मरुत एव स्वापयो नाजहुः। When Indra had killed Vṛtra all the Gods deserted him, thinking he (Indra) had not killed (Vṛtra). The Maruts alone, his true comrades, did not desert him.

ऐतरेय-ब्राह्मणम्

इन्द्रमरुत्कथा

(१२।८)

इन्द्रो वै वृत्रं हनिष्यन् सर्वा देवता अब्रवीदनु मोपतिष्ठध्वमुप मा ह्वयध्वमिति। तथेति। तं हनिष्यन्त आद्रवन्। सोऽवेन्मां वै हनिष्यन्त आद्रवन्ति हन्तेमान् भीषया इति। तानभि प्राश्वसीत्।

तस्य श्वसथादीषमाणा विश्वे देवा अद्रवन् । मरुतो हैनं नाजहुः, प्रहरो भगवो जहि वीरयस्वेत्येवैनमेतां वाचं वदन्त उपातिष्ठन्त ।

Indra, when about to slay Vṛtra, said to all the Gods: "Follow close after me and support me" They said, "So be it". They ran forward to slay Vṛtra. Vṛtra perceived, "They are running forward to kill me. Come, let me frighten them." He accordingly breathed forth against them, when all the Gods ran away precipitately from the blast of his breath. But the Maruts did not forsake him. They stood by him, crying, "Smite, O God, slay, play the hero."

सायणभाष्यम् । पुरा कदाचिदिन्द्रो वृत्रं हन्तुमुद्यतः सर्वा अपि देवताः प्रत्येवमब्रवीत् । अनु मोपतिष्ठध्वम् आनुकूल्येन मां सेवध्वम् । उप मा ह्वयध्वम् वृत्रवधाय प्रवृत्तं माम् उपह्वयध्वम् [1]अनुजानीध्वमिति । ततोऽङ्गीकृत्य सर्वे देवास्तं वृत्रं हन्तुमुद्यता आगच्छन् । तदा स वृत्रो मां हन्तुमुद्यता आद्रवन्तीत्येवेत् स्वमनसा ज्ञातवान् । तत इदं विचारयामास । हन्त सम्यग्जातं देवनिवारणोपायस्य प्रतिभातत्वात् । इमान् देवान् भीषयै अहं भीतं करवाणि । इति विचार्य तान् देवान् अभिलक्ष्य प्राश्वसीत् प्रश्वासमकरोत् । तस्य वृत्रस्य श्वसथात् प्रश्वासाद् ईषमाणा विधूताः सर्वे देवाः पलायनमकुर्वन् । वृत्रो हि स्वजन्मानन्तरं सर्वासु दिक्षु शरपातमात्रदेशं सम्प्राप्य वृद्धिं गतवान् । तथाचान्यत्र श्रुतिः—स इषुमात्रमिषुमात्रं विष्वङ्ङवर्धत स इमाँल्लोकानवृणोत् तद्वृत्रस्य वृत्रत्वम् [तै० सं० २।४।१२।२] इति । तादृशस्य प्रौढशरीरस्य प्रश्वासः [2]प्रलयकालीनवायुसमानोऽतस्तदीयश्वासेन देवाः परमाणव इव दूरेऽपसारिताः । इदानीं मरुत एवैनमिन्द्रं नाजहुर्न परित्यक्तवन्तः । हे इन्द्र भगवन् वृत्रं वज्रेण

---

[1] ध्वम् is due to the attraction of ह्वयध्वम्. अनु-ज्ञा is exclusively Par. Unfortunately, Bhaṭṭi uses it in the Ātm. twice.

[2] प्रलयकालीन, though not sanctioned by grammar, has passed current in the language.

प्रहर, तेन प्रहारेण अहि मारय इति वीरयस्व शब्दैर्वीरत्वं प्रकाशय इत्यनेन प्रकारेणैनमिन्द्रं प्रत्येतां वाचं वदन्तो मरुतस्तमिन्द्रमसेवन्त ।

उपतिष्ठध्वम्—Bhaṭṭa Bhāskara says: मामेवानुलक्ष्योपतिष्ठध्वं. सदा मदैव सङ्गता वर्तध्वम् । सङ्गतकरणे आत्मनेपदम्. But since मा is governed by the karmapravacanīya अनु, उप-तिष्ठध्वम् is intransitive and so the rule अकर्मकाच्च (i. 3. 26) applies here. Ṣaḍguruśiṣya explains: अनु सम्यक् मा माम्.

उप ह्वयध्वम्—Ātm. acc. to निसमुपविभ्यो ह्वः (i. 3. 30). उप ह्व means to call near to oneself, to call encouragingly, to cheer. स्तुत Ṣ.

आद्रवन्—आ-द्रु means to run towards, run forward. आद्रवो धावनम् Ṣ.

हन्त—an interjection of exhortation and may be translated by 'come' 'well'. अभिमुखीकरणे or वाक्यारम्भे. हन्त हर्षेऽनुकम्पायां वाक्यारम्भ-विषादयोः ।

भीषये—प्राप्तकाले लोट् । णिच्चि भियो हेतुभये षुक् [१।७।४०] । भीस्म्योर्हेतुभये [१।३।६८] इत्यात्मनेपदम् ।

श्वसथात्—भीत्रार्थानां भयहेतुरित्यपादाने पञ्चमी । The suffix is -*tha* with connecting -*a*-. Action nouns of all genders are formed with this suffix. बाहुलकाच्च श्वसेरौणादिकोऽथप्रत्ययः । Class. श्वसथुः.

ईषमाणा—Pres part. Ā of *īṣ* to move.

भगवः—मतुवसो रु सम्बुद्धौ छन्दसि viii. 3. 1.

वीरयस्व—2. sing. imperative Ā of the den. of वीर.

उपतिष्ठन्त—उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यमित्यात्मनेपदम् ।

तदेतदृषिः पश्यन्नभ्यनूवाच—वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः । मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि ॥ [ऋ० सं० ८।८६।७] इति ॥

Seeing this, the seer uttered: Flying from the snort of Vṛtra, all the Gods who were thy comrades forsook thee. With the Maruts, O Indra, let there be thy friendship, then thou wilt be victorious in all these battles.

सायणभाष्यम्। उक्तमर्थं मन्त्रसंवादेन द्रढयति—तदेतदिति। कश्चिदृषिर्दिव्यज्ञानेन तदेतद्देवपलायनं पश्यन् वृत्रस्येत्यादिमन्त्रेण प्रकटीचकार। हे इन्द्र, तव सखायो विश्वे देवा ये सन्ति ते सर्वे वृत्रस्य श्वसथात् पलायमानास्त्वां परित्यक्तवन्तः, तस्मादिदानीं ते तव मरुद्भिः सह सख्यमस्तु। अथानन्तरम् इमाः सर्वा वृत्रसम्बन्धिनीः सेनाः जेष्यसीति।

जयासि—2. s. subj. of जि.

सोऽवेदिमे वै किल मे सचिवा इमे माकामयन्त हन्तेमानस्मिन्नुक्थ आ भजा इति। तानेतस्मिन्नुक्थ आभजत्।

He perceived: These Maruts are my allies. They love me. Come, I shall give them a share in this litany. He gave them a share in this litany.

सायणभाष्यम्। अथ मरुतामिन्द्रकृतमुपकारं दर्शयति—स इन्द्रः स्वमनस्यवेद् विचारितवान्। कथमिति-तदुच्यते। इमे वै किल पुरतः स्थिता मरुत एव मे सचिवाः सखायः। यस्मादिमे मरुतो माकामयन्त मामपेक्षितवन्तः, न तु परित्यज्य मां गताः, तस्मादस्मत्सखित्वं हन्त सम्यगेभिः कृतमित्यहं दृष्टवानस्मि, तत इमान्मरुतोऽस्मिन्नुक्थे माध्यन्दिनगतशस्त्र आभजे भागिनः करवाणीति मनस्येवं विचार्य तथैवाकरोत्।

अवेत्—3. s. Imperfect of विद् to know, ज्ञातवान् S.



THE BṚHADĀRAṆYAKA UPANIṢAD

The *Bṛhadāraṇyakopaniṣad* which is the concluding portion of the *Śatapatha Brāhmaṇa*, is, in its main part, one of the oldest and most important of the Upaniṣads. It consists of three Kāṇḍas—the Madhu Kāṇḍa which inculcates the basic identity of the Universal with the individual self, the Muni or Yājñavalkya Kāṇḍa which seeks to justify this teaching philosophically and the Khila Kāṇḍa or supplementary section which treats of modes of worship and meditation, transmigration, etc.

"That the first and second parts were originally independent of each other is sufficiently proved by both containing the legend of Yājñavalkya and his two wives in almost identical words throughout. To each of these parts (as well as to Book X of the *Śatapatha Brāhmaṇa*) a succession list (*vaṁśa*) of teachers is attached. A comparison of these lists seems to justify the conclusion that the first part and the second existed during nine generations as independent Upaniṣads within the school of the *White Yajurveda* and were then combined by a teacher named Āgniveśya; the third part, which consists of all kinds of supplementary matter, being subsequently added" (MACDONELL).

बृहदारण्यकोपनिषत्

२।४

मैत्रेयीति होवाच याज्ञवल्क्यः, उद्यास्यन् वा अरेऽस्मात् स्थाना-
दस्मि, हन्त तेऽनया कात्यायन्या अन्तं करवाणीति ॥१॥

Maitreyī, said Yājñavalkya, Lo, verily I am about to go forth from this state. Come, I will make a settlement of you with that Kātyāyanī.

शाङ्करभाष्यम्। मैत्रेयि इति ह उवाच याज्ञवल्क्यः मैत्रेयीं स्वभार्याम् आमन्त्रितवान् याज्ञवल्क्यो नाम ऋषिः। उद्यास्यन् ऊर्ध्वं यास्यन् पारिव्राज्याख्यम् आश्रमान्तरं [प्रवेक्ष्यन्]। [वै-शब्दोऽवधारणार्थकः।] अरे इति सम्बोधनम्। अहम् अस्माद् गार्हस्थ्यात् स्थानाद् आश्रमात् ऊर्ध्वं गन्तुम् इच्छन् अस्मि भवामि। अतो हन्त अनुमतिं प्रार्थये ते तव। किञ्च ते तव अनया द्वितीयया भार्यया कात्यायन्या अन्तं विच्छेदं करवाणि। पतिद्वारेण युवयोर्मया सम्बध्यमानयोर्यः सम्बन्ध आसीत् तस्य सम्बन्धस्य विच्छेदं करवाणि, द्रव्यविभागं कृत्वा वित्तेन संविभज्य युवां गमिष्यामि ॥१॥

सा होवाच मैत्रेयी। यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात् कथं तेनामृता स्यामिति। नेति होवाच याज्ञवल्क्यः, यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यात्, अमृतत्वस्य तु नाऽऽशाऽस्ति वित्तेनेति ॥२॥

Thus addressed, Maitreyī said, If indeed, Venerable Sir, this whole earth, filled with wealth, were mine, how would I be immortal thereby? No, said Yājñavalkya. As the life of those possessed of the means or implements of living runs, so will be your life. Of immortality, however, there is no hope through wealth.

सा एवमुक्ता ह उवाच। यद् यदि। नु इति वितर्के। मे मम इयम् पृथिवी भगोः भगवन् सर्वा सागरपरिक्षिप्ता वित्तेन धनेन पूर्णा स्यात्। कथम् न कथञ्चन इत्याक्षेपार्थः, प्रश्नार्थो वा। तेन पृथिवीपूर्णवित्तसाध्येन कर्मणा अग्निहोत्रादिना अमृता किं स्याम् इति व्यवहितेन सम्बन्धः। उवाच प्रत्युवाच याज्ञवल्क्यः। कथम् इति यद्याक्षेपः, अनुमोदनं नेति होवाच याज्ञवल्क्य इति। प्रश्नश्चेत्, प्रतिवचनार्थं नैव स्या अमृता। किं तर्हि? यथैव लोके उपकरणवतां साधनवतां जीवितम् सुखोपभोगसमर्थं तथैव तद्वदेव ते तव जीवितम् स्यात्। अमृतत्वस्य तु न आशा मनसापि अस्ति वित्तेन वित्तसाध्येन कर्मणेति ॥२॥

भगोः is the voc. sing of भगवत्. उपकरणवताम्—*Cf.* Caraka: नातः पापात् पापीयोऽस्ति यदनुपकरणस्य दीर्घमायुः। *Cf.* तस्येयं पृथिवी सर्वा वित्तेन पूर्णा स्यात्। स एको मानुष आनन्दः। तैत्तिरीयारण्यकम् ८८२।

सा होवाच मैत्रेयी । येनाहं नामृता स्यां किमहं तेन कुर्याम् । यदेव भगवान् वेद तदेव मे ब्रूहीति ॥३॥

Maitreyī, thus addressed, said, What should I do with that by which I do not become immortal? Whatever your honour knows, tell me that.

सा होवाच मैत्रेयी । एवमुक्ता प्रत्युवाच मैत्रेयी यद्येवं येनाहं नामृता स्यां किमहं तेन वित्तेन कुर्याम् । यदेव भगवान् केवलममृतत्वसाधनं वेद तदेवामृतत्वसाधनं मे मह्यं ब्रूहि ॥३॥

स होवाच याज्ञवल्क्यः । प्रिया बतारे नः सती प्रियं भाषसे । एह्यास्स्व, व्याख्यास्यामि ते । व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥४॥

Thus addressed, Yājñavalkya said, Lo, dear as you are to us, you speak dear words; come, sit down. I will explain to you. Even while I am explaining seek to ponder thereon.

एवं वित्तसाध्येऽमृतत्वसाधने प्रत्याख्याते याज्ञवल्क्यः स्वाभिप्रायसम्पत्तौ तुष्ट आह । स होवाच प्रिया इष्टा । बतेत्यनुकम्प्याह । अरे मैत्रेयि नः अस्माकं पूर्वमपि प्रिया सती भवन्तीदानीं प्रियं चित्तानुकूलं भाषसे । अत एहि आस्स्व उपविश । व्याख्यास्यामि यत् ते तव इष्टं तदमृतत्वसाधनमात्मज्ञानं कथयिष्यामि । व्याचक्षाणस्य तु मे मम व्याख्यानं कुर्वतः निदिध्यासस्व वाक्यान्यर्थतो निश्चयेन ध्यातुमिच्छेति ॥४॥

निदिध्यासस्व—Imp. 2. s. Ātm. of the desiderative of ध्यै to meditate, ponder. The desiderative root is Ātm. in the *Brāhmaṇas.*

श्रवण (hearing of the text), मनन (logical reflection) and निदिध्यासन (contemplative meditation) are the three steps by means of which the Self is realised.

१ श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः ।
मत्वा च सततं ध्येय एते दर्शनहेतवः ॥

स होवाच । न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति । न वा अरे जायायै कामाय जाया प्रिया

भवत्यात्मनस्तु कामाय जाया प्रिया भवति । न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति । न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति । न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति । न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति । न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रिया भवन्ति । न वा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनस्तु कामाय देवाः प्रिया भवन्ति । न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्त्यात्मनस्तु कामाय भूतानि प्रियाणि भवन्ति । न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयि । आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम् ॥५॥

He said, Lo, verily, not for the sake of the husband is the husband dear, but a husband is dear for the sake of the Self. Lo, verily, not for the sake of the wife is the wife dear, but a wife is dear for the sake of the Self. Lo, verily, not for the sake of the sons are the sons dear, but sons are dear for the sake of the Self. Lo, verily, not for the sake of wealth is wealth dear, but wealth is dear for the sake of the Self. Lo, verily, not for the sake of Brahminhood is Brahminhood dear, but Brahminhood is dear for the sake of the Self. Lo, verily, not for the sake of Kṣatriyahood is Kṣatriyahood dear, but Kṣatriyahood is dear for the sake of the Self. Lo, verily, not for the sake of the worlds are the worlds dear, but the worlds are dear for the sake of the Self. Lo, verily, not for the sake of the Gods are the Gods dear, but the Gods are dear for the sake of the

Self. Lo, verily, not for the sake of the beings are the beings dear, but the beings are dear for the sake of the Self. Lo, verily, not for the sake of all is all dear, but all is dear for the sake of the Self. Lo, verily, O Maitreyī, it is the Self that should be seen, heard of, meditated on, pondered over. Lo, verily, when the Self is seen, heard of, meditated on and pondered over, all this is known.

स होवाच। अमृतत्वसाधनं वैराग्यमुपदिदिक्षुर्जायापतिपुत्रादिभ्यो विरागमुत्पादयति तत्संन्यासाय। न वै। वैशब्दः प्रसिद्धस्मरणार्थः—प्रसिद्धमेवैतल्लोके। पत्युर्भर्तुः कामाय प्रयोजनायैव भार्यायाः पतिः प्रियो न भवति। किं तर्हि? आत्मनस्तु कामाय प्रयोजनाय जायायाः पतिः प्रियो भवति। तथा न वा अरे जायाया इत्यादि समानमन्यत्। न वा अरे पुत्राणाम्। न वा अरे वित्तस्य। न वा अरे ब्रह्मणः। न वा अरे क्षत्रस्य। न वा अरे लोकानाम्। न वा अरे देवानाम्। न वा अरे भूतानाम्। न वा अरे सर्वस्य। पूर्वं पूर्वं यथासन्ने प्रीतिसाधने वचनम्। [यद् यदासन्नं प्रीतिसाधनं तत्तदनतिक्रम्य तस्मिन् विषये पूर्वं पूर्वं वचनमिति योजना।] तत्र तत्रेष्टतरत्वाद्वैराग्यस्य सर्वग्रहणमुक्तानुक्तार्थम्। तस्माल्लोकप्रसिद्धमेतद् आत्मैव प्रियो नान्यदिति। तदेतत् प्रेयः पुत्रादित्युपन्यस्तम्, तस्यैतद् वृत्तिस्थानीयं प्रपञ्चितम्। तस्मादात्मप्रीतिसाधनत्वाद् गौणी, अन्यत्र प्रीतिरात्मन्येव मुख्या। तस्माद् आत्मा वा अरे द्रष्टव्यो दर्शनार्हो दर्शनविषयमापादयितव्यः श्रोतव्यः पूर्वमाचार्यत आगमतश्च। पश्चात् मन्तव्यस्तर्कतः। ततो निदिध्यासितव्यो निश्चयेन ध्यातव्यः। एवं ह्यसौ दृष्टो भवति श्रवणमनननिदिध्यासनसाधनैर्निर्वर्तितैः। यदैकत्वमेतान्युपगतानि तदा सम्यग्दर्शनं ब्रह्मैकत्वविषयं प्रसीदति नान्यथा श्रवणमात्रेण। यद् ब्रह्मक्षत्रादि कर्मनिमित्तं वर्णाश्रमादिलक्षणमात्मन्यविद्याध्यारोपितप्रत्ययविषयं क्रियाकारकफलात्मकमविद्याप्रत्ययविषयं रज्ज्वामिव सर्पप्रत्ययस्तदुपमर्दनार्थमाह—आत्मनि खल्वरे मैत्रेयि दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितं विज्ञातं भवति ॥५॥

[श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।
मत्वा च सततं ध्येय एते दर्शनहेतवः॥ विवरणप्रमेयसंग्रहः।

तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मा। [बृ० आ० १।४।८]।

ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद, क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद, लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान् वेद, देवास्तं परादुर्योऽन्यत्रात्मनो देवान् वेद, भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद, सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद। इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदं सर्वं यदयमात्मा ॥६॥

The Brāhmaṇa throws one away who knows him as different from the Self. The Kṣatriya throws one away who knows him as different from the Self. The worlds throw one away who knows them as different from the Self. The Gods throw one away who knows them as different from the Self. The beings throw one away who knows them as different from the Self. All ignores one who knows it as different from the Self. This Brāhmaṇa, this Kṣatriya, these Gods, these beings and this all are this Self.

ननु कथमन्यस्मिन् विदिते ऽन्यद्विदितं भवति? नैष दोषः। न ह्यात्मव्यतिरेकेणान्यत् किञ्चिदस्ति। *यद्यस्ति न तद्विदितं स्यात्, न त्वस्ति, आत्मैव तु सर्वम्। तस्मात् सर्वमात्मनि विदिते विदितं स्यात्। कथं पुनरात्मैव सर्वम्? एतच्छ्रावयति। ब्रह्म ब्राह्मणजातिः तं पुरुषं 'परादात्' परादध्यात् पराकुर्यात्। कम्? योऽन्यत्रात्मन आत्मस्वरूपव्यतिरेकेणात्मैव न भवतीयं ब्राह्मणजातिरिति तां यो वेद तं परादध्यात् सा ब्राह्मणजातिरनात्मस्वरूपेण मां पश्यतीति। परमात्मा हि सर्वेषामात्मा। तथा क्षत्रं क्षत्रियजातिस्तथा लोका देवा भूतानि सर्वमिदं ब्रह्मेति यान्यनुक्रान्तानि तानि सर्वाण्यात्मैव यदयमात्मा योऽयमात्मा द्रष्टव्यः श्रोतव्य इति प्रकृतः। यस्मादात्मनो जायत आत्मन्येव लीयत आत्ममयं च स्थितिकाल आत्मव्यतिरेकेणाग्रहणादात्मैव सर्वम् ॥६॥

---

* This sentence with *asti* in the pres. indic. is peculiar. Should we drop यद्यस्ति...त्वस्ति?

स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ् शब्दाञ् शक्नुयाद् ग्रहणाय, दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥७॥

As when a drum is being beaten one is not able to grasp the external sounds, but by grasping the drum or the beater of the drum, the sound is grasped.

कथं पुनरिदानीमिदं सर्वमात्मैवेति ग्रहीतुं शक्यते ? चिन्मात्रानुगमात् सर्वत्र चित्स्वरूपतैवेति गम्यते। तत्र दृष्टान्त उच्यते। यत्स्वरूपव्यतिरेकेणाग्रहणं यस्य तस्य तदात्मत्वमेव लोके दृष्टम्। स यथा। स इति दृष्टान्तः। लोके यथा दुन्दुभेर्भेर्यादेर्हन्यमानस्य ताड्यमानस्य दण्डादिना न बाह्यान् शब्दान् बहिर्भूताञ्छब्दविशेषान् दुन्दुभिशब्दसामान्यान्निष्कृष्टान् दुन्दुभिशब्दविशेषान् न शक्नुयात् ग्रहणाय ग्रहीतुम्। दुन्दुभेस्तु ग्रहणेन शब्दसामान्यविशेषत्वेन दुन्दुभिशब्दाघातशब्दविशेषा गृहीता भवन्ति, दुन्दुभिशब्दसामान्यव्यतिरेकेणाभावात् तेषाम्। दुन्दुभ्याघातस्य वा दुन्दुभेराहननम् आघातो दुन्दुभ्याघातविशिष्टस्य शब्दसामान्यस्य ग्रहणेन तद्गता विशेषा गृहीता भवन्ति, नतु त एव निर्भिद्य ग्रहीतुं शक्यन्ते विशेषरूपेणाभावात् तेषाम्। तथा प्रज्ञानव्यतिरेकेण स्वप्नजागरितयोर्न कश्चिद्वस्तुविशेषो गृह्यते। तस्मात् प्रज्ञानव्यतिरेकेणाभावो युक्तस्तेषाम् ॥७॥

स यथा शङ्खस्य ध्मायमानस्य न बाह्याञ् शब्दाञ् शक्नुयाद् ग्रहणाय शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ॥८॥

As when a conch is blown one is not able to grasp the external sounds, but grasping the conch or the blower of the conch, the sound is grasped.

तथा स यथा शङ्खस्य ध्मायमानस्य शब्देन संयोज्यमानस्यापूर्यमाणस्य न बाह्यान् शब्दान् शक्नुयादित्येवमादि पूर्ववत् ॥८॥

स यथा वीणायै वाद्यमानायै न बाह्याञ् शब्दाञ् शक्नुयाद् ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥९॥

As when a lute is played, one is not able to grasp the external sounds, but by grasping the lute or the player of the lute, the sound is grasped.

तथा वीणायै वाद्यमानायै वीणाया वाद्यमानायाः। अनेकदृष्टान्तोपादानमिह सामान्यबहुत्वख्यापनार्थम्। अनेके हि विलक्षणाश्चेतनाचेतनरूपाः सामान्यविशेषाः। तेषां पारम्पर्यगत्या यथैकस्मिन् महासामान्येऽन्तर्भावः, तथा प्रज्ञानघने कथं नाम प्रवर्षयितव्य इति दुन्दुभिशङ्खवीणाशब्दसामान्यविशेषाणां यथा शब्दत्वेऽन्तर्भावः, एवं स्थितिकाले तावत् सामान्यविशेषाव्यतिरेकाद् ब्रह्मैकत्वं शक्यमवगन्तुम् ॥९॥

वीणायै and वाद्यमानायै, like जायायै (p. 653), are genitives in the *Brāhmaṇas*.

स यथार्द्रैधाग्नेरभ्याहितात् पृथग् धूमा विनिश्चरन्त्येवं वाऽरेऽस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि। अस्यैवैतानि निःश्वसितानि ॥१०॥

As from a fire which is laid lighted with damp fuel, diverse clouds of smoke issue forth, even so, my dear, the Ṛgveda, the Yajurveda, the Sāmaveda, Atharvāṅgirasa, history, ancient lore, science, Upaniṣad, verses, aphorisms, explanations and commentaries are the breath of this great Being. From this indeed are all these breathed forth.

एवमुत्पत्तिकाले प्रागुत्पत्तेर्ब्रह्मैवेति शक्योऽप्यवगन्तुम्। यथाग्नेर्विस्फुलिङ्ग-धूमाङ्गारार्चिषां प्राग्विभागादग्निरेवेति भवत्यग्न्येकत्वमेवं जगन्नामरूपविकृतं प्रागुत्पत्तेः प्रज्ञानघन एवेति युक्तं ग्रहीतुमित्येतदुच्यते। स यथार्द्रैधाग्नेरार्द्रै-रेधोभिरिद्धोऽग्निस्तस्मादभ्याहितात् पृथग् धूमाः पृथग् नानाप्रकाराः। धूमग्रहणं विस्फुलिङ्गादिप्रदर्शनार्थम्। धूमविस्फुलिङ्गादयो विनिश्चरन्ति विनिर्गच्छन्ति। एवं यथायं दृष्टान्तः। अरे मैत्रेयि, अस्य परमात्मनः प्रकृतस्य महतो भूतस्य निःश्वसितमेतत्। निःश्वसितमिव निःश्वसितम्। यथाऽप्रयत्नेनैव पुरुषनिःश्वासो भवति, एवं वा अरे। किं तन्निःश्वसितमिव ततो जातमित्युच्यते यदृग्वेदो यजुर्वेदः

सामवेदोऽथर्वाङ्गिरसश्चतुर्विधं मन्त्रजातम् । इतिहास इत्युर्वशीपुरूरवसोः संवादादिः । उर्वशी ह्याप्सराः [श० ब्रा० ११।४।४।१] इत्यादि ब्राह्मणमेव । पुराणम् असद्वा इदमग्र आसीत् [तै० २।७] इत्यादि । विद्या देवजनविद्या वेदः सोऽयमित्याद्याः [श० ब्रा० १३।४।३।१०-१४] । उपनिषदः प्रियमित्येतदुपासीत [४।१।३] इत्याद्याः । श्लोका ब्राह्मणप्रभवा मन्त्राः, तदेते श्लोकाः [४।७।११, ४।४।८] इत्यादयः । सूत्राणि वस्तुसंग्रहवाक्यानि वेदे यथा आत्मेत्येवोपासीत [१।४।७] इत्यादीनि । अनुव्याख्यानानि मन्त्रविवरणानि । व्याख्यानान्यर्थवादाः । अथवा वस्तुसंग्रहवाक्यविवरणान्यनुव्याख्यानानि । यथा चतुर्थाध्याय आत्मेत्येवोपासीतेत्यस्य, यथा वा अन्योऽसावन्योऽहमस्मीति [१।४।१०] न स वेद यथा पशुरेवमित्यस्यायमेवाध्यायशेषः । मन्त्रविवरणानि व्याख्यानानि । एवमष्टविधं ब्राह्मणम् ।

एवं मन्त्रब्राह्मणयोरेव ग्रहणम् । नियतरचनावतो विद्यमानस्यैव वेदस्याभिव्यक्तिः पुरुषनिःश्वासवत्, न च पुरुषबुद्धिप्रयत्नपूर्वकः । अतः प्रमाणं निरपेक्ष एव स्वार्थे, तस्माद् यत्तेनोक्तं तत्तथैव प्रतिपत्तव्यमात्मनः श्रेय इच्छद्भिर्ज्ञानं वा कर्म वेति । नामप्रकाशवशा हि रूपस्य विक्रियाव्यवस्था । नामरूपयोरेव हि परमात्मोपाधिभूतयोर्व्याक्रियमाणयोः सलिलफेनवत् तत्त्वान्यत्वेनानिर्वक्तव्ययोः सर्वावस्थयोः संसारत्वम् इत्यतो नाम्न एव निःश्वसितत्वमुक्तम्, तद्वचनेनैवेतरस्य निःश्वसितत्वसिद्धेः । अथवा सर्वस्य द्वैतजातस्याविद्याविषयत्वमुक्तम्—'ब्रह्म तं परादात्...इदं सर्वं यदयमात्मा' [२।४।६] इति । तेन वेदस्याप्रामाण्यमाशङ्क्यते । तदाशङ्कानिवृत्त्यर्थमिदमुक्तं पुरुषनिःश्वासवदप्रयत्नोत्थितत्वात् प्रमाणं वेदः, न यथान्यो ग्रन्थ इति ॥१०॥

THE KENA UPANIṢAD

This Upaniṣad is named *Kena Upaniṣad* because it begins with the word 'kena'. It is also known as the *Talavakāropaniṣad*, 'Talavakāra' (from *talava* a musician) being the name of a school of the *Sāmaveda*. *Talavakāra Brāhmaṇa* is another name for the *Jaiminīya Brāhmaṇa* and our Upaniṣad forms the first four sections of the tenth Anuvāka of the fourth Adhyāya of the *Jaiminīyopaniṣad Brāhmaṇa*.

This book is divided into four sections of which the first two are in verse and the last two in prose. The first half treats of the Supreme Brahman, "which no eye can penetrate, no speech, no thought can ever reach." The second half in prose is much earlier and contains the allegory of the Vedic Gods' ignorance of Brahman, the supreme Īśvara.

केनोपनिषत्

तृतीयः खण्डः

ब्रह्म ह देवेभ्यो विजिग्ये। तस्य ह ब्रह्मणो विजये देवा अमहीयन्त। त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति ॥१॥

1. Brahman, it is said, won a victory for the gods. In the victory of Brahman, the gods gloried. They reflected: To us alone belongs this victory, to us alone belongs this majesty.

शाङ्करभाष्यम्। ब्रह्म ह देवेभ्यो विजिग्ये 'अविज्ञातं विजानतां विज्ञातमविजानताम्' [केन २।३] इत्यादिश्रवणाद् यदस्ति तद्विज्ञातं प्रमाणैः, यन्नास्ति

तदविज्ञातं शशविषाणकल्पमत्यन्तमेवासद् दृष्टम्। तथेदं ब्रह्माविज्ञातत्वादसदेवेति मन्दबुद्धीनां व्यामोहो मा भूदिति तदर्थेयमाख्यायिकाऽऽरभ्यते। तदेव हि ब्रह्म सर्वप्रकारेण प्रशास्तृ देवानामपि परो देव ईश्वराणामपीश्वरो दुर्विज्ञेयो देवानां जयहेतुः, असुराणां पराजयहेतुः; तत्कथं नास्तीत्येतस्यार्थस्यानुकूलानि ह्युत्तराणि वचांसि दृश्यन्ते। अथवा ब्रह्मविद्यायाः स्तुतये[1]। कथम्? ब्रह्मविज्ञानाद्ध्यग्न्यादयो देवा देवानां श्रेष्ठत्वं जग्मुः, ततोऽप्यतितरामिन्द्र इति। अथवा दुर्विज्ञेयं ब्रह्मेत्येतत्प्रदर्श्यते। येनाग्न्यादयोऽतितेजसोऽपि क्लेशेनैव ब्रह्म विदितवन्तस्तथेन्द्रो देवानामीश्वरोऽपि सन्निति। वक्ष्यमाणोपनिषद्विधिपरं वा सर्वम्। ब्रह्मविद्याव्यतिरेकेण प्राणिनां कर्तृत्वाद्यभिमानो मिथ्येत्येतद्दर्शनार्थं वाऽऽख्यायिका, यथा देवानां जयाद्यभिमानस्तद्वदिति। ब्रह्म यथोक्तलक्षणं परं ह किल देवेभ्यः अर्थाय विजिग्ये जयं लब्धवत्, देवानामसुराणां च सङ्ग्रामेऽसुराञ्जित्वा जगदरातीनीश्वरसेतुभेत्तॄन्देवेभ्यो जयं तत्फलं च प्रायच्छज्जगतः स्थेम्ने। तस्य ह किल ब्रह्मणः विजये देवाः अग्न्यादयः अमहीयन्त महिमानं प्राप्नुवन्तः। तदाऽऽत्मसंस्थस्य प्रत्यगात्मन ईश्वरस्य सर्वज्ञस्य सर्वक्रियाफलसंयोजयितुः प्राणिनां सर्वशक्तेर्जगतः स्थितिं चिकीर्षोरयं जयो महिमा चेत्यजानन्तः ते देवा ऐक्षन्त ईक्षितवन्तोऽग्न्यादिस्वरूपपरिच्छिन्नात्मकृतः अस्माकमेवायं विजयः अस्माकमेवायं महिमा अग्निवाय्विन्द्रत्वादिलक्षणो जयफलभूतोऽस्माभिरनुभूयते नास्मत्प्रत्यगात्मभूतेश्वरकृत इति मिथ्याभिमानेक्षणवताम्॥१॥

तद्धैषां विजज्ञौ। तेभ्यो ह प्रादुर्बभूव। तन्न व्यजानत किमिदं यक्षमिति॥२॥

2. Verily that (Brahman) knew that (delusion) of them. It appeared before them. They did not know what that spirit was.

तत् ह किल एषां मिथ्येक्षणं विजज्ञौ विज्ञातवद्ब्रह्म। सर्वेक्षितृ हि तत्सर्वभूतकरणप्रयोक्तृत्वाद्देवानां च मिथ्याज्ञानमुपलभ्य मैवासुरवद्देवा मिथ्याभिमानात्

[1] इयमाख्यायिकारभ्यत इत्यनुषङ्गः।

[illegible]मंस्येतुरिति तदनुकम्पया देवानामभिमानापनोदेनानुग्रहीष्यामिति तेभ्यः देवेभ्यो ह किलार्थाय प्रादुर्बभूव स्वयोगमाहात्म्यनिर्मितेनात्यद्भुतेन विस्मापनीयेन रूपेण देवानामिन्द्रियगोचरे प्रादुर्भूतवत्। तत् प्रादुर्भूतं ब्रह्म न व्यजानत नैव विज्ञातवन्तो देवाः। किमिदं यक्षम् पूज्यं महद् भूतमिति ॥२॥

तेऽग्निमब्रुवन्। जातवेद एतद्विजानीहि—किमेतद् यक्षमिति। तथेति ॥३॥

तदभ्यद्रवत् तमभ्यवदत्। कोऽसीति। अग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति ॥४॥

तस्मिंस्त्वयि किं वीर्यमिति? अपीदं सर्वं दहेयं यदिदं पृथिव्यामिति ॥५॥

तस्मै तृणं निदधावेतद्दहेति। तदुपप्रेयाय, सर्वजवेन तन्न शशाक दग्धुम्। स तत एव निववृते—नैतदशकं विज्ञातुं यदेतद् यक्षमिति ॥६॥

3. They spoke to Agni: Jātavedas, find this out what wonderful being this is. So be it (said he).

4. He (Agni) ran up to it (Brahman). It (Brahman) said to him: Who art thou? He answered: Verily I am Agni, verily I am Jātavedas.

5. (Brahman asked him:) What power is there in thee, who art of such a nature? (Agni replied:) I can even burn whatsoever there is on earth.

6. It placed a blade of grass before him (saying): Burn this. He went towards it with all speed, he could not burn it. He thence returned (saying): I have not been able to find out what this spirit is.

ते तदजानन्तो देवाः सान्तर्भयास्तद्विजिज्ञासवः अग्निम् अग्रगामिनं जातवेदसं सर्वज्ञकल्पम् अब्रुवन् उक्तवन्तो हे जातवेदः, एतत् अस्मद्गोचरस्थं यक्षं विजानीहि विशेषतो बुध्यस्व। त्वं नस्तेजस्वी। किमेतद् यक्षमिति,

तथा अस्तु इति तद् यक्षम् अभ्यद्रवत् तत्प्रतिगतवानग्निः। तं च गतवन्तं पिपृच्छिषुं तत्समीपेऽप्रगल्भत्वात्तूष्णींभूतं तम् तद् यक्षम् अभ्यवदत् अग्निं प्रत्यभाषत कोऽसीति। एवं ब्रह्मणा पृष्टोऽग्निः अब्रवीदग्निर्वै अग्निनामा अहं प्रसिद्धो जातवेदा इति च, नामद्वयेन प्रसिद्धतयात्मानं श्लाघयन्। इत्येवमुक्तवन्तं ब्रह्मावोचत् तस्मिन्नेवं प्रसिद्धगुणनामवति त्वयि किं वीर्यम् सामर्थ्यमिति। सोऽब्रवीत् इदं जगत्सर्वं दहेयं भस्मीकुर्याम्। यदिदं स्थावरादि पृथिव्यामिति। पृथिव्यामित्युपलक्षणार्थम्। यतोऽन्तरिक्षस्थमपि दह्यत एवाग्निना। तस्मै एवमभिमानवते ब्रह्म तृणं निदधौ पुरोऽग्नेः स्थापितवत्। ब्रह्मणा एतत् तृणमात्रं ममाग्रतो दह न चेदसि दग्धुं समर्थो मुञ्च दग्धृत्वाभिमानं सर्वत्र इति उक्तः तत् तृणम् उपप्रेयाय तृणसमीपं गतवान्। सर्वजवेन सर्वोत्साहकृतेन वेगेन गत्वा न शशाक नाशक्नोत् तत् दग्धुम्। सः जातवेदास्तृणं दग्धुमशक्तो व्रीडितो हतप्रतिज्ञः तत एव यक्षादेव तूष्णीं देवान्प्रति निववृते निवृत्तः प्रतिगतवान्। न एतत् यक्षम् अशकम् शक्तवानहं विज्ञातुम् विशेषतो यदेतद् यक्षमिति ॥३-६॥

अथ वायुमब्रुवन् वायवेतद्विजानीहि—किमेतद् यक्षमिति। तथेति ॥७॥

तदभ्यद्रवत् तमभ्यवदत्—कोऽसीति। वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति ॥८॥

तस्मिꣳस्त्वयि किं वीर्यमिति? अपीदꣳ सर्वमाददीय यदिदꣳ पृथिव्यामिति ॥९॥

तस्मै तृणं निदधावेतदादत्स्वेति। तदुपप्रेयाय, सर्वजवेन तन्न शशाकादातुम्। स तत एव निववृते—नैतदशकं विज्ञातुं यदेतद् यक्षमिति ॥१०॥

7. Then they spoke to Vāyu: Vāyu, find this out what wonderful being this is. Be it so (said he).

8. He (Vāyu) ran up to it. It (Brahman) said: Who art thou? He answered: Verily I am Vāyu, verily I am Mātariśvan.

9. (Brahman asked him:) What power is there in thee, who art of such a nature? (Vāyu replied:) I can blow off whatsoever there is on earth.

10. It placed a blade of grass before him (saying): Blow this off. He went towards it with all speed, he could not blow it off. He thence returned (saying:) I could not find out what wonderful being this is.

अथ वायुमिति। अथ अनन्तरं वायुमब्रुवन् हे वायो एतद्विजानीहीत्यादि समानार्थं पूर्वेण। वानाद्गमनाद्गन्धनाद्वा वायुः। मातरि अन्तरिक्षे श्वयतीति मातरिश्वा। इदं सर्वम् अपि आददीय गृह्णीयाम्। यदिदं पृथिव्यामित्यादि समानमेव ॥७-१०॥

अथेन्द्रमब्रुवन् मघवन्नेतद्विजानीहि—किमेतद् यक्षमिति। तथेति। तदभ्यद्रवत्। तस्मात् तिरोदधे ॥११॥

स तस्मिन्नेवाकाशे स्त्रियमाजगाम, बहुशोभमानामुमां हैमवतीं तां होवाच किमेतद् यक्षमिति ॥१२॥

11. Then they spoke to Indra: Maghavan, find this out what wonderful being this is. Be it so (said he). He (Indra) ran up to it. It (Brahman) disappeared from before him.

12. There in the same place he came upon a woman, most beautiful, Umā, the daughter of Himavat. He asked her: What is this most beautiful spirit?

अथेन्द्रमिति। अथेन्द्रमब्रुवन्मघवन् एतद्विजानीहीत्यादि पूर्ववत्। इन्द्रः परमेश्वरो मघवान् बलवत्त्वात् तथेति तदभ्यद्रवत् तस्मात् इन्द्रादात्मसमीपं

गतात् तद्ब्रह्म तिरोदधे तिरोभूतम्। इन्द्रस्येन्द्रत्वाभिमानोऽतितरां निराकर्तव्य इत्यतः संवादमात्रमपि नादाद्ब्रह्म। इन्द्राय तद् यक्षं यस्मिन्नाकाशे आकाशप्रदेशे आत्मानं दर्शयित्वा तिरोभूतम् इन्द्रश्च ब्रह्मणस्तिरोधानकाले यस्मिन्नाकाशे आसीत् इन्द्रः तस्मिन्नेवाकाशे तस्थौ सः किं तद् यक्षमिति ध्यायन्, निववृतेऽग्न्यादिवत् न। तस्येन्द्रस्य यक्षे भक्तिं बुद्ध्वा विद्या उमारूपिणी प्रादुरभूत्स्त्रीरूपा। स इन्द्रस्ताम् उमां बहुशोभमानाम्। सर्वेषां हि शोभमानानां शोभमानतमा विद्या। तदा बहुशोभमानेति विशेषणमुपपन्नं भवति। हैमवतीम् हेमकृताभरणवतीमिव बहुशोभमानामित्यर्थः। अथवा उमैव हिमवतो दुहिता हैमवती नित्यमेव सर्वज्ञेनेश्वरेण सह वर्तत इति ज्ञातुं समर्थेति कृत्वा ताम् उपजगाम। इन्द्रः ताम् ह उमां किल उवाच पप्रच्छ ब्रूहि किम् एतत् दर्शयित्वा तिरोभूतं यक्षमिति ॥११-१२॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीमच्छङ्करभगवत्पादकृतौ केनोपनिषत्पदभाष्ये तृतीयः खण्डः ॥३॥

४: खण्डः

सा ब्रह्मेति होवाच। ब्रह्मणो वा एतद्विजये महीयध्वमिति।
ततो हैव विदाञ्चकार ब्रह्मेति ॥१॥

She said: It is Brahman; for verily in this victory of Brahman do you glory thus. Then did the Gods learn that was Brahman.

सा ब्रह्मेति होवाच ह किल ब्रह्मणः वै ईश्वरस्यैव विजये—ईश्वरेणैव जिता असुराः, यूयं तत्र निमित्तमात्रम्। तस्यैव विजये यूयं महीयध्वम् महिमानं प्राप्नुत। एतदिति क्रियाविशेषणार्थम्। मिथ्याभिमानस्तु युष्माकमयम् अस्माकमेवायं विजयोऽस्माकमेवायं महिमेति। ततः तस्मात् उमावाक्यात् हैव विदांचकार ब्रह्मेतीन्द्रः; अवधारणात्ततो हैवेति, न स्वातन्त्र्येण ॥१॥

उमां हैमवतीम्—This is probably the second mention of Umā, the daughter of the Himālayas in literature. The earliest mention is *found in TA. "This legend that Umā, the daughter of the Himālayas revealed the mystic idealism of the Upaniṣads to the Gods* is an imaginative expression of the truth that the thoughts of the Upaniṣads were developed by the forest-dwellers in the mountain fastnesses of the Himālayas" (RADHAKRISHNAN, *The Principal Upaniṣads*, p. 585).

बहुशोभमानाम्—"Beauty is the expression of inward purity. Umā is the wisdom that dispels Indra's ignorance. Here knowledge introduced by divine grace will not do. In the lives of saints we find that the sight of an angel or the hearing of its voice floods the seer with a new power and imparts illumination" (RADHAKRISHNAN, *Ibid*).

APPENDIX I

THE PADAPĀṬHA OF THE ṚGVEDA

The Padapāṭha of the Ṛgveda occupies a unique place in the literature of the world. It may be regarded as the oldest and most authoritative commentary on RV. as well as the first systematic work on grammar ([1]शाकल्यः पाणिनिर्यास्क इत्यृगर्थपराश्रयः । यथाशक्त्यनुधावन्ति न सर्वं कथयन्त्यमी ॥ Veṅkaṭamādhava on RV. viii. 1. 7). No doubt it mainly analyses the stanzas of RV. into their constituent padas, but this analysis throws a flood of light on many difficult and disputed points of exegesis.

In order to understand the Padapāṭha we must have a clear conception of the nature of the pada. In the *Aitareya Brāhmaṇa* xxvi. 2 we find the mantras divided into ऋक्, अर्धर्च, पद and अक्षर. From this it is clear that पद refers to what is known as पाद or चरण, *i.e.*, a quarter of a stanza.

In RV. पद means a step. Thus Viṣṇu is said to have covered the three worlds with his three steps (त्रीणि पदा वि चक्रमे) and we are often reminded of the highest step of Viṣṇu (तद् विष्णोः परमं पदम्). Now when each quarter of a stanza (or each third in the case of Gāyatrī stanzas and each fifth in the case of Paṅktis) came to be regarded as a step to the expression of the full meaning of the stanza (पादे पादे समाप्यन्ते प्रायेणार्था अवान्तराः—Veṅkaṭamādhava on RV. vi. 8. 14) it came to be regarded as a pada (*cf.* अर्थः पदम् *Vājasaneyi-Prātiśākhya* iii. 2). When the seers proceeded still further in their analysis and regarded each word composing the sentence as such a step words came to be

---

[1] The authors of the *Ṛgveda Padapāṭha*, *Aṣṭādhyāyī* and *Nirukta* respectively.

looked upon as padas. In the case of compounds the sense of each component helps to express the idea of the whole, so each word was regarded as a pada. In the case of certain suffixes and endings the base of a word behaves exactly as it does when it is used as the first member of a compound, *e.g.*, विद्वस् becomes विद्वद् before भिस्, भ्याम्, भ्यस् and सुप् exactly as it becomes विद्वद् before गण, जन, etc., so words came to be regarded as पद's before भिस्, भ्याम्, भ्यस्, सुप् and many taddhita suffixes beginning with consonants except *y*. Thus in the Padapāṭha we find not only the words of the hymns taken separately and the compounds often analysed into their component parts, but single words also analysed into प्रकृति and प्रत्यय.

Pāṇini defines पद thus [1. 4. 14-20]:

सुप्तिङन्तं पदम्।

नः क्ये[1]। (This is not wholly accepted by Śākalya.)

सिति च[2]। (This is not fully accepted by Śākalya.)

स्वादिष्वसर्वनामस्थाने। (This is accepted with many reservations.)

यचि भम्।

तसौ मत्वर्थे।

अयस्मयादीनि छन्दसि।

---

[1] उक्षण्य 'to act like a bull', उदन्य 'to irrigate', ब्रह्मण्य 'to be devout' and वृषण्य 'to act like a bull' are not analysed because their stems do not behave like padas inasmuch as the final न् is not dropped. वृषायते is analysed as वृषऽयते because the न has been dropped here as in the case of other padas. Similarly, वसुष्यति is not analysed though वसूयते is analysed as वसुऽयते.

[2] This is merely a technical rule for the purposes of the operations prescribed in the *Aṣṭādhyāyī* and we cannot expect it to be observed by others. Thus though ऋतु in ऋत्विय is technically a pada according to छन्दसि घस् v. 1. 106 it is not analysed by the author of the *Padapāṭha*. अहंयुः is analysed because अहम् behaves as a पद before यु.

Śākalya regards a stem ending in a short vowel before क्वसु as a पद. आतस्थिऽवांसम् ii. 12. 8, परेयिऽवांसम् x. 14. 1. So acc. to Śākalya we should have a separate rule like क्वसः कसौ.

Before dealing in detail with the Padapāṭha we may dispose of the question as to which is the earlier—the Saṁhitā-text or the Pada-text. The question appears simple to us but Mīmāṁsakas and grammarians have disputed the point as if it were as difficult to settle as the question: Which came first—the hen or the egg? Durga, in his commentary on the *Nirukta*, hits the nail on the head when he says: संहितायाः प्रकृतित्वं न्याय्यः। मन्त्रो ह्यभिव्यज्यमानः पूर्वम् ऋषेर्मन्त्रदृशः संहितयैवाभिव्यज्यते न पदैः। अतः संहितामेव पूर्वमध्यापयन्त्यनूचाना ब्राह्मणा अधीयते चाध्येतारः। अपि च यागे कर्माणि संहितयैव विनियुज्यन्ते मन्त्रा न पदैः। We must remember that though in the Saṁhitā-text we find the padas combined according to the rules of sandhi (in some cases, of a later period) and though the padas must have existed previously to the composition of the Saṁhitā, the Pada-text which is clearly the analysis of the Saṁhitā-text must be a later composition. As Tucker observes: "The sounds of speech are not pronounced singly and staccato. They link themselves together very much as writing links together the letters in a word. Just as the pen adopts the easiest or the most fluent method of running on letter into letter, so the organs of articulation follow the flowing course of least effort in running on sounds." And the result is what we know as sandhi. From this it is perfectly clear that the Saṁhitā-text is the earlier. This is the reason why to the authors of the Prātiśākhyas and to Pāṇini the Padapāṭha is अनार्ष. प्राक् चानार्षादिति-करणात् पदान्तांस्तद्युक्तानाम् RP. i. 58, परिग्रहे त्वनार्षान्तात् etc. RP. iii. 23, आमन्त्रितमितावनार्षे CA. i. 81, सम्बुद्धौ शाकल्यस्येतावनार्षे Pā. 1. 1. 16. The Saṁhitā is known as आर्षी. *Cf.* स्वरेषु चार्ष्याम् RP. ii. 52, चार्ष्यामिव ह्व्ययकारपूर्वौ विवृत्तेव प्रश्लयः समुकारः RP. ii. 56, अदृष्टमार्ष्यां यदि दृश्यते क्वचि RP. xi. 59, etc.

The school of Pāṇini has never been well-disposed towards the Padapāṭhakāra. Patañjali says: Rules of grammar should

not follow the authors of the Padapāṭha, the authors of the Padapāṭha should conform to the rules of grammar—a feat which would be rather difficult for the poor Padapāṭhakāras seeing that most of them were anterior to Pāṇini. In one instance, however, the Bhāṣykāra is driven to invoke the authority of the Padapāṭha. To explain अनूप Pāṇini frames the rule ऊदनोर्देशे vi. 3.98, where the long ऊ is taken exception to on the ground that since उ comes after the उ of अनु the short उ would contract with the उ of अनु to form ऊ. To this objection the Bhāṣyakāra replies that the long ऊ has been prescribed, because in certain padapāṭhas we find अनु ऊप. As Kaiyaṭa points out, this is in conflict with the Bhāṣyakāra's view न लक्षणेन पदकारा अनुवर्त्याः पदकारैर्नाम लक्षणमनुवर्त्यम्.

Bhaṭṭoji says the same thing in his *Sabdakaustubha* [३।१।१०९]: अत्र भाष्यम्। न लक्षणेन पदकारा अनुवर्त्याः पदकारैस्तु लक्षणमनुवर्त्यमिति। अयमाशयः। संहितैव नित्या, पदविच्छेदस्तु पौरुषेयः। अत एवार्थनिश्चयाभावान्नावगृह्णन्ति, यथा हरिद्रव [ऋ° सं° १०।९४।१२] इति। अत्र किं हरिशब्द इकारान्त उत हरित्शब्दस्तकारान्त इति सन्देहः। किञ्च वने न वायः [ऋ° सं° १०।२९।१] इति मन्त्रे "वेति च य इति च चकार शाकल्यः" इत्युपन्यस्य "उदात्तं त्वेवमाख्यातमभविष्यत्" इति अधायिशब्दे अट्स्वरप्रसङ्गेन दूषयित्वा वेरपृक्त वाय इत्येकपद्येन सिद्धान्तं कुर्वन् यास्कः [नि° ६।२८] पदविभागस्य पौरुषेयत्वं स्पष्टमेवाचष्टे। अपि च सति पदत्वेऽवग्रहः असति तु न इति मतद्वयमपि प्रायोवादमात्रम्, सम्प्रदायानुरोधादुभयस्यापि बहुधा परित्यागो दृश्यत एव. गोभिर्मदाय [ऋ° सं° ९।४३।१] गोभ्यो गातुम् [ऋ° सं° ८।४५।३०] इत्यादाववग्रहाभावात्, ईयिवांसमतिस्रिधः [ऋ° सं° ३ ९।४] देवयन्तो यथा मतिम् [ऋ° सं° १।६।६] इत्यादाववग्रहाच्चेति दिक्*।

As the words are considered seprarately all changes in the final of padas due to sandhi are to be restored. Thus we have

---

* Following in the foot-steps of Kaiyaṭa, Bhaṭṭoji brings these charges against the authors of the Padapāṭha. As a rule our grammarians do not take into consideration the fact of the growth and developement of languages or that of the growth and development of grammatical categories.

पुरःऽहितम् (i. 1. 1), पूर्वेभिः | ऋषिऽभिः | ईड्यः | नूतनैः | उत | सः | देवान् | आ | इह | (i. 1. 2), स्वः | चित्रश्रवःऽतमः । (i. 1. 4), सः | विद्वान् | आ | (ii. 6. 8), प्रकुपितान् | अरम्णात् । (ii. 12. 2), जिगीवान् । लक्षम् । (ii. 12. 4), यः | गृहान् | अभिऽआसति | (vi 54. 2), परःऽपा (v. 62. 6), जनान् | अनु | (x.14. 12), अक्षत | एमि | इत् | (x. 34. 5), षट् | उर्वीः । (x. 14. 16) and so on.

Sākalya invariably writes सः for स, for he thought like all his Indian successors that the word was originally सः. Rapson, however, points out in the *Bulletin of the School of Oriental Studies*, viii. 709 ff. that the evidence of Greek and Avesta shows that सः was a by-form of स. The Greek counterpart of सः is to be seen in the Homeric demonstrative pronoun *hòs*; *e.g.*, *allà kaì hòs deidoike* "even he fears" (*Iliad*, xxi. 198). Acc. to him, "the Pada Pāṭha of the Rigveda, which represents the first step in the history of Sanskrit Grammar—the *Vyākaraṇa* of a sentence into the words of which it is composed" is right in analysing सो अर्यः as सः अर्यः (ii. 12. 5) but not in analysing सेति in the same stanza as सः इति.

Restoration of ण and स

In cases of णत्व and षत्व the dental is, as a rule, restored.* इमा उ षु श्रुधी गिरः ii. 6. 1 (इमाः । ऊँ इति । सु श्रुधि । गिरः ।), निषिक् v. 62. 4 (निःऽसिक्), हिरण्यनिर्णिक् v. 62. 7 (हिरण्यऽनिर्निक्), सिषासन्तः v. 62. 9. (सिसासन्तः), निषद्य x. 14. 5 (निऽसद्य), विष्टुप् x. 14. 16 (विऽस्तुप्), चतुष्पदः (चतुःऽपदः) x. 121.3, निष्कृतम् (निःऽकृतम्) x. 34. 5, तुष्टुवांसः (तुस्तुऽवांसः) i. 89. 8, गिरिष्ठाः (गिरिऽस्थाः), i. 154. 2, etc.

Note that पूर्वाह्णे x. 34. 11, प्राणतः x. 121. 3 and प्राणिति x. 125. 4 are not analysed. The विकरण ना is not restored; *e.g.*, अरम्णात्.

Declension

Acc. to Pāṇini's rule स्वादिष्वसर्वनामस्थाने and its exception यचि भम् a stem is regarded as pada before the endings भिस्, भ्याम्, भ्यस् and

---

* णत्वषत्वे नत्वदत्वे ह्रस्वतां दीर्घतां तथा ।
विसृज्य संहिताधर्मान् [पठेत् पदानि यत्नतः] ॥

सुप्. Sākalya separates these endings by means of अवग्रह provided they come after short vowels and provided the स् of सु is not cerebralised*. Thus मरुत्ऽभिः, मरुत्ऽभ्याम्, मरुत्ऽभ्यः, मरुत्ऽसु, अग्निऽभिः, पंथऽभिः, पंक्तिऽभ्यः, तिरऽभिः, चतस्ःऽभिः, धेनुऽभिः, अप्ऽभिः (from अप्), मात्ऽभिः (from मास्), गोःऽभिः, पुरुऽभ्यः, मातृऽभ्यः, सुरऽभ्यः, राजऽभ्यः, रक्षःऽभ्यः, पद्ऽसु, but देवेभिः, स्वधाभिः, अश्वीभ्याम्, अग्निषु, नदीषु, गोषु, पूर्षु†, etc.

In the text we have मरुत्ऽभिः i. 19. 1, रश्मिऽभिः i. 19. 1, गोःऽभिः ii. 6. 8. अङ्गिरःऽभिः, ऋक्वऽभिः x. 14. 3, पितृऽभिः x. 14. 8, अहऽभिः v. 62. 2, अहःऽभिः, अक्तुऽभिः, अक्तुऽभिः x. 14. 9, वसुऽभिः x. 121. 8, बहुऽभ्यः x. 14. 1, ऋषिऽभ्यः, पथिकृत्ऽभ्यः x. 14. 15, सखिऽभ्यः x. 34. 2, 9, परायत्ऽभ्यः x. 34. 9,

---

* भिर्भ्यांभ्यस्सु। सौ च। न दीर्घात्। विनामि च। CA. iv. 31-34. A stem is separated when भिस्, भ्याम् or भ्यस् follows. Also when the loc. pl. termination सु follows. But no separation takes place after long vowels, nor before a dental which has been cerebralised.

The statement that "भ्याम्, भिस्, भ्यस् and सु are not separated when the pure stem, as in the a-dec., is modified in the preceding member" (*Vedic Reader*, p. 41) leaves much to be desired. Paranjape's explanation that the Padapāṭha separates terminations like भिः भ्यः सु when there are no vowel changes involved before them (PARANJAPE, *Peterson's Second Selection of Hymns from the Ṛgveda*, p. 65) is based on the above and is equally unsatisfactory. Paranjape's further statement that "the Padapāṭha is capricious as to bhiḥ also" betrays insufficient acquaintance with the Padapāṭha. गोभिः and गौभिः are not analysed for the simple reason that in them भिः comes after long vowels. A thorough study of the Padapāṭha reveals the fact that far from being capricious it is most methodical and systematic, only its conception of grammatical categories and linguistic phenomena is different from that of Pāṇini. To say that feminine stems are not separated from भिस् etc. would be equally wrong.

† There are a few exceptions due to analogy like पूःऽसु.

अप्ऽसु x. 125. 7. As against these we have दैवेभिः, चरिष्ठाभिः, वज्रिभिः, पूर्व्येभिः, त्रिककुभिः, रुद्रेभिः, मानुषेभिः, ताभ्याम्, अश्वाभ्याम्, पूर्वेभ्यः, पूर्वेभ्यः, एभ्यः, दैवेषु, पर्वतेषु, etc.

तुभ्यम् and अस्मभ्यम् are not analysed because of the peculiar ending. युवभ्याम् is analysed but युवाभ्याम् is left severely alone, because of its lengthened vowel. मरुद्भिः, वणिग्भिः, etc., are analysed मरुत्ऽभिः, वणिक्ऽभिः, etc., and not मरुद्ऽभिः, वणिग्ऽभिः, etc., because according to Śākalya and Śākaṭāyana (apart from nasals) only an unaspirate surd mute can stand at the end of a word. तृतीयं गार्ग्यः स्पर्शम्। प्रथमं शाकटायनः। (RP. I. 15-36)*.

As the Padapāṭha uses only one avagraha in the case of one single word, however complex it may be, and as the *vibhakti* is added last of all, even in the case of big compounds and तद्धितान्त words it is the endings that are separated, unless there are very special reasons for a different treatment (as in the case of प्रजापतिसृष्टिभिःऽइव). Thus विऽपात् but विपात्ऽभिः, द्वत्ऽपाणी but द्वत्पाणिऽभिः, पवीवत्ऽभिः, मयूररोमऽभिः, etc.

Compounds

The treatment of compounds in the Padapāṭha is rather interesting. As a rule compounds are dissolved into their component parts but since the Padapāṭhakāra cannot use more than one avagraha for one word, in the case of compounds consisting of more than two members the meaning is taken into consideration and the compound analysed accordingly. The *Vājasaneyi-Prātiśākhya* distinctly says: बहुप्रकृतावागन्तुना पर्वणा 'in the case of a compound consisting of several members, separation by avagraha is made of the member added last.' Thus in अदब्धव्रत-प्रमतिः there is an avagraha after अदब्धव्रत because the compound means 'superior-minded owing to unbroken observances'. Thus we may have "प्रऽजा, प्रजाऽपतिः, प्रजापतिऽसृष्टः, प्रजापतिसृष्टिऽभिः, प्रजापति-

* It is this difference of opinion among his predecessors that led Pāṇini to prescribe both in his rule वावसाने viii. 4. 56.

अर्चिभिःस्व" (WHITNEY). In the text we have होताऽस्वः i. 1. 5, चर्मम्ऽसहे ii. 6. 2, सधऽस्थात् i. 115. 4, उपऽस्थे i. 115. 5, अरम्ऽकृतः x. 14. 18, भूरिऽस्थात्राम् x, 125. 3, विऽभीदकः x. 34. 1, निःऽकृतम् x. 34. 5, प्रतिऽहोतॄ, x. 115. 6, कुमारऽदेष्णाः x. 34. 7, etc.

Dvandva compounds which are fairly frequent in the Vedas are, as a rule, not analysed in the Padapāṭha of the Ṛgveda*, probably because the most prominent Dvandvas in RV. are the Devatā-dvandvas which mark an intermediate stage between mere juxtaposition and true compounds, in which each member is inflected in the dual and in which sometimes a word or words intervene between the members of the compounds, *e. g.*, द्यावा चिदस्मै पृथिवी नमेते, ii. 12. 13. In several cases of such tmesis Śākalya goes so far as to remove the irregularity by changing the order of words.† Thus शुनश्चिच्छेपं निदितं सहस्रात् v. 2. 7 is written in the Pada-text as शुनःऽशेपम्। चित्। निऽदितम्। सहस्रात्। Similarly, नरा च शंसं दैव्यं च धर्तरि x. 86. 42 is written नराशंसम्। च। दैव्यम्। च धर्तरि। and so on. In the text the Dvandvas द्यावापृथिवी i. 115. 1, मित्रावरुणा v. 62. 2 and इष्टापूर्तम् x. 14. 8 are not analysed.

Compounds with नञ् are not analysed in the Pada-text, so far as the नञ् is concerned, because it is changed beyond recognition; *e g.*, अद्रुहः i. 19. 3, नाकस्य (?) i. 19. 6, अरिष्टाभिः vi. 54, 7, अकृणोयमाना v. 62. 6, अच्छिद्रम् v. 62. 9, अनमीवम् x. 14. 11, अक्षासः x. 34. 9 (प्रतिषेधे नावग्रहः VP. v. 24).

And when the नञ् is compounded with a following word of which the upasarga आङ् forms the first member, the आ also is not separated, *e.g.*, अनाधृष्टासः i. 19. 4 (उत्तरेण चाकारेण, Ib., v. 25).

इव is always regarded as compounded with the preceding word and separated from it by avagraha. In the case of गतौरिव

* द्वन्द्वानि द्विवचनान्तानि स्वरान्तपूर्वपदानि VP. v. 28.

† This phenomenon is known as अनानुपूर्व्यसंहिता in RP. ii. 78:

शुनश्चिच्छेपं निदितं नरा वा शंसं पूषणम्।

नरा च शंसं दैव्यं वा अनानुपूर्व्यसंहिता ॥

i. 124. 7, however, गर्त is separated from आरुगिव. The Padakāra here wants to show that the second element is आरुक् and not रुक् and hence he deviates from his ordinary procedure. In the case of प्रगृह्यs with इव, इति is placed after the प्रगृह्य word which is repeated after इति. Thus we have आर्त्नी इवेत्यार्त्नीऽइव for आर्त्नी इव ii. 39. 5. Since it is impossible to place the इति after आर्त्नी which is regarded as a part and parcel of the compound आर्त्नी इव, it is placed after इव and the compound analysed to show that it is आर्त्नी that is प्रगृह्य. आर्त्नी इवादिष्ववादिति: पर: CA. i. 82.

In our text occur पिताऽइव i. 1. 9, श्वघ्नीऽइव ii. 12. 4, विज:ऽइव ii. 6. 5, अश्वाजनीऽइव v. 62. 7, अश्वस्यऽइव x. 34. 3.

In RV. the final ī of duals of three syllables generally undergoes contraction with the इ of इव* (त्र्यक्षरान्तास्तु नेवे RP. ii. 55). This might have been one of the reasons which led the earlier grammarians to think that इव is always compounded with the word immediately preceding. प्रधी follows the analogy of उपधी and is contracted. In the case of अक्षी इव ii. 33. 5 the अवग्रह is not used in Pp., but in other cases of non contraction the avagraha is used. Thus we have उपधी इवेत्युपधीऽइव। प्रधी इवेति प्रधीऽइव for उपधीव प्रधीव ii. 35. 4, आर्त्नी इवेत्यार्त्नीऽइव x. 166. 3, हरी इवेति हरीऽइव i. 28. 7 but अक्षी इवेत्यक्षी इव ii. 39. 5.

सूनर, सूनृत etc. are not analysed because of the irregularity of the first member and समुद्र, समान, etc. are not analysed probably because of some doubt regarding the components.

Just as सूनर, सूनृत, etc. are not analysed because of their lengthened vowels, गिर्वणस्, गिर्वाहस्, etc. are not analysed because of the absence of lengthening. Both these cases come under समासान्यायभाञ्जि. तं त्वा गीर्भिर्गिर्वणसम् ii. 6. 3.

---

* "We have probably not contracted forms with इव, but the dual ī+*va*, the by-form of इव" (*Vedic Grammar*, p. 65 f.n. 12).

ऋत्विजम् i. 1. 1, गोपाम् i. 1. 8, सचस्व i. 1. 9, विचर्षणम्, द्रविणोदः ii. 6. 8; आनुषक् ii. 6. 8, समानम् ii. 12. 8, अन्तरिक्षम् i. 89. 10, i. 115. 1, सहुतम् i. 19. 8, तिविषी v. 62. 7, बृहस्पतिः i. 14. 2, स्वाहा, स्वधया x. 14. 3, उरुणसौ x. 14. 12, आहनसम् x. 125. 2, प्राणिति x. 125. 4, पूर्वाह्णे x. 34. 11, नासत्या i. 116. 2, are not analysed in the Pada-text.

The iteratives are regarded as compounds and analysed; *e.g.*, दिवेऽदिवे i. 1. 3, 7, तम्ऽतम् x. 125. 5.

"The compounds in *-páti-* are treated by the Pada text in three different ways: (1) *gnā'spáti-*, *bṛ'haspáti-*, *vánaspáti-*, *viśpáti-* (and *viśpátnī*) appear as simple words; (2) *gnā'ḥ-pátnī-*, *jā'ḥ-pati-*, *śácī-pati-*, *ṛta-pate* (voc.), *rādhaspate* (voc.), and those with a single accent (except *viśpáti-*) as compounds separated by the Avagraha sign; (3) all other doubly accented compounds (*e.g.*, *bráhmaṇas-páti-*) as two separate words" (MACDONELL, *Vedic Grammar*, p. 169). बृहस्पतिः x. 14. 3.

नहि (i. 19. 2), माकिः, माकीम् (vi. 54. 7) are not analysed.

Use of इति

The particle इति is generally used by Sākalya to draw attention to some peculiarity in the form of a word. It was probably first thought of in connexion with Pragṛhya vowels where though beginning with a vowel it was not allowed to enter into sandhi combination with the Pragṛhya. In the case of र-जात विसर्गs also it came in very handy, because it clearly showed the character of the विसर्ग by changing it into र*. Then its use was extended to other cases, and strangely enough it is used once or twice to show the स-जात character of the विसर्ग:

1. इति with प्रगृह्य:

परि द्यावापृथिवी यन्ति सद्यः i. 115. 3 (Pp. द्यावापृथिवी इति), रोदसी अभ्यसेताम् ii. 12. 1 (Pp. रोदसी इति), यं क्रन्दसी संयती विह्वयेते......नाना हवेते ii. 12. 8 (Pp. क्रन्दसी इति, संयती इति समऽयती, विह्वयेते इति विऽह्वयेते, हवेते इति), द्यावा

* प्रगृह्यं चर्चायामितिना, पदेषु रिफितं च संहितायामनिरुक्तम्.

चिदस्मै पृथिवी नमेते ii. 12. 13 (Pp. नमेते इति), *नो अस्य व्यथते पविः vi. 54. 3 (Pp. नो इति), जीरदानू v. 62. 3 (Pp. जीरदानू इति जीरऽदानू), त्रासाथे v. 62. 5 (त्रासाथे इति), वासाथे v. 62. 6 (वासाथे इति), चक्षाथे v. 62. 8 (चक्षाथे इति), सुदानू v. 62. 9 (Pp. सुदानू इति सुऽदानू), पथिरक्षी x. 14. 11 (Pp. पथिरक्षी इति पथिऽरक्षी), क्रन्दसी तस्तभाने रेजमाने x. 12. 6 (Pp. क्रन्दसी इति, तस्तभाने इति, रेजमाने इति), इमा उ षु श्रुधी गिरः ii. 6. 1 (Pp. ऊँ इति), समु पूष्णा गमेमहि vi. 54. 2 (ऊँ इति).

It will be noticed that unlike the case of र-जात विसर्ग *all* Pragṛhyas are followed by इति in Pp. It makes no difference whether the Pragṛhya character of the vowel is clear from the Saṁhitā-text or not. And when the Pragṛhya is a compound the components are shown separated by an avagraha after the इति as in the case of संयती, विजयेते, सुदानू, जीरदानू, etc. In cases like द्यावापृथिवी where the Pp. does not analyse the compound इति alone is used without repetition.

Note that in the case of the monosyllabic particle उ not only is इति used but the particle is also lengthened and nasalised. उकारश्चेतिकरणेन युक्तो रक्तोऽपृक्तो द्राघितः शाकलेन RP. i. 75. (See p. 123.) Even in the Saṁhitā itself the उ sometimes occurs as ऊ as in इमामू नु कवितमस्य मायाम् v. 85. 6.

In some editions of RV. उ at the end of a hemistich is printed in Pp. as ऊम् इति (as in नैषा गव्यूतिरपभर्तवा उ x. 14. 2), while other उ's are printed as ऊँ इति (as in ii. 6. 1). But since RP. and Pāṇini agree in attributing ऊँ इति to Śākalya without any reservation it is difficult to accept ऊम् इति as the correct reading of Pp. And Max Müller who had collated a very large number of MSS. makes no distinction in the treatment of the two उ's in the Padapāṭha. In its third volume the latest edition of RV. with S.'s commentary (the Poona edition) prints the Padapāṭha of मनसा मन्तवा उ vii. 4. 8 (at the end of a hemistich) as ऊँ इति and that of the उ of अयमु at the beginning of vii. 8. 2 also as ऊँ इति.

* But पुनर्नो नष्टमाजतु (Pp. नः) because this नो is not प्रगृह्य.

अपृक्त उ and अनपृक्त उ are also treated in the same way. No doubt अपृक्त occurs in RP. i. 75 उकारश्चेतिकरणेन युक्तो रक्तोऽपृक्तो द्राघितः शाकलेन as well as in CA. i. 72 उकारस्येतावपृक्तस्य, but अपृक्त in these two instances mean the particle उ and not सु, etc. Of course in the case of ई we have ईमिति in Pp. but there we have merely the full form ईम् which occurs in many passages of RV. with इति after it to draw attention to it.

2. इति with र-जात विसर्ग.

इति is put in after a रजात विसर्ग only when its रजात character is not clear from the Saṁhitā.

यो दासं वर्णमधरं गुहाकः ii. 12. 4 (Pp अकरित्यकः), येन स्वः स्तभितं येन नाकः x. 121. 5 (Pp. स्व१रिति स्वः), मम योनिरप्स्व१न्तः समुद्रे x. 125. 7 (Pp. अन्तरिति).

In the case of रजात विसर्ग repetition is rare except in the case of verbs. स्वः is repeated probably for reasons of accentuation. अन्तर्, अवर्, पुनर्, प्रातर्, द्वार्, वार्, वध्र्, वन्, etc. and the vocative of ṛ-stems like जामातः, दुहितः, etc. enumerated in RP. i. 101-102 are never repeated after इति.

3. इमां मे अग्ने समिधमिमामुपसदं वनेः ii. 6. 1 (Pp. वनेरिति वनेः). Here also there has been repetition after इति.

In दोषावस्तर्धिया वयम् i. 1. 7, यजिष्ठ होतरा गहि ii. 6. 6, अन्तर्ह्यग्न ईयसे ii. 6. 7, पुनर्नो नष्टमाजतु vi. 54. 10, etc., the Saṁhitā-text shows the र्, hence no इति is used.

Lengthening.

Metrical lengthenings are shortened in Pp. सचस्वा (सचस्व) नः स्वस्तये i. 1. 9, इमा उ षु श्रुधी* (श्रुधि) गिरः, निरंहसः पिपृता (पिपृत) निरवद्यात् तन्नो मित्रो वरुणो मामहन्ताम् (ममहन्ताम्) i. 115. 6, बृहस्पतिर्ऋक्वभिर्वावृधानः (ववृधानः)...यांश्च देवा वावृधुर्ये च देवान् (ववृधुः) x. 14. 3, यमाय जुहुता (जुहुत) हविः x. 14. 13, न जानीमो नयता (नयत) बद्धमेतम् x. 34. 4, मित्रं कृणुध्वं खलु मृळता (मृळत) नः x. 34. 14, यं स्मा (स्म) पृच्छन्ति कुह सेति घोरम् ii. 12. 5, अद्या (अद्य) देवा उदिता

* श्रुधि occurs in श्रुधि श्रुत श्रद्धिवं ते वदामि x. 125. 8.

स्वयंस i. 115. 6, यथा (यत्र) नः पूर्वं पितरः परेयुः x. 14. 2, 7; उपस्थ विम्याये मा (न) नमन्ते x. 34. 8, उरुणसावसुतृपा उदुम्बली x. 14. 12 (उरुःनसौ), चरावा (चरऽवा) विम्यामिच्छमानः x. 34. 10. Lengthenings regarded probably as anomalous are also shortened: ऋजूयताम (ऋजुऽयताम्) i. 89. 2, ऋजूयते (ऋजु,यते) i. 116. 23, रीरिषत (रिरिषत, छान्दसः पदकालीनो ह्रस्वः S.) i. 89. 9., चारैक् (चरैक) i. 124. 8, उषासः (उषसः i. 124. 9), जारयन्ती (जरयन्ती) i. 124. 10, वेदिमा (वेदिम) i. 69. 2.

Similarly, shortenings due to sandhi are restored to their original forms: विश्वशम्भुव (विश्वऽशम्भुवा) i. 160. 1.

Note that चानुषक् ii. 6. 1 and प्रावेपाः x. 34. 1 are not analysed probably because of the lengthening in the first syllable. मुमुजानः x. 34. 6. and दाधार x. 121. 1 were probably still current in Śākalya's time and regarded as regular by him and therefore the long vowels in these words are kept intact in Pp. The same applies to मादयस्व x. 14. 5 which is also found in classical Skt. in certain senses. मिनाति is short both in Sp. and Pp.

For एना see p. 127 and for जन्मा (ii. 6. 7) see p. 138.

Taddhita Suffixes

The taddhita suffixes तर and तम are generally separated; *e.g.*, चित्रश्रवःऽतमः i. 1. 5, वीरवत्ऽतमम् i. 1. 5; मधुमत्ऽतमम् x. 14. 15 (तरतमयोः CA. iv. 16).

When, however, तर and तम come after a compound ending in the roots दा, धा, सा, पा, गोपा, भू, and कृ it is separated along with the preceding root (p. 27), *e.g.*, रत्नऽधातमम् i. 1. 1. (वसुधातरः सहस्रसातमेति वसुमहद्भ्याम् CA. iv. 45, दातम-कृतम-भूतम-गोपातम-रत्नधातम-वसुधातमाः पूर्वेण VP. v. 3).

त्व and त्वन are separated, but तल् is not; *e.g.*, देवऽत्वम्, महिऽत्वम् i. 115. 4, महिऽत्वा x. 121. 3 (त्वे चान्तोदात्ते CA. iv. 26).

The possessive suffixes मत् and वत् are separated except when they come after त् or स्; *e.g.*, घृतऽवत् x. 14. 14, धनऽवन्तम् x. 34. 9, हिमऽवन्तः x. 121. 4 (मतौ। वकारादौ च। CA. iv. 17-18), but मनस्वान् ii. 12.

1, तुविष्मान् ii. 12. 12, नभस्वन्ता v. 62. 5, विवस्वन्तम् x. 14. 5 (तसौ मत्वर्थे Pāṇini i. 4. 19, न तकारसकाराभ्यां मत्वर्थे CA. iv. 47).

P. K. Nārāyaṇa Pillai says in an article on the *Ṛgveda Padapāṭha* in the *Bulletin of the Deccan College Research Institute* II, 257: "In employing avagraha to mark out prefixes and suffixes the Padapāṭha shows some inconsistency. Between the word and the suffix, in certain cases, we see the avagraha inserted. For example, kṣusmantam. But we meet with instances where the same suffix is not separated by avagraha. Ex. haviṣmantam. The suffix in 'devasyanta' is marked out but it is not marked in 'citayanta' ". All this is due to misconceptions regarding the true nature of a Pada.

Abstract substantives formed with वत् (p. 256) are also analysed; *e.g.*, प्रऽवतः x. 14. 1.

वत् in the sense of परिमाण is never separated; *e.g.*, एतावती x. 125. 5.

The possessive suffix व and वत् are separated; *e.g.*, अङ्गिऽवत् x. 125. 4; ऋणऽवा x. 34. 10. (वकारादौ च CA. iv. 18).

त्रा is separated while त्र is not (p. 374); *e.g.*, पुरुऽत्रा x. 125. 3 but यत्र (यत्-त्वं-त्रा-तातिषु च VP. v. 9).

Taddhita suffixes beginning with a vowel or य are never separated. When, however, such suffixes are added to stems liable to analysis they are to be analysed provided the first component consisting of more than one syllable ends in a vowel and has its first syllable lengthened; *e.g.*, मौजऽवतस्य x. 34. 1, but वैवस्वतम् x. 14. 1., सौमनसे x. 14. 6 (see p. 297).

क्वसु

The suffix क्वसु (-vāṁs) is separated after short vowels, and the analysis is regarded as so important that even when there is an upasarga preceding the root it is not the upasarga but the suffix that is separated. Thus we have परेयिऽवांसम् x. 14. 1, सुषुऽवांसः i. 89. 8, ममृऽवान् i. 116. 8, आतस्थिऽवांसा ii. 12. 8, आतस्थिऽवांसम्

i. 116. 5, etc. जिगीवान् ii. 12. 4 is not analysed, because क्वसु comes after a long vowel. विद्वान् is not analysed because क्वसु comes after a consonant. When, however, the व of क्वसु is changed into उ, it is the upasarga that is separated (वसौ क्वसात्। तेनैवोपसृष्टेऽपि। उपसर्गेणावकारे। CA. iv. 35-37).

The analysis is probably due to the close similarity between the suffixes क्वसु and वतुप in that both have the same form in the Voc. sing. (मतुवसो रु सम्बुद्धौ छन्दसि vii. 3. 1).

क्यच्, क्यङ्, क्यष्

Similarly, the denominative suffix य is often separated by an avagraha.* Thus we have देवऽयन्त. i. 115. 2. नमस्यन्त: i. 115. 3 is not analysed because नमस् is clearly not a pada; had it been a pada we should have नमोयन्त: exactly as we have दुवोयु: which is analysed. ओजायमानम् ii. 12 11 is not analysed because of the violent change in the final of ओजस्. चितयन्त: is not analysed because the suffix is not य but अय (णिच्). (धात्वर्थं यकारे स्वरपूर्वे VP. v. 10.)

Absence of Avagraha.

Several cases of the absence of avagraha are mentioned in the following Kārikā:

आदिमध्यान्तलुप्तानि समासान्न्यायभाञ्जि च।
नावगृह्णन्ति कवय: पदान्यागमवन्ति च॥

Sages do not analyse words of which the initial, medial or final syllable has suffered elision, compounds which are formed irregularly and words with infixes.

Words about whose derivation etc. there are doubts are not analysed. Thus समुद्र is not analysed, for even Yāska who was posterior to Sākalya had doubts about its elements:, समुद्द्रवन्त्यस्मादाप:, समभिद्रवन्त्येनमाप:, समभिद्रवन्तेऽस्मिन् भूतानि, समुदको भवति। समुनत्तीति वा। *Nir* ii. 10.

स्वस्ति is not analysed because अस्ति here is regarded as different from the finite verb अस्ति.

Accent

It is well known that the importance of accent as a morpheme in Vedic, in classical Greek and other languages can hardly be overestimated. The famous stanza:

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥

found in the *Mahābhāṣya* and in a very slightly different form in the *Nirukta* bears eloquent testimony to the fact. *'Indraśatru'* when accented on the first syllable means "he whose killer is Indra"; the same word when accented on the final syllable means "the killer of Indra"; similarly, *'te'* when accented corresponds in form and meaning to "they", when unaccented it means "yours"; *jyeṣṭha* accented on the first syllable means "greatest," when accented on the last syllable it means "eldest"; *brahman* accented on the first syllable means "prayer," accented on the final syllable it means "pray-er"; *apas* accented on the first syllable means "work," accented on the second syllable it means "active"; *bhūman* accented on the first syllable means "earth," accented on the final syllable, it means "abundance". Exactly the same thing is found in Greek also. Thus *patroktonos* when accented on the penult means "slayer of one's father" and when accented on the antepenult means "slain by one's father"; and *lithobolos* when accented on the penult means "throwing stones" but when accented on the antepenult means "pelted with stones". Similarly, *leukós* means "white," *léukos* "white fish"; *ágos* means "quilt," *agós* "leader"; *athróos* "crowded," *áthroos* "silent"; *tómos* "section," *tomós* "cutting", "sharp" and so on. In German, *übergehen* with the principal accent on the penult means "overlook" and the same word with the principal accent on the first syllable means "going over" or "across". In French *cote* means "petticoat," the same word with the

grave accent on the first syllable means "rib" "coast" and with the acute accent added on the final syllable means "side" "party". In English also the difference in meaning between conduct, perfect, etc., when accented on the first syllable and on the last syllable is well know . A great heart does not mean the same thing as Mr. Greatheart.* We have, therefore, to take into consideration the accent of a word while determining its meaning in the Vedas.

In Vedic the principal accent in each word is generally an Udātta (or the rising accent) which is not marked at all. The Anudātta (falling accent) following an Udātta becomes a dependent Svarita (rising-falling) accent unless an Udātta or independent Svarita follows. The Svarita, it may be mentioned here, is marked with a vertical stroke above the syllable and the Anudātta with a horizontal stroke below. Anudāttas following a dependent Svarita are not marked till an Udātta or independent Svarita is reached when the immediately preceding Anudātta is marked with the usual horizontal stroke below. Svaritas brought about by the contraction of two इs (*e.g.*, *vi ita*>*vīta* x. 14. 9) or by the sandhi combination of *i*, *ī* and *u*, *ū* with a following dissimilar vowel (*vi oman*>*vyòman*, *tanū' ā*>*tanvā* x. 14. 8), or of क, कन्या, स्वः, पथ्य, etc., are independent Svaritas. When an independent Svarita is immediately followed by an Udātta or another independent Svarita we have the कम्पस्वर which is represented by the numeral 1 or 3 (marked with both the horizontal stroke of the Anudātta and the vertical stroke of the Svarita) after the independent Svarita according as it is short or long. In dealing with the Paḍapāṭha we have to pay particular attention to all these points.

* *Oriental Literary Digest*, Vol. IV, Nos. 7-9.

Thus in अग्निमीळे पुरोहितम् the three words are taken together consequently मी becomes a dependent* Svarita and is marked with the usual vertical stroke of the Svarita. ळे is not marked as the next Udātta is रो the syllable (पु) preceding which is marked with the Anudātta stroke. In the Pada-text we have to take each word by itself, so both syllables of ईळे are marked with the horizontal stroke below. In the case of वीत we get two *separate words in Pp. and consequently the independent Svarita** no longer remains. The same is the case with अभ्येति i. 115. 2, व्युष्टौ v. 62.8, etc. In this way in most cases the कम्प स्वर's of the Samhitā lose their कम्प in the Pada-text; in some cases, on the other hand, a कम्प appears in Pp. where there was no कम्प in the Samhitā (see pp. 131-132).

कम्पस्वर

युयोध्य१स्मद् द्वेषांसि (Pp. युयोधि । अस्मत् । द्वेषांसि) ii. 6. 4,... एना जज्ञानाः पथ्या३ अनु स्वाः (Pp. ... पथ्याः । अनु ।) x. 14. 2, यस्यागृधद्वेदने वाज्य१क्षः (Pp. ...वाजी । अक्षः ।) x. 34. 4, जेष्यामीति तन्वा३ शूशुजानः (Pp. ...तन्वा । शूशु-जानः) x. 34. 6, येन स्वः स्तभितं येन नाकः (Pp. ...येन । स्व१रिति स्वः । स्तभितम् ।) x. 121. 5,...सुप्राव्ये३ यजमानाय सुन्वते (Pp. ...सुप्रऽअव्ये । यजमानाय ।) x. 125. 2, ...मम योनिरप्स्व१न्तः समुद्रे (Pp. ...अप्ऽसु । अन्तरिति ।) x. 125. 7, ...भवनड्

---

* उदात्तपूर्वं स्वरितमनुदात्तं पदेऽक्षरम् ।
अतोऽन्यत् स्वरितं स्वारं जात्यमाचक्षते पदे ॥ RP. iii. 7-8.

APPENDIX I

श्नथितमप्स्व१न्तः (अप्ऽसु । अन्तरिति) i. 116. 24, अरेपसा तन्वा३ शाशदाना (तन्वा । शाशदाना) i. 124. 6, सुधृष्टमे वपुष्ये३ न रोदसी (वपुष्ये३ इति । न) i. 160. 2 etc.

As regards upasarga and finite verb, when the upasarga is unaccented and the finite verb accented they are naturally regarded as one single word and separated by means of an avagraha; *e.g.*, *vitanvaté* (*vi* ऽ *tanvaté*) i. 115. 2, *paryábhūṣat* (*pari* ऽ *ábhūṣat*) ii. 12. 1, *udā́'jat* (*ut* ऽ *ā́'jat*) ii. 12. 3, *anuśā́'sati* (*anu*ऽ *śā́'sati*) vi. 54. 1, *upā́'sate* (*upa* ऽ *ā́'sate*) x. 121. 2, etc. (उदात्तवता तिङा गतिमता चाव्ययं समस्यत इति वक्तव्यम्। Mahābhāṣya ii. 2. 18).

When, however, the upasarga is accented and the finite verb unaccented, they are regarded as separate words; *e.g.*, *ā́' gamat* i. 1. 5, *émasi* i. 1. 7, (*ā́' imasi*[1]), *prá hūyase* i. 19. 1, *ā́' gahi* i. 19. 1, *úd agāt*, *ā́'prāḥ* (*ā́' aprāḥ*[1]) i. 115. 1, *abhyêti* (*abhi eti*[1]) i. 115. 2, *sáṁ jabhāra* i. 115. 4, *sáṁ bharanti* i. 115. 5, etc. *prḗ' hi* x. 14. 7, *ápeta, vîta* x. 14. 9, *úpehi* x. 14. 10, *vyâdadhuḥ* (*ví adadhuḥ*[1]) x. 125. 3, etc.

When, however, there is sandhi combination of the final vowel of the upasarga which is accented on the final vowel and the accented augment, in the Pada-text both the upasarga and the verb are accented; *e.g.*, *abhyáikṣetām* (*abhí áikṣetām*) and the two are regarded as separate words. See Mañjūṣā, vol. ix, pp. 133-35.

VP. distinctly says: नाभ्येकाक्षरस्य स्वरसन्धेयेऽक्षति (vi. 5) which is explained thus in the commentary: अभ्युपसर्गे एकाक्षरस्योपसर्गः स्वरात्मके उपसर्गे स्वरसन्धेये चाक्षति प्रत्यये नानुदात्तो भवति। अभेः स्वरात्मके भवति

---

[1] In such cases though it is not clear from the Saṁhitā if the verb is accented or not, still since it is a finite verb occurring in a principal clause and does not stand at the beginning of a sentence or pāda, etc., it is naturally unaccented.

यथा—अभि आ वर्तस्व। अभिः स्वरसन्धेये प्रकृति भवति यथा—याभिः मित्रावरुणौ अभि-असिञ्चन्। अभि ऐक्षेताम् मनसा। एकाक्षरस्य स्वरात्मकी भवति यथा—वि आ अकरोत्। नि असीदत्। एकाक्षरस्य स्वरसन्धेये प्रकृति भवति यथा—सत्यधर्मा वि आनट्। यत् पुरुषम् वि अदधुः।

In *śvaghnī'va yó jigīvā llakṣámā'dat* ii. 12. 4, *ādat* is not analysed. See p. 173.

APPENDIX II

Grammatical Notes

Sandhi

1. Intervocal ड and ढ become ळ and ळ्ह respectively (pp. 14, 22); *e.g.*, अग्निमीळे पुरोहितम् i. 1.1, त्रिकद्रुकेभिः पतति षळुर्वीः x. 14. 16, न मा मिमेथ न जिहीळ एषा x. 34. 2, येन द्यौरुग्रा पृथिवी च दृळ्हा x. 121. 5.

2. प्रकृत्यान्तःपादमव्यपरे ६।१।११५, V. G. S. (p. 23*a*):

स नः पितेव सूनवेऽग्ने i. 1. 9, विश्वे देवासो अद्रुहः i. 19. 3, यो अन्तरिक्षं विममे वरीयः ii. 12. 2, यो अश्मनोरन्तरग्निं जजान ii. 12. 3, सो अर्यः पुष्टीर्विज इवा मिनाति ii. 12. 5, यो अपां नेता स जनास इन्द्रः ii. 12. 7, यो अच्युतच्युत् स जनास इन्द्रः ii. 12. 9, उतेमाहुर्नैषो अस्तीत्येनम् ii. 12. 5, ओजायमानं यो अहिं जघान ii. 12 11, सनेम मध्वो अधिगर्त्यस्य v. 62. 7, यो अञ्जसानुशासति vi. 54. 1, अग्निदूतो अरंकृतः x. 14. 13, मातली कव्यैर्यमो अङ्गिरोभिः x. 121. 3, यो अन्तरिक्षे रजसो विमानः x. 121. 5, मया सो अन्नमत्ति यो विपश्यति x. 125. 4; but युक्तग्राव्णो योऽविता सुशिप्रः ii. 12. 6, न कोशोऽव पद्यते vi. 54. 4, परायद्भ्योऽव हीये सखिभ्यः x. 34. 6.

3. (*a*) Nasalisation to avoid hiatus (p. 311, V. G. S., p, 23 f.n. 1); न्युप्ताश्च बभ्रवो वाचमक्रतँ एमीदेषां निष्कृतं जारिणीव x. 34. 5.

(*b*) Nasalisation of final न् (pp. 32, 139, आतोऽटि नित्यम् ८।३।३); स देवाँ एह वक्षति i. 1. 2, स विद्वाँ आ च पिप्रयः ii. 6. 8, यः पर्वतान् प्रकुपिताँ अरम्णात् ii. 12. 2, यो रुद्राँ अभिशासति vi. 5. 42, अथा पितॄन्त्सुविदत्राँ उपेहि x. 14. 10, यमस्य दूतौ चरतो जनाँ अनु x. 14. 12. (V. G. S., § 39).

4. Final न् intact before initial त (उभयथर्क्षु ८।३।८, V. G. S., p. 32, 2).

पूषन्तव व्रते वयम् vi. 54. 9, य ईङ्खयन्ति पर्वतान् तिरः समुद्रमर्णवम् i. 19. 7.

5. Visarjanīya changed into स् before प (पञ्चम्याः परावध्यर्थे। पातौ च बहुलम्। ८।३।५१-५२। V. G. S., p. 34, 2*a*).

दिवस्परि ii. 6. 5, परस्पा v. 62. 6.

6. Cerebralization of स् and न् (सुञः ८।३।१०७, नश्च धातुस्थोरुषुभ्यः ८।४।२७, उपसर्गादनोत्परः: emended to उपसर्गाद् बहुलम् by Patañjali V. G. S., pp. 46*c*, 38*c*).

इमा उ षु श्रुधी गिरः ii. 6. 1; उरूणसावसुतृपा उदुम्बलौ x. 14. 12, पर्षि षः पारमंहसः स्वस्ति iii. 33. 3. परि णो हेती रुद्रस्य वृज्याः ii. 33. 14.

Declension

1. Nom. pl. of masc. *a*-stems in—*āsaḥ* (see p. 70, आज्जसेरसुक् ७।१।५०, V. G. S., p. 78, f. n. 7).

विश्वे देवासो अद्रुहः, अनाधृष्टास ओजसा, सुक्षत्रासो रिशादसः i. 19. 3, 4, 5, दिवि देवास आसते i. 19. 6, स जनास इन्द्रः ii. 12. 1, यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे रथासः ii. 1?. 7, वयं त इन्द्र विश्वह प्रियासः सुवीरासो विदथमा वदेम ii. 12. 15, आ वामश्वासः सुयुजो वहन्तु v. 62.4, अहस्तासो हस्तवन्तं सहन्ते x. 34. 9.

2. पन्थाम् as the Acc. s. of पथिन् (V. G. S., p. 79*a*).

बहुभ्यः पन्थामनुपस्पशानम् x. 14. 1. In RV. पथिन् is declined thus: Nom. s. पन्थाः, Nom. pl. पन्थाः, Acc. s. पन्थाम्. The stem मन्थन् first makes its appearance in AV. where besides the above we have Nom. s. पन्था, Nom. pl. पन्थानः, Acc. s. पन्थानम्. See p. 256.

3. Acc. sing. of *an*-stems in *anam*: प्रवन्तं पूषणं वयम् iii. 59. 8.

Pāṇini's rule is वा षपूर्वस्य निगमे vi. 4.9 where वा is to be regarded as व्यवस्थावाची, for in the Vedas we get पूषणम् alone (V. G. S., p. 68 top). पूषाणम् is found in the *Mahābhārata* and later:

य एव देवा हन्तारस्ताँल्लोकोऽर्चयते भृशम् ।
हन्ता रुद्रस्तथा स्कन्दः शक्रोऽग्निर्वरुणो यमः ॥
हन्ता कालस्तथा वायुर्मृत्युर्वैश्रवणो रविः ।
वसवो मरुतः साध्या विश्वे देवाश्च भारत ॥
एतान् देवान् नमस्यन्ति प्रतापप्रणता जनाः ।
न ब्रह्माणं न धातारं न पूषाणं कथञ्चन ॥

Mahābhārata, Śānti xv. 16-18.

4. सुमेधाम् as the Acc. sing. of सुमेधस्; तं ब्रह्माणं तमृषिं तं सुमेधाम् x. 125. 5.

5. Nom. Acc. dual in *ā* (सुपां सु-लुक्-पूर्वसवर्णाच्छे° ७।१।३९, p. 282):

बर्हिरिव यजुषा रक्षमाणा v. 62. 5, अक्रविहस्ता सुकृते परस्पा...राजाना क्षत्रमहृणीयमाना v. 62. 6, उभा राजाना स्वधया मदन्ता x. 14. 7, अहं मित्रावरुणा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा x. 125. 1.

6. Nom. and Acc. pl. of neuter stems in *ā* (शेश्छन्दसि बहुलम् ७।१।७, V. G. S., p. 78 top, f. n. 14).

विश्वाजन्मोभया कवे ii. 6. 7, दश शता सह तस्थुसदेकम् v. 62. 1, सर्वा ता यम आहिता x. 14. 16, ततो वि तिष्ठे भुवनानि विश्वा x. 125. 7, आरभमाणा भुवनानि विश्वा x. 125. 8.

7. Acc. sing. of *ī*-stems and *ū*-stems in *yâm* and *vâm*; as जसुरये स्तर्यं विपप्युर्गाम् i. 116. 22, यावया वृक्यं वृकम् x. 127. 6, आविस्तन्वं कृणुषे दृशे कम् i. 123. 11 [वा छन्दसि (६।१।१०६) इत्यधिकारात् अमि पूर्वत्वाभावः।]

8. Acc. pl. of fem. *i*-stem and of *ap* like the nom. pl. (वा छन्दसि ६।१ १०६, V. G. S., p. 88 top, § 78*a*):

ईर्मान्तस्थुषीरहभिर्दुदुह्रे v. 62. 2, आपो ह यद् बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम्, यश्चिदापो महिना पर्यपश्यत् x. 121. 8. यश्चापश्चन्द्रा बृहतीर्जजान x. 121. 9 is quite regular.

9. Instr. sing. of *a*-stems in *ā* (V. G. S., p. 77, f. n. 3):

मध्या कर्तोर्विततं सं जभार i. 115. 4, एना घृतेन सुजात ii. 6. 2, एना जज्ञानाः पथ्या अनु स्वा x. 14. 2, एना राजन् हविषा मादयस्व x. 14. 4, परो दिवा पर एना पृथिव्या x. 125. 8, यः प्राणतो निमिषतो महित्वा x. 121. 3, यस्येमे हिमवन्तो महित्वा x. 121. 4.

10. Instrumental singular with the lengthening of the final of the stem (पूर्वसवर्णदीर्घः, V. G. S., p. 80, f. n. 2).

यो दासं वर्णमधरं गुहाकः ii. 12. 4, यः सुन्वन्तमवति यः पचन्तं यः शंसन्तं यः शशमानमूती ii. 12. 14.

11. Instrumental plural of *a*-stems in *-ebhiḥ* (बहुलं छन्दसि ७।१।१० coming after अतो भिस ऐस्, V. G. S., p. 77, f. n. 9):

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत i. 1. 2, देवो देवेभिरा गमत् i. 1. 5, प्रेहि प्रेहि पथिभिः पूर्व्येभिः x. 14. 7, त्रिकद्रुकेभिः पतति षळुर्वीः x. 14. 16, अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः x. 125. 1, जुष्टं देवेभिरुत मानुषेभिः x. 125. 5.

12. Instr. sing. of *mahiman* as *mahinā* (V. G. S., p. 69, f. n. 1): यश्चिदापो महिना पर्यपश्यत् x. 121. 8, एतावती महिना सं बभूव x. 125. 8.

13. The Instr. sing. of *tanū* (V. G. S., pp. 89-90):

In RV. it is *tanvā* x. 14. 8, x. 34. 6. In Svet., U. it is *tanuvā* iii. 5. In RV. तनू is declined thus: तनूः, तन्वा, तन्वः ; तन्वम्, तन्वा, तन्वः ; तन्वा...तनूभिः ; तन्वे...तनूभ्यः ; तन्वः...; तन्वः...तनूनाम् ; तन्वि...तनूषु. तनूम् Acc. s. and तन्वाम् Loc. s. make their appearance in AV. तनुवम् appears in TS. by the side of तन्वम्. तनुवा occurs in TB.

14. *ayā* as the instr. sing. of *idam* in the fem. (V. G. S., p. 108, f. n. 7):

अया ते अग्ने विधेमोर्जो नपादश्वमिष्टे । एना सूक्तेन सुजात ॥ ii. 6. 2.

15. Instr. pl. of *ahan* as *ahabhiḥ* (see p. 217):

ईर्मा तस्थुषीरहभिर्दुदुह्रे v. 62. 2, but अहोभिरद्भिरक्तुभिर्व्यक्तम् x. 14. 9.

16. Gen. sing. of masc. *i*- and *u*-stems in *-yaḥ* and *-vaḥ* (जसादिषु छन्दसि वावचनम्, p. 177, V. G. S., p. 84, 3, p. 81, f. n. 8):

सो अर्यः पुष्टीर्विज इवा मिनाति ii. 12. 5, सनेम मध्वो अधिगर्त्यस्य v. 62. 7, विष्णोः पदे परमे मध्व उत्सः i. 154. 5.

17. Loc. sing. of fem. *i*-stems in *ā* (डा, V. G. S., p. 81, f. n. 2):

अद्या देवा उदिता सूर्यस्य i. 115. 6, अयःस्थूणमुदिता सूर्यस्य v. 62. 8.

18. Loc. sing. of *an*-stems without ending (V. G. S., p. 67, § 90. 2):

अहं दधामि पितरमस्य मूर्धन् x. 125. 7.

19. Voc. sing. of *-vāṁs*-stems in *-vaḥ* (मतुवसो रु सम्बुद्धौ छन्दसि ८।३।१, V. G. S., p. 64, f. n. 2, p. 66):

यक्षि चिकित्व आनुषक् ii. 6. 8.

20. *rātrī* with the long final (p. 112, रात्रेश्चाजसौ ४।१।३१):

आद्रात्री वासस्तनुते सिमस्मै i. 115. 4.

Upasarga and Verb

The upasarga need not necessarily come immediately before the verb, some word or words may intervene. Sometimes the upasarga follows the verb instead of preceding it. (ते प्राग्धातोः । छन्दसि परेऽपि । व्यवहिताश्च । १।४।८०-८२).

In उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ॥ i. 1. 7 there is the maximum of space between the upasarga and the verb. Other examples are:

स देवाँ एह वक्षति i. 1. 2, आ ये तन्वन्ति रश्मिभिः i. 19. 8, अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु i. 19. 9, नमस्यन्तो दिव आ पृष्ठमस्थुः परि द्यावापृथिवी यन्ति सद्यः i. 115. 3, निरंहसः पिपृता निरवद्यात् i. 115. 6, अन्तर्ह्यग्न ईयसे ii. 6. 7, स विद्वाँ आ च पिप्रयः···आ चास्मिन्त्सत्सि बर्हिषि ii. 6. 8, यः सुन्वते पचते दुध्र आ चिद्वाजं दर्दर्षि ii. 12. 15 (see p. 204), सं पूषन् विदुषा नय vi. 54. 1, समु पूष्णा गमेमहि vi. 54. 2, पूषन्ननु प्र गा इहि vi. 54. 6, परि पूषा पुरस्ताद्धस्तं दधातु दक्षिणम् vi. 54. 10, आ वामश्वासः सुयुजो वहन्तु...उप स्रिध्वः प्रदिवि क्षरन्ति v. 2. 4. In मा नो घोरेण चरताभि धृष्णु x. 34. 14 the उपसर्ग comes after the verb. Similarly, in प्रतिदीव्ने दधत आ कृतानि x. 34. 6 the उपसर्ग follows the participle.

The normal order is found in यः शर्धते नानुददाति शृध्याम् ii. 12. 10, यं क्रन्दसी संयती विह्वयेते ii. 12. 8, यस्मान्न ऋते विजयन्ते जनासः ii. 12. 9, अवासृजत् सर्तवे सप्त सिन्धून् ii. 12. 12, etc.

The Upasarga is often repeated in place of the compound verb; as, नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः। नि श्येनासश्चिदर्थिनः॥ x. 127. 5.

Conjugation

Indian students familiar from their boyhood with classical Sanskrit find it difficult at first to understand the intricacies of the modal forms of Vedic. In the earlier language in addition to the indicative, the optative and the imperative there are the subjunctive and the injunctive. Further all the five moods are formed not only from the present stem as in classical Sanskrit but also from aorist and perfect stems. Participles are formed from the stems of these three as well as that of the future, while passive participles are formed from the present, perfect and future.

The subjunctive present is formed by adding to the indicative stem (*i.e.*, along with the विकरण) a strong *a* which coalesces to *ā* with the final of *a*-stems (भ्वादि, दिवादि, तुदादि and चुरादि roots). Sometimes even in the case of other stems we get *ā* after the analogy of the *a*-stems (*Cf.* Pāṇini's rule—लेटोऽडाटौ). The endings fluctuate between the primary (ति, तस्, etc.) and the secondary (त्, ताम्, etc.). Thus from भू (भ्वादि)

we have the indicative stem भर, the modal sign of the subjunctive अ and the 3. sing. ending ति or त् giving the forms भराति or भरात्, in 2. s. we have भरासि or भरा: and in 1. sing. भराणि or भरा. In the case of भृ (जुहोत्यादि) the stem is बिभर् to which is added the modal sign अ and the ending ति or त् so that we get बिभरति or बिभरत् in 3. s., बिभरसि or बिभर: in 2. s. and बिभराणि or बिभरा in 1. s. In ŚB., however, we have the form बिभराणि after the analogy of forms like भराणि (भ्वादि), बिभराणि, etc. Similarly, from इ we have समवायात् though the form expected is समवायत् (सम् अव इ अ त्).

The injunctive is identical in form with an unaugmented past tense. It became practically obsolete in the Brāhmaṇa period, its only remnants being the unaugmented aorist with मा. Thus तं तु त्वा मा गिरौ सन्तमुदकमन्तश्छैत्सीत् (p. 411) is an instance of the injunctive.

As regards tense the Vedic is particularly rich in the aorist of which seven varieties may be distinguished:

A. Sigmatic aorist (with the tense-sign s):

(1) s-aorist: अभैषम् (from भी), अकार्षीत् (from कृ) etc. च्लेः सिच् ३।१।४४ in the case of अनिट् roots.

(2) sa-aorist अक्रुक्षत् (from क्रुश् 'to cry out'), अस्पृक्षत् (from स्पृश्) etc. शल इगुपधादनिटः क्सः। श्लिष आलिङ्गने। न दृशः। ३।१।४५-४७.

(3) iṣ-aorist: अक्रमिषम्, अकारिषम्, अग्रहीष्ट, etc. च्लेः सिच् with the union-vowel इ acc. to आर्धधातुकस्येड् वलादेः ७।२।३५.

(4) siṣ-aorist: अज्ञासिष्टाम्, अयासिषम्, etc. यम-रम-नमातां सक् च ७।२।७३।

B. A-sigmatic aorist:

(1) Root-aorist: अभूत्, अस्थात्, अगात्, etc. The ending is added here direct to the root. गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु। विभाषा घ्राधेट्शाच्छासः। २।४।७७-७८।

(2) a-aorist: अगमत्, अस्यत्, etc. The ending is added here after the tense sign अ. अस्यतिवक्तिख्यातिभ्योऽङ्। लिपिसिचि-

श्च। आत्मनेपदेष्वन्यतरस्याम्। पुषादिद्युताद्य्लृदितः परस्मैपदेषु। सर्तिशास्त्यर्तिभ्यश्च। इरितो वा। जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च। कृमृदृरुहिभ्यश्छन्दसि ३।१।५२-५९.

(3) Reduplicated aorist: अपप्तत्, अपीपतत्, अचीकरम्, etc. The ending is added to the reduplicated root to which an अ is often added. णिश्रिद्रुस्रुभ्यः कर्तरि चङ्। विभाषा धेट्श्व्योः। ३।१ ४८-४९.

See V. G. S., pp. 158-175. The Bengali student will find the whole thing treated at great length in Bengali in *Bhaṭṭi-kāvya*, Canto I, ed. by K. C. Chatterjee, pp. 16 ff. Appendix.

Of the different moods of the aorist the indicative alone is found in class. Skt.

We shall take some concrete examples to make the distinction between the various forms of the various systems clear. From गम् we have the present 2. s. imperative गच्छ in Vedic as well as class. Skt. In the Vedas, however, we come across गधि and गहि also where the ending has evidently been added immediately to the root. Had गम् belonged to the अदादि group there would be nothing remarkable in it, but since it is not an अदादि root, yet takes the ending of the imperative without the intervention of its own proper विकरण it cannot belong to the present system. Had it belonged to the perfect system there would have been reduplication as in the case of शुशुग्धि from शुच्. Now there is a variety of the aorist where the ending is added direct to the root. This is known as the root-aorist. So गधि, गहि, etc. are the 2 s. imperatives of the root-aorist of गम्.

Again the 1. pl. Ā of the present optative of गम् is गच्छेमहि but in the Pūṣan hymn we have गमेमहि which may be analysed as गम् अ ईमहि where the ending has been added to the simple root to which an अ has been added without the usual छ विकरण of the root. And we know there is a class of aorists known as the a-aorist where the ending is added after *a* has been added to the root. We can thus easily understand that गच्छेमहि belongs

to the present system, while गमेमहि belongs to the a-aorist system.

Again suppose we have the two forms वक्षाति and वक्षति. Both are evidently subjunctives. वक्षाति looks like a regular subjunctive where the modal sign अ has coalesced with the विकरण अ to आ. वक्षति appears at first sight to be an irregular form but on analysis we find that the modal sign अ has here been added after the aorist विकरण स् (सिच्) and not after the present विकरण अ (शप्). It is, therefore, perfectly regular, only it belongs to the s-aorist system and not to the present system.

Again take the imperatives शृणुधि, श्रुधि, and the hypothetical शुश्रु-धि. The first ((शृणुधि) has got the present विकरण नु and so belongs to the present system. The second (श्रुधि) has the ending added direct to the root and so belongs to the root-aorist system. The third has got the ending added to the reduplicated root and so belongs to the perfect system. युयोधि (p. 130-31) from यु 'to separate' belongs to the present system as this यु belongs to the जुहोत्यादि group.

With a very little practice with the help of the excellent list of verbs at the end of Macdonell's *Vedic Grammar for Students* the student will be able to distinguish clearly between the various forms of the three systems.

Present Indicative :

सूर्यस्य यत्र विमुचन्त्यश्वान् (=विमुञ्चन्ति) v. 62. 1.
सो अर्यः पुष्टीर्विज इवा मिनाति (=आमोनाति) ii. 12. 5.
य ईशे (=ईष्टे) अस्य द्विपदश्चतुष्पदः x. 121. 3.
सूर्यो रूपं कृणुते (=करोति) द्योरुपस्थे i. 115. 5.
तस्मै कृणोमि (=करोमि) न धना रुणध्मि x. 34. 12.
राजा चिदेभ्यो नम इत् कृणोति x. 34. 8.
अहं जनाय समदं कृणोमि x. 125. 6.
[*Cf.* मित्रं कृणुध्वं खलु मृळता नः x. 34. 14]
यक्षि (=यज) चिकित्व आनुषक् आ चास्मिन्त्सत्सि (=सीद) बर्हिषि ii. 6, 8.

शुष्माच्चिदस्य पर्वता भयन्ते (बिभ्यति) ii. 12. 13.

भूरेर्दातारं सत्पतिं गृणीषे (=गृणे) ii. 33. 12.

Aorist Indicative:

(*a*) Root-aor:

चित्रं देवानामुदगादनीकम्। i. 115. 1.

यो दासं वर्णमधरं गुहाकः (=अकार्षीत्) ii. 12. 4.

अस्मा एतं पितरो लोकमक्रन् (=अकार्षुः) x. 14. 9.

न्युप्ताश्च बभ्रवो वाचमक्रत (=अकृषत) x. 34. 5.

अनुव्रतामप जायामरोधम् (=अरुधम् or अरौत्सम्) x. 34. 2.

स पर्यगाच्छुक्रमकायमव्रणम् *Īśā*, 8.

(*b*) a-aor:

श्वघ्नीव यो जिगीवाँल्लक्षमादत् ii. 12. 4

यस्यागृधद्वेदने वाज्यक्षः x. 34. 4.

(*c*) s-aor:

*आप्रा द्यावापृथिवी अन्तरिक्षम् i. 115. 1.

विभीदको जागृविर्मह्यमच्छान् x. 34. 1.

Present Subjunctive:

(*a*) primary ending: यो अञ्जसानुशासति vi. 54. 1, यो गृहाँ अभिशासति vi. 54. 2, यमं पश्यासि वरुणं च देवम् x. 14. 7, कुम्भ्यां माग्रे बिभरासि SB. i. 8. 1, तस्यां मां बिभरासि Ib., अथ मा समुद्रमभ्यवहरासि Ib., स यदा तामतिवर्धै Ib., नावमुपकल्प्योपासासै Ib., नावमापद्यासै Ib., यावद्यावदुदकं समवायात् तावत् तावदन्ववसर्पासि, Ib.

(*b*) secondary ending: अग्निना रयिमश्नवत् i. 1. 3, य एवेदमिति ब्रवत् vi. 54. 1, इम एवेति च ब्रवत् vi. 54. 2, पूषा नो यथा वेदसामसद् वृधे i. 89. 5.

Aorist Subjunctive:

(*a*) root-aor.: देवो देवेभिरागमत् i. 1. 5.

(*b*) s-aor.: स देवाँ एह वक्षति i. 1. 2, यं त्रासाथे वरुणेळास्वन्तः v. 62. 6.

(*c*) iṣ-aor.: यदादीध्ये न दविषाण्येभिः x. 34. 5.

---

* This form has misled many commentators and should be studied carefully. See pp. 94-5.

Perfect Subjunctive:

स विद्वाँ आ च पिप्रयः ii. 6. 8.

Present Imperative:

युयोध्यस्मद् द्वेषांसि ii. 6. 4, because यु to separate is जुहोत्यादि.

Aorist Imperative:

(*a*) root-aor.: मरुद्भिरग्न आ गहि i. 19. 1, अथारिष्टाभिरा गहि vi. 54. 7, यजिष्ठ होतरा गहि ii. 6. 6, इमा उ षु श्रुधी गिरः ii. 6. 1, श्रुधि श्रुत श्रद्धिवं ते वदामि x. 125. 4, स बोधि (√भू) सूरिर्मघवा ii. 6. 4, हवनश्रुन्नो रुद्रेह बोधि ii. 33. 15. पुनर्दातामसुमद्येह भद्रम् x. 14. 2.

(*b*) iṣ-aor.: तेन नो मित्रावरुणावविष्टम् v. 62. 9.

Perfect Imperative:

तन्नो मित्रो वरुणो मामहन्ताम् i. 115. 6.

Aorist Optative:

a-aor.: सह पूष्णा गमेमहि vi. 54. 2.

Aorist Precative:

root-aor.: परि णो हेती रुद्रस्य वृज्याः ii. 33. 14.

Injunctive:

(*a*) Imperfect: अक्षैर्मा दीव्यः कृषिमित् कृषस्व x. 34. 13, मा नो घोरेण चरताभि धृष्णु x. 34. 15.

(*b*) root-aor.: परि त्वेषस्य दुर्मतिर्मही गात् ii. 33. 14.

(*c*) a-aor.: मा गृधः कस्य स्विद्धनम् Īśā. 2, माकिर्नेशन्माकीं रिषत् RV. vi. 54. 7, स नो देवेष्वा यमत् x. 34. 14.

(*d*) s-aor.: मा त्वा गिरौ सन्तमुदकमन्तश्छैत्सीत् SB. i. 8. 1. 6.

(*e*) iṣ-aor.: मा नो हिंसीज्जनिता यः पृथिव्याः x. 121. 10.

Infinitive (कृत्यार्थे तवैकेन्केन्यत्वनः इति तुमर्थे कैन्-प्रत्ययः, तुमर्थे से-सेन्-असे-असेन्-क्से-कसेन्-अध्यै-अध्यैन्-कध्यै-कध्यैन् शध्यै-शध्यैन्-तवै-तवेङ्-तवेनः iii. 4. 9, ईश्वरे तोसुन्-कसुनौ iii. 4. 13):

Dat. तन्मित्रस्य वरुणस्याभिचक्षे i. 115. 5, अवासृजत् सर्तवे सप्त सिन्धून् ii. 12. 12, यद्वंहिष्ठं नातिविधे सुदानू v. 62. 9, दीर्घमायुः प्र जीवसे x. 14. 14,



नैषा गव्यूतिरपभर्तवा उ x. 14. 2, ब्रह्मद्विषे शरवे हन्तवा उ x. 125. 6, ता वां वास्तून्युश्मसि गमध्यै i. 154. 6.

Abl.-Gen.: मध्या कर्तोर्विततं सं जभार i. 115. 5.

Gerundive (क्त्वो यक् ७।१।४७):

हित्वायावद्यं पुनरस्तमेहि x. 14. 8, स्त्रियं दृष्टाय कितवं तताप x. 34. 11.

Endings:

-*masi* as the 1. pl. Par. primary (इदन्तो मसि ७।१।४६):
नमो भरन्त एमसि i.1. 7, स्तोतारस्त इह स्मसि vi. 54. 9.
e as the first sing. primary Ātm. ending (लोपस्त आत्मनेपदेषु ७।१।४१):
य ईशे अस्य द्विपदश्चतुष्पदः x. 121. 3 (contrast ईळे i. 1. 1).
Various strong endings for the imper. 2. pl. Par.:
(*a*) तप्-तनप्-तन-थनाश्च ७।१।४५.
तप्—यमाय घृतवद्धविर्जुहोत x. 14. 14 (*cf.* यमाय जुहुता हविः x. 14. 13).
तनप्—यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन । x. 14. 15.
re for *ire*.
(*b*) इरयो रे ६।४।७६—ईर्मा तस्थुषीरहभिर्दुदुह्रे v. 62. 2.

Intensive active (यङ्लुक्):

यः सुन्वते पचते दुध्र आ चिद् वाजं दर्दर्षि ii. 12. 15.
गिरिशन्ताभिचाकशीहि *Śvet.* iii. 5.
Vedic *bh* for class. *h* in roots (हृग्रहोर्भश्छन्दस्युपसंख्यानम्):
मध्या कर्तोर्विततं सं जभार i. 115. 4, नैषा गव्यूतिरपभर्तवा उ x. 14. 2.

Cases

The *Impersonal Acc.*: स्त्रियं दृष्टाय कितवं तताप x. 34. 11.

Acc. in the sense of '*about*' (अधिकृत्य): 'यं' स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम् ii. 12. 5, पिता माता भ्रातर एनमाहुः x. 34. 4.

The *Temporal Acc.* for the *Loc.*: अथैतिथीं समां तदौघ आगन्ता ŚB. i. 8. 1. 4, ततिथीं समां नावमुपकल्प्योपासासै ŚB. i. 8. 1. 5.

The *Cognate Acc.*: यमेन ये सधमादं मदन्ति x. 14. 10, स हास्मै वाचमुवाद ŚB. i. 8. 1. 2.

Accusative with—

(1) परिभू—अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि ṚV. i. 1. 4.

(2) आ-सद्—इमं यम प्रस्तरमा हि सीद x. 14. 4 (but आ च वक्षि सत्सि बर्हिषि ii. 6. 8).

(3) अन्तर्-ईं—अन्तर्ह्यग्न ईयसे विद्वाञ्जन्मोभया कवे ii. 6. 7.

(4) ईश्—सर्वांल्लोकानीशत ईशनीभिः Svet. iii. 1.

(5) प्रत्यच्—प्रत्यङ् जनांस्तिष्ठति *Svet.* iii. 2.

(6) अनु—यमस्य दूतौ चरतो जनाँ अनु x. 14. 12.

(7) तिरः—तिरः समुद्रमर्णवम् i. 19. 7, तिरः समुद्रमोजसा i. 19. 8.

(8) परः—न हि देवो न मर्त्यो महस्तव क्रतुं परः i. 19. 2 (*Cf.* परो दिवा पर एना पृथिव्या x. 125. 8).

Instrumental with—

(1) परः—परो दिवा पर एना पृथिव्या x. 125. 8 (*Cf.* महस्तव क्रतुं परः i. 19. 2).

(2) अन्य—अन्यदेवाहुर्विद्ययान्यदाहुरविद्यया* । *Īśā.* 10.

Dative with—

(1) विध्—यया ते अग्ने विधेम ii. 6. 2 (but तं त्वा ··· सपर्येम सपर्यवः ii. 6. 3), यो अस्मै हविषाविधत् vi. 54. 4, कस्मै देवाय हविषा विधेम x. 121. 1 ff.

(2) श्रत् धा—श्रदस्मै धत्त ii. 12. 5.

(3) अनु-दा—यः शर्धते नानुददाति शृध्याम् ii. 12. 10.

(4) दृ intensive—यः सुन्वते पचते दुध्र आ चिद्वाजं दर्दर्षि ii. 12. 15.

(5) छद्—विभीदको जागृविर्मह्यमच्छान् x. 34. 1.

(6) नम्—उग्रस्य चिन्मन्यवे ना नमन्ते x. 34. 8.

(7) स्था—न द्वितीयाय तस्थुः (तस्थे) *Svet.* iii. 2.

(8) वि-चक्—तन्मे वि चष्टे सवितायमर्यः x. 34. 13.

(9) वद्—स हास्मै वाचमुवाद SB. i. 8. 1. 2.

(10) मृड्—मृळा जरित्रे रुद्र स्तवानः ii. 33. 11, मीढ्वस्तोकाय तनयाय मृळ ii. 33. 14.

(11) नमः—राजा चिदेभ्यो नम इत् कृणोति x. 34. 8.

(12) प्रिया—प्रिया सखिभ्य उत मह्यमासीत् x. 34. 2.

* The Instrumental often interchanges with the Ablative; *cf.* सर्वभूतपिशाचेभ्यः सर्वसर्पसरीसृपैः । देवेभ्यो मानुषेभ्यश्च भयेभ्योऽभिरक्ष माम् ॥

रामरक्षा १६ ।

(18) परस्पा—अक्रविहस्ता सुकृते परस्पा v. 62. 6.

Dative by Attraction:

तावस्मभ्यं दृशये सूर्याय x. 14. 12, ब्रह्मद्विषे शरवे हन्तवा उ x. 125. 6, पाणिभ्यामवनेजनायाहरन्ति ŚB. i. 8. 1. 1.

Ablative with परि: स नो वृष्टिं दिवस्परि ii. 6. 5.

Genitive with—

(1) (*a*) राज्—राजन्तमध्वराणाम् i. 1. 8.

(*b*) ईश—ईशानं राय ईमहे vi. 54. 8, य ईशे अस्य द्विपदश्चतुष्पदः x. 121. 3. *Cf.* सर्वांल्लोकानीशत ईशनीभिः *Śvet*. iii. 1.

(2) विद्—ये मह्नो रजसो विदुः i. 19. 3.

(3) अन्तर्—तदन्तरस्य सर्वस्य *Īśā*. 5 (see pp. 169, 225).

(4) बाह्यतः—तदु सर्वस्यास्य बाह्यतः *Īśā*. 5.

(5) हेतु—(षष्ठी हेतुप्रयोगे २।३।२६), अक्षस्याहमेकपरस्य हेतोरनुव्रतामप जायामरोधम् x. 34. 2.

Partitive Genitive: सनेम मध्वो अधिगर्त्यस्य v. 62. 7.

Locative with—

(1) गम्—स इद्देवेषु गच्छति i. 1. 4.

(2) आ-यम्—स नो देवेष्वा यमत् x. 14. 14.

(3) ऋध्—यस्यागृधद्वेदने वाज्यक्षः x. 34. 4.

(4) लिप्—न कर्म लिप्यते नरे *Īśā*. 2.

(5) आ—आ चास्मिन्त्सत्सि बर्हिषि ii. 6. 8 (*Cf.* इमं यम प्रस्तरमा हि सीद x. 14. 4).

(6) अधि—यो देवेष्वधि देव एक आसीत् x. 121. 8.

Miscellaneous:

The connecting particle is often omitted; as, अग्निना रयिमश्नवत् पोषमेव दिवेदिवे i. 1. 3.

Both न and इव are sometimes used: पशुं न नष्टमिव दर्शनाय i. 116. 23, सूर्यस्येव न रश्मयः ix. 64. 7.

Similarly, we find double suffixes as in इहाद्योषः श्रेष्ठतमा व्युच्छ i. 113. 12, दीनैर्दक्षैः प्रभूती पुरुषत्वता iv. 54. 3.

ADDITIONS AND CORRECTIONS

Owing to the use of very old types the proof-sheets were mostly illegible and so the number of typographical errors in this edition of the Vedic Selections is considerable. Some of these and other errors are pointed out in this section for which I am indebted mainly to Prof. Manindra Kishore Chakravarty and, to a certain extent, to Dr. Sitanath Goswami, two of my former pupils. It is expected a new edition will come out shortly free from broken types and printer's errors

p. 37 l. 5, for यम् read यम्.

p. 37 l. 7, for इहेवेषु read इहेवेषु.

p. 49 l. 6, for p. 27 read p. 35.

p. 54 l. 3, for भव read भव.

p. 61 f. n. 2. para 2, for दशमसूक्तानुक्रम read दशमसूक्तानुक्रम.

p 65 l. 5, for सव read सव.

p. 80 l. 19, for पर्वतान् read पर्वतान्.

p. 85 l. 6 for पूर्वपीतये read पूर्वपीतये.

p. 86 l. 12, for त्वा read त्वा.

p. 89 f. n. 2, for ऋषिकम: read ऋषिकम्.

p. 89 f. n. 2, for मधुच्छन्दस read मधुच्छन्दस.

p. 93 l. 25, for खड्गास्य read खड्गस्य.

p. 96 l. 19, for सन्दधत् read सन्दधत्.

p. 97 l. 13, for हैतदेव read हैतदेव.

p. 98 l. 26, for मर्यो read मर्यः.

p. 103 l. 9, for सूर्यस्य read सूर्यस्य.

p. 112 l. 12, for राड read राड़.

p. 116 l. 5 for उत read उत.

p. 122 f. n. 1, for सामयागे read सोमयागे.

p. 122 l. 12, for फ्रि read फ्रि.

p. 123 l. 18, for उञ जञ read उञ ज .

p. 124 l. 16 for नपाद read नपाद.

p. 126 l. 6, for 437, 1. 4 read 487 l. 17.

p. 126 l. 24, for सहस जङ्: read सहसो जङ्: ।

p. 127 l. 22, for गिर्वेणसं read गिर्वेणसं.

p. 129 l. 9, for lengthening read guṇa.

p. 139 l. 22, for विद्वां read विद्वान्.

p. 140 l. 31, for p. 102 read p. 182.

p. 148 l. 4, for 'सग read वंसग.

p. 154 l. 4, for Prof. Prabhat Kumar Mukherjee drew my attention to the fact that both the Sāṅkhāyana Srauta Sūtra and Sāyaṇa's commentary on the Atharva Veda have ब्राह्मणाच्छंसी for मैत्रावरुण:. The orthodox school defends the reading मैत्रावरुण thus: सर्वेऽहानि त्रिप्रकाराणि भवन्ति—संपातवन्ति, ऐकाहिकानि, अहीनसूक्तवन्ति चेति। तेषां सर्वपृष्ठत्वमसर्वपृष्ठत्वं चेति विशेषो प्रतिस्वम्। सर्वपृष्ठत्वे सामसूक्तान्यपेत्यन्ते तत्र। तानि च सामसूक्तानि "विश्वजितोऽग्निं नर" इति खण्डे स्वरूपत: प्रदर्शितानि "सत्रामदास" इत्यारभ्य "सामसूक्तानी"त्यंशेन। एवं चात्र न ऋत्विगभिप्रायकोऽयं सूक्तनिर्देश: किन्तु सामसूक्तपदार्थविवेचनपरोऽयं निर्देश:। अत एव टीकाकृता "सामसूक्तानि सप्रगाथानी"-त्यत्र "सामसूक्तानां सामप्रगाथानां च सर्वपृष्ठे प्राप्तिरुक्ता। इह तेषां मध्ये सामसूक्तानां स्वरूपं स्थानं चोच्यते" इत्युक्तम्। एवं चेमानि सूक्तान्यविशेषेण मैत्रावरुणादिऋत्विक्त्रयेण सबध्यानि। ततश्च यो जात इति सूक्तभाष्ये मैत्रावरुणोल्लेखो न प्रमादकृतो भाष्यकारस्य। एवं सत्रामदास इति सूक्तभाष्यस्यापि न विरोध:। अथर्ववेदीये योजातएवेतिसूक्तभाष्येऽपि ब्राह्मणाच्छंस्युल्लेखे न विरोधस्यावसरलेश इति।

p. 166 f. n. 2, for सं वि read विसं.

p. 166 f. n. †, for दक: । रोधा read रोधादिक:.

p. 170 l. 8, for वाते: read वाते:.

p. 170 l. 11 for कृतानि read कृतानि.

p. 176 l. 17, for persons read genders in the third person.

p. 184 l. 19, read क्रन्दसी इति । संयती.

p. 188 l. 19, for जनासो read जनासो.

p. 188 l. 20, for युध्यमान: read युध्यमाना:.

p. 191 f. n. 3, अनया and अनेन are to be transposed.

p. 192. l. 15, for अर्वाणि read अर्वा णि.

p. 195 l. 29, read शतं हेमन्ताञ्छतमु.

p. 215 l. 21, for धेना: read धेना:.

p. 215 l. 22, for एक: read एक:.

p. 221 l. 18, for सुयुजो read सुयुजो.

p. 241 l. 3, for कोशोऽव read कोशोऽव.

p. 242 l. 14, for प्रथम read प्रथम:.

p. 245 l. 2, for माकीं रिष read माकीं रिष.

p. 252 l. 15, for पम्पशानम् read पस्पशानम्.

p. 255 l. 4, should we read पन्यानमनुस्याश्रयमानम् ? See Mañjūṣā, October, 1957.

p. 258 l. 3, for ऊँ इति read ऊँ इति.

p. 260 l. 21, for इधान: read इधान:.

p. 263 l. 22, for सोदा read सोदा.

p. 272 l. 4, for अस्तम् read अस्तम्.

p. 279 l. 23, for कणुकादि read कण्टकादि.

p. 280 l. 8, read पथिरक्षी इति.

p. 281 l. 7, for गन्तृणां read गन्तृणां.

p. 282 l. 28, for अक्षम् read अक्षम्.

p. 283 l. 21, read पवीनस and वाशीवस.

p. 289 l. 8, for षळ read षळ्.

p. 298 l. 10, for हरिवो वर्धताना: read हरिवो वर्धताना:.

p. 298 f. n., for निघं read निघृषं.

p. 305 l. 24, for आतर read आतर.

p. 316 f. n. †, read ईङ्गिन: । वियुनक्त्यपार्थकं...तेऽभंकचेष्टितं.

p. 318 l. 12, for नम: । इत् read नम: । इत् ।.

p. 321 l. 19, for नतते read न वर्तते.

p. 332 l. 14, for बभ्रूणां read बभ्रूणां.

p. 349 l. 22, for आहु: read आहु:.

p. 355 l. 7, for रेजमाने इति read रेजमाने इति.

p. 357 l. 26, for एक: read एक:.

p. 366 l. 18. for परि read परि.

p. 378 l. 18, for आऽवेशयन्तीम् read आऽवेशयन्तीम्.

p. 384 f. n., for प्रोपाभ्यां read प्रापाभ्यां.

p. 390 l. 18, for मा च का च read या च का च.

p. 394 l. 30, for सुर्वौ read सृक्वं.

p. 398 l. 7, for p 343 read pp. 67, 343.

p. 406 l. 10, for मतस्य read मत्स्य.

p. 431 l. 11, read य एष सुप्तेषु...निर्मिमाण:.

p. 459 l. 4, for उत्तमावेज read उत्तमावर्जं.

p. 462 l. 15, after endings, read and in the neuter nom. acc. s.

p. 466 l. 24, for *holisthō* slips read *ólisthos* slipperiness.

p. 468 l. 17, for ह्मनहे read ह्मनहे.

p. 470 f. n. 2. Printed editions of the *Kāśikā* read लिङः सार्वधातु-कत्वात् which is absurd.

p. 473 l. 25, for अवसा read अवसा.

p. 482 l. 4, for *vat* read *yat*.

p. 490 l. 10, in the uṇādi rule the suffix is *-itvan* but commentators are of opinion इकारोच्चारणमुत्तरार्थं अनेरिटा सिद्धत्वात्.

p. 495 l. 4, for ३ read २.

p. 504 l. 5, for रथैः read रथैः.

p. 504 l. 20, for २२४ read १७४.

p. 505 l. 16, for २ read ९.

p. 507 l. 22, for हत् read इत्.

p. 510 l. 5, for सुरायाः read सुरायाः.

p. 519 l. 14, for gen. read abl.

p. 520 l. 18, for निधिम्ऽइव read निधिम्ऽइव.

p. 525 l. 23, for शर read शिर.

p. 527 l. 8, for शासुः इव read शासुःऽइव.

p. 529 l. 10, after inten. add act.

p. 532 l. 14, for 3 read 13.

p. 539 l. 10, for x. 55. 9 read x. 85. 9.

p. 545 l. 29, for २।१।७८ read ३।१।७८.

p. 551 l. 6, read अवस्यत् (denom. pres. part....ऋजूयत् denom. pres. part).

p. 551 l. 12, add: See pp. 144-45.

p. 554 l. 7, for O unageing ones read you unageing ones. अजरयु standing in the middle of a pāda is accented and that on final syllable. It cannot, therefore, be regarded asa vocative.

p. 558 l. 28, for जामि read जामिः.

p. 561 f. n. §, for ४९ read ४१.

p. 562 l. 19, for १२ read ७२.

p. 563 l. 8, for अभिनती read अभिनती.

p. 563 l. 11, for वि । अद्यौत् read वि अद्यौत् ।

p. 565 l. 11, omit 'here'.

p. 565 l. 17, for ७।७।८९ read ७।२।८९.

p. 568 l. 21, for भासो read भासा.

p. 575 l. 25, for ०चिकात् read ०चिकान्.

p. 576 l. 21, for तथोयमुषा read तथेयमुषा.

p. 580 l. 9, for समनऽगाःऽस्व read समनगाःऽस्व.

p. 587 l. 18, for ७।३।५ read ७।२।५.

p. 587 f. n. §, for ३।४।१४ read ३।४।६४.

p. 598 last line, for 602 read 605.

p. 606 l. 12, for भूरिऽमज्मा: read भूरिऽमज्मा:.

p. 621 l. 2, for नमोभि: read नमोभि:.

p. 621 l. 5, for भिषजां read भिषजां.

p. 622 l. 26, for 27 read 32.

p. 623 l. 5 for मनाये read मनाये.

p. 631 f. n., for बभ्रु वे read बभ्रवे.

p. 634 l. 12, for injunc. read subjunc.

p. 637 l. 4, for मळ्ह । जरिते read मळ्ह । जरि .

p. 643 l. 12, for offering read offspring.

p. 665 l. 18, for Then did the Gods read Then only did lie (Indra).

p. 671 l. 20, read सु । सुधि ।

p. 674 l. 18, for स्वापूतन read स्वापूतन.

p. 679 l. 10, for ii. 6. 1 read ii. 6. 8.